दु० टी० ५४

उदग्र श्चेति हे राजन् [illegible]रणे उदग्रः शिला वृक्षादिभिः हतः किंच करालः एव दंत मुष्टि तलैः निपातितः रणे संग्रामे उ-
दग्रः उदग्रासुरः शि[illegible] वृक्षश्च तौ शिलावृक्षौ शिलावृक्षौ आदिर्येषां ते शिलावृक्षादयः तैः शिलावृक्षादिभिः शि-
ला पाषाणः हतः म[illegible]ः करालः एव करालासुरः एव दंताश्च मुष्टयश्च तलाश्च ते दंत मुष्टि तलाः दंताः गज दंत
निर्मिता युधानि तला[illegible]पेटाः निपातितः प्रहारितः ॥२६॥ देवीति हे राजन् देवी क्रुद्धा सती उद्धतं गदा पातैः चूर्णया-
मास किंच वाष्कलं भिंदि पालेन चूर्णयामास ताम्रं तथा अंधकं वाणैः चूर्णयामास उद्धतं उद्धता सुरं गदादिभिः पा-
ताः गदापाताः तैः गदा पातैः पाताः प्रहाराः वाष्कलं वाष्कला सुरं ताम्रं ताम्रासुरं अंधकं अंधका सुरं हतः महा-

उदग्र श्चरणे देव्या शिला वृक्षादि भिर्हतः ॥ दंतमुष्टि तलैश्चैव करालश्च
निपातितः ॥२६॥ देवी क्रुद्धा गदा पातै श्चूर्णयामास चोद्धतं ॥ वाष्क-
लं भिंदि पालेन वाणै स्ताम्रं तथांधकं ॥२७॥ उग्रास्य मुग्र वीर्यंच तथै-
वच महा हनुं ॥ त्रिनेत्राच त्रिशूलेन जघान परमेश्वरी ॥ २८ ॥ ॐ॥४

रितः ॥२७॥ उग्रास्येति हे राजन् त्रिनेत्रा परमेश्वरी उग्रास्यं किंच उग्र वीर्यं तथैव च महाहनुं त्रिशूलेन जघान
त्रीणि नेत्राणि यस्याः सा त्रिनेत्रा परामा येषां ते परमाः परमाणां ईश्वरी परमेश्वरी परोत्कृष्टा महालक्ष्मीः परमा-
णां ब्रह्मादीनां ईश्वरी नियंत्री उग्रं आस्यं यस्य सः उग्रास्यः उग्रं भयंकरं आस्यं मुखं उग्रनामानं दैत्यं उग्रंवीर्यं य[illegible]
उग्रवीर्यः तं उग्रवीर्यं उग्रं महत् वीर्यं पराक्रमः उग्रवीर्यं उग्रवीर्य नामानं दैत्यं महत् हनुर्यस्य सः महा[illegible]
हनुं महा हनुना मानं दैत्यम् ॥२८॥

दु० टी० ५५

विडालस्येति हे राजन् विडालस्य कायात् शिरः असिना पातयामास वै दुर्द्धरं किंच दुर्मुखं उभौ शरैः यमक्षयं
डालं विडालासुरस्य कायात् शिरः मस्तकं असिना खड्गेन वै निश्चयेन दुर्द्धरं दुर्द्धरासुरं दुर्मुखं दुर्मुखासुरं उभौ द्वौ[illegible]
वाणैः यमक्षयं यमगृहं निन्ये प्रापवती ॥२९॥ एवमिति हे राजन् एवं स्वसैन्ये संक्षीयमाणे सति महिषासुरः तु माहिषेण स्व-
रूपेण तान् गणान् त्रासयामास एव अनेन प्रकारेण तान् निश्वास संभवान् ॥३०॥ कांश्चिदिति हे राजन् महिषासुरः
कांश्चित् तुंड प्रहारेण भूतले पातयामास तथा अपरान् खुरक्षेपैः भूतले पातयामास किंच लांगूल ताडितान् कांश्चित् भू-
तले पातयामास किंच शृंगाभ्यां विदारितान् अन्यान् भूतले पातयामास कांश्चित् वेगेन भूतले पातयामास अपरान् नादे-

विडालस्यासिना कायात्पातयामास वै शिरः ॥ दुर्धरं दुर्मुखं चोभौ शरै र्निन्ये
यमक्षयं ॥२९॥ एवं संक्षीय माणेतु स्वसैन्ये महिषासुरः ॥ माहिषेण स्वरूपे-
ण त्रासयामास तान् गणान् ॥३०॥ कांश्चित्तुंड प्रहारेण खुरक्षेपै स्तथापरान्
लांगूल ताडितां श्चान्यान् शृंगाभ्यांच विदारितान् ॥३१॥ वेगेन कांश्चिदपरा
न्नादेन भ्रमणेनच ॥ निश्वास पवनेनान्यान्पातयामास भूतले ॥३२॥ ॐ॥

न किंच भ्रमणेन भूतले पातयामास अन्यान् निश्वास पवनेन भूतले पातयामास कांश्चित् गणान् तुंडेन प्रहारः तुंड प्रहा-
रः तेन तुंड प्रहारेण तुंडे[illegible]वेन अपरान् अन्यान् गणान् खुरैः क्षेपाः खुरक्षेपाः तैः खुरक्षेपैः क्षेपाः क्षेपणानि लांगूलेन
ताडिता लांगूलताडिताः ता[illegible]लताडितान् ताडिताः प्रहारिताः कांश्चित् गणान् विदारितान् प्रहारितान् अन्यान् गणान् कांश्चि-
त् गणान् अपरान् अ[illegible]गणान् नादेन शब्देन भ्रमणेन मंडलाकार गमनेन अन्यान् गणान् निश्वासस्य पव- ५५
नः निश्वास पवनः ते[illegible]वास पवने[illegible] भूतले पृथिवीतले ॥३२॥

दु० टी० ५१ निपात्येति हे राजन् स[illegible]सुरः प्रमथानीकं निपात्य महादेव्याः सिंहं हंतुं अभ्यधावत ततः अंबिका कोपं चक्रे असुरः म ८४
हिषासुरः प्रमथानां [illegible] प्रमथानीकं तत् प्रमथानीकं प्रमथानां गणानां अनीकं सैन्यं निपात्य प्रहृत्य महती चासौ
देवी च महादेवी तस्याः [illegible]देव्याः महती उत्कृष्टा हंतुं प्रहर्तुं ततः तदनंतरं अभिधावनानंतरं अंबिका देवी कोपं
क्रोधं चक्रे कृतवती ॥ [illegible] सोपीति हे राजन् महावीर्यः अपि सः कोपात् खुरक्षुण्ण महीतलः सन् उच्चान् पर्वतान् शृं
गाभ्यां चिक्षेप किंच ननाद महत् वीर्यं यस्य सः महावीर्यः वीर्यं पराक्रमः [illegible] महिषासुरः कोपात् क्रोधात् मह्याः तलं म

निपात्य प्रमथानीक मभ्यधावत सोसुरः ॥ सिंहं हंतुं महादेव्याः कोपं च-
क्रे ततोम्बिका ॥ २३ ॥ सोपि कोपा न्महावीर्यः खुरक्षुण्ण महीतलः ॥ शृं
गाभ्यां पर्वता नुच्चां श्चिक्षेप च ननाद च ॥ २४ ॥ वेगभ्रमण विक्षुण्ण म-
हीतस्य व्यशीर्यत ॥ लांगूलेनाहतश्चाब्धिः प्लावयामास सर्वतः ॥ २५ ॥

हीतलं खुरैः क्षुण्णं महीतलं येन सः खुरक्षुण्ण महीतलः मह्याः पृथिव्याः तलं तलभागं क्षुण्णं विदारितं ननाद शब्दं
कृतवान् ॥ २४ ॥ वेगेति हे राजन् तस्य वेगभ्रमण विक्षुण्ण मही व्यशीर्यत लांगूलेन आहतः अब्धिः जलेन सर्वतः प्लावया
मास तस्य महिषासुरस्य वेगेन युक्तं वेगयुक्तं च तत् भ्रमणं च वेगभ्रमणं वेगभ्रमणेन विक्षुण्णः वेगभ्रमण विक्षु
क्षुण्णः कुंठिता शिथिला मही पृथ्वी आहतः ताडितः अब्धिः समुद्रः सर्वतः सर्वं जगत् ॥ २५ ॥

दु० टी० ५३ भग्नामिति हे राजन् निपतितां शक्तिं भग्नां दृष्ट्वा क्रोधसमन्वितः चामरः शूलं चिक्षेप सा अपि तत् बाणैः अ[illegible]
ण्णां त्रुटितां क्रोधेन समन्वितः क्रोधसमन्वितः समन्वितः युक्तः चामरः चामरासुरः सा देवी तत् शूलं ॥ २२ ॥ तत इति
ततः सिंहः समुत्पत्य गजकुंभांतरस्थितः सन् त्रिदशारिणा तेन सह उच्चैः बाहुयुद्धेन युयुधे ततः तदनंतरं शूलछेदना[illegible]
रं समुत्पत्य आप्लुत्य गजस्य कुंभौ गजकुंभौ गजकुंभयोः अंतरं गजकुंभांतरं गजकुंभांतरे स्थितः गजकुंभांतरस्थितः गज
स्य हस्तिनः कुंभौ गंडस्थलौ अंतरं मध्यं त्रिदशानां अरिः त्रिदशारिः तेन त्रिदशारिणा त्रिदशानां देवानां अरिः शत्रुः तेन
चामरासुरेण उच्चैः महता बाहुभ्यां युद्धं बाहुयुद्धं तेन बाहुयुद्धेन ॥ २३ ॥ युध्यमानाविति हे राजन् ततः युध्यमानौ तौ तु

भग्नां शक्तिं निपतितां दृष्ट्वा क्रोध समन्वितः ॥ चिक्षेप चामरः शूलं बाणैस्तद-
पि साच्छिनत् ॥ २२ ॥ ततः सिंहः समुत्पत्य गजकुंभां तरस्थितः ॥ बाहुयुद्धे
न युयुधे तेनोच्चै स्त्रिदशारिणा ॥ २३ ॥ युध्यमानौ ततस्तौ तु तस्मान्नागान्म-
हींगतौ ॥ युयुधातेति संरब्धौ प्रहारै रतिदारुणैः ॥ २४ ॥ ततो वेगात्खमुत्पत्य
निपत्य च मृगारिणा ॥ कर प्रहारेण शिरश्चामरस्य पृथक् कृतम् ॥ २५ ॥

तस्मात् नागात् महीं गतौ संतौ अति दारुणैः प्रहारैः युयुधाते कथंभूतौ तौ अति संरब्धौ ततः तदनंतरं बाहुयुद्धानंतरं
युद्धं तदिति युध्यमानौ [illegible] सिंह चामरासुरौ नागात् गजात् महीं पृथिवीं गतौ संतौ अति संरब्धौ ततः तदनंतरं ॥ २४ ॥ तत इति
हे राजन् ततः मृगारिणा [illegible] खं उत्पत्य किंच निपत्य करप्रहारेण चामरस्य शिरः पृथक् कृतं ततः तदनंतरं युद्धानंतरं मृ-
गाणां अरिः मृगारिः [illegible] मृगारिणा मृगाणां हरिणानां अरिः शत्रुः मृगारिणा सिंहेन खं आकाशं उत्पत्य गत्वा नि-
पत्य अवतीर्य करेण [illegible] कर प्रहारः तेन कर प्रहारेण करेण हस्तेन चामरस्य चामरासुरस्य शिरः मस्तकं पृथक् भिन्नं ॥ २५ ॥

दु० सइति हेराजन् सः असुरः [illegible]र वर्षेण ववर्षकः केनक मिवतोयदः तोयवर्षेण मेरुगिरेः शृङ्गं यथा सः असुरः चि-
टी० क्षुराख्यः दैत्यः शराणां वर्षं [illegible] तेन शर वर्षेण शराणां बाणानां वर्षं वृष्टिः तोयंददातीति तोयदः तोयं जलं तोयदः
५० मेघः तोयानां वर्षं तोयवर्षं [illegible]य वर्षेण तोयानां जलानां वर्षं वृष्टिः मेरु आसौ गिरिश्च मेरु गिरिः तस्य मेरु गि
रेः मेरुः सुमेरुः गिरिः पर्वतः शृंगं शिखरं यथा इव २ तस्येति हे राजन् ततः देवी तस्य शरोत्करान् लीलया एव
छित्वा तुरगान् किंच वाजिनां यंतारं एव बाणैः जघानततः तदनन्तरं बाण वृष्ट्य नन्तरं तस्य चिक्षुरस्य शराणां

सदेवीं शर वर्षेण ववर्ष समरेसुरः ॥ यथा मेरुगिरेः शृंगं तोयवर्षेण
तोयदः ॥ २ ॥ तस्य छित्वा ततो देवी लीलयैव शरोत्करान् ॥ जघान तुर
गान्बाणैर्यंतारं चैव वाजिनाम् ॥ ३ ॥ चिच्छेद च धनुः सद्यो ध्वजं
चातिसमुच्छ्रितं ॥ विव्याध चैव गात्रेषु छिन्नधन्वानमाशुगैः ॥ ४ ॥ ०

उत्करः शरोत्करः तान शरोत्करान् शराणां बाणानां उत्करः समूहः लीलया एव क्रीडया एव अनायासेन
एवतुरगान् अश्वान् वाजिनां अश्वानां यंतारं सारथिं ॥ ३ ॥ चिच्छेदेति हे राजन् आशुगैः सद्यः धनुः किंच
अतिसमुच्छ्रितं ध्वजं चिच्छेद किंच गात्रेषु छिन्न धन्वानं एव विव्याध आशु गच्छंतीति आशुगाः आशुगैः
आशुशीघ्रं आशुगैः बाणैः सद्यः तत्क्षणं अति समुच्छ्रितं अत्युन्नतं गात्रेषु हस्त पादादिषु छिन्नं धनुर्यस्य सः
छिन्न धन्वा तं छिन्न धन्वानं ॥ ४ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

दु० सः असुरः खड्ग चर्म धरः सन् तां देवीं अभ्यधावत् असुरः चिक्षुराख्यः दैत्यः धारयतीति धरः खड्गश्च चर्म च त
टी० द्व चर्मणी खड्ग चर्मणोः धरः खड्ग चर्मधरः धरति धारयति कथं भूतः असुरः छिन्न धन्वा छिन्नं धनुर्यस्य सः
५१ न्नधन्वा पुनः कथं भूतः असुरः विगतः रथो यस्य सः विरथः विगतः नष्टः पुनः कथं भूतः असुरः हताः अश्वाः
यस्य सः हताश्वः पुनः कथंभूतः असुरः हतः सारथिर्यस्य सः हत सारथिः ॥ ५ ॥ सिंहमिति हे राजन् अतिवेगवान् अ
सिः तीक्ष्ण धारेण खड्गेन सिंह मूर्द्धनि आहत्य देवीं सव्ये भुजे आजघान अतिवेगो विद्यतेयस्यसः अतिवेगवान्

सच्छिन्न धन्वा विरथो हताश्वो हत सारथिः ॥ अभ्य धावततां देवीं ख
ड्ग चर्मधरोसुरः ॥ ५ ॥ सिंह माहत्य खड्गेन तीक्ष्णधारेण मूर्द्धनि ॥ आ
जघान भुजे सव्ये देवीमप्यति वेगवान् ॥ ६ ॥ तस्याः खड्गो भुजंप्राप्य प
फालन्रूपनंदन ॥ ततो जग्राह शूलं सकोपा दरुण लोचनः ॥ ७ ॥ ॥

सः चिक्षुरासुरः तीक्ष्णः धारोयस्यसः तीक्ष्णधारः तेन तीक्ष्ण धारेण मूर्द्धनि मस्तके आहत्य ताडयित्वा सव्य वामे
॥ ६ ॥ तस्यइति हे नृप नन्दन हेराजन् खड्गः तस्याः भुजं प्राप्य पफाल ततः कोपात् अरुण लोचनः सः शूलं जग्राह नृन्
पालयतीति नृपः नृपस्य नंदनः नृपनंदनः तत्संबोधने हे नृपनन्दन जनान् पालयति रक्षति नृपस्य राज्ञः नंदनः
पुत्रः तस्याः देव्याः पफाल वि[illegible] ः ततः तदनंतरं खड्ग विसीर्ण नंतरं कोपात क्रोधात् अरुणे लोचने यस्य सः अरुण ५१
लोचनः अरुणे रक्ते लोचने [illegible] सः चिक्षुरासुरः ॥ ७ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

चिक्षेपेति हे राजन् ततः मह[illegible]तुलत भद्रकाल्यां चिक्षेप क्षिप्तवान् । तेजोभिः ज्वलत्, देदीप्यमानं अंबरात् आगच्छंतं रविबिंबमिव ततः तदनंतरं शूलं गृह[illegible]तरं महासुरः चिक्षुरः तत् शूलं चिक्षेप प्रक्षिप्तवान् जाज्वल्यते इति जाज्वल्यमानं जाज्वल्यते दीप्यते अंबरात् आकाशात् रवेर्बिंबं रविबिंबं रवेः सूर्यस्य बिंबं मंडलं ॥८॥ दृष्ट्वेति हे राजन् तदा देवी तत् शूलं आपतत् दृष्ट्वा शूलं अमुंचत् तदा तस्मिन्काले आपतत् आगच्छत् शूलं त्रिशूलं महासुरः सः तत् शूलं तेन शतधा नीतं स चिक्षुरः तेन शूलेन शतधा शतखंडेन नीतं प्रापितं ॥९॥ हते इति हे राजन् महावीर्ये महिषस्य च मूपतौ तस्मिन् हते सति त्रिदशार्दनः चामरः गजारूढः सन् आजगाम महत् वीर्यं यस्य सः महावीर्यः तस्मिन् महावीर्ये वीर्यं पराक्रमः महिष

चिक्षेप च ततस्तत्तु भद्रकाल्यां महासुरः ॥ जाज्वल्यमानं तेजोभी रविबिंबमिवांबरात् ॥८॥ दृष्ट्वा तदापतच्छूलं देवी शूलममुंचत ॥ तच्छूलं शतधा तेन नीतं स च महासुरः ॥९॥ हते तस्मिन्महावीर्ये महिषस्य चमूपतौ ॥ आजगाम गजारूढश्चामरस्त्रिदशार्दनः ॥१०॥ सोपि शक्तिं मुमोचाथ देव्यास्तामंबिका द्रुतं ॥ हुंकाराभिहतां भूमौ पातयामास निष्प्रभां ॥११॥ ॐ ॥ ॐ ॥

स महिषासुरस्य चम्वाः पतिः चमूपतिः तस्मिन् चमूपतौ चम्वाः सेनायाः पतिः स्वामी तस्मिन् चिक्षुरासुरे त्रिदशान् अर्दयतीति त्रिदशार्दनः त्रिदशान् देवान् अर्दयति मर्दयति पीडयति चामरः चामरासुरः गजे आरूढः गजारूढः गजहस्तिनि आरूढः स्थितः आजगाम आगच्छत् ॥१०॥ सोपीति हे राजन् सः अपि देव्याः शक्तिं मुमोच अथ अंबिका द्रुतं तां भूमौ पातयामास कथंभूतां तां हुंकाराभिहतां पुनः कथंभूतां तां निःप्रभां सः चामरासुरः अथ अथेत्यनंतरं शक्तिप्रक्षेपणानंतरं अंबिका द्रुतं शीघ्रं तां शक्तिं भूमौ पृथिव्यां हुंकारेण अभिहता हुंकाराभिहता तां हुंकाराभिहताम् अभिहता ताडिता निष्प्र[illegible]

स चेति किंच सः सिंहः महानादं उत्सृजन् सन् अमरारीणां शरीरेभ्यः असून् विचिन्वन्निव महांश्चासौ नादश्च म[illegible] तं महानादं नादः शब्दः उत्सृजन् सन् कुर्वन् सन् अमराणां अरयः अमरारयः तेषां अमरारीणां अमराणां दे[illegible] अरयः शत्रवः अमरारीणां दैत्यानां असून् प्राणान् कथंभूतः सिंहः धुतकेसरः धुताः केसरा येन सः धुतकेसरः धुताः कंपिताः केसरा ग्रीवा केशाः ॥६७॥ देव्येति हे राजन् तत्र देव्या किंच तैः गणैः असुरैः तथा युद्धं कृतं तथा यथा येषां देवाः दिवि पुष्पवृष्टिमुचः संतः तुतुषुः तत्र तस्मिन् संग्रामे देवा इति कर्तुः असुरैः दैत्यैः तथा तेन प्रकारेण यथा येन प्रकारेण तेषां देवीगणानां सुराणां दिवि स्वर्गे पुष्पाणां वृष्टिः पुष्पवृष्टिस्तां मुंचंतीति पुष्पवृष्टिमुचः मुंचंति वर्षंति तुतुषुः सं

स च सिंहो महानादमुत्सृजन्धुतकेसरः ॥ शरीरेभ्योऽमरारीणामसूनिव विचिन्वति ॥६७॥ देव्या गणैश्च तैस्तत्र कृतं युद्धं तथासुरैः ॥ यथैषां तुतुषुर्देवाः पुष्पवृष्टिमुचो दिवि ॥६८॥ इति मार्कंडेयपुराणे सावर्णिके मन्वंतरे देवीमाहात्म्ये महिषासुरसैन्यवधो ॥२॥ ऋषिरुवाच ॥ निहन्यमानं तत्सैन्यमवलोक्य महासुरः ॥ सेनानीश्चिक्षुरः कोपाद्ययौ योद्धुमथांबिकां ॥१॥

तुष्टाः बभूवुः प्रसन्नाः बभूवुः ॥६८॥ ॐ ॥ इति श्री नागोजी भट्ट संमत कृते सप्तशती व्याख्याने महिषासुरसैन्यवधो नाम द्वितीयोऽध्यायः ॥२॥ ॐ ॥ ऋषिरुवाच निहन्यमानमिति हे राजन् अथ महासुरः सेनानीः चिक्षुरः तत्सैन्यं निहन्यमानं अवलोक्य [illegible] अंबिकां योद्धुं ययौ अथ अथेत्यनंतरं सैन्यनाशानंतरं महांश्चासौ असुरश्च महासुरः असुरः दैत्यः सेनां नय[illegible] सेनानीः नयति प्राप्नोति सेनानीः सेनापतिः निहन्यते इति निहन्यमानं तत् निहन्यमानं अवलोक्य दृष्ट्वा कोप[illegible]क्रोधात् अंबिकां देवीं ययौ आजगाम ॥१॥ ॐ ॥ ॐ ॥ ७ ॥ ॐ ॥ ॐ ॥ ४६

दु० पातितैरिति हे राजन् तत्र सा वसुं[illegible]पातितैः रथनागाश्वैः किंच असुरैः अगम्या अभवत् तत्र कुत्र यत्र सः महारणः

टी० अभूत् वसुन्धरा पृथ्वी रथा[illegible]नागाश्च अश्वाश्च ते रथ नागाश्वाः तैः रथ नागाश्वैः नागाः हस्तिनः गंतुं

४८ योग्या गम्या न गम्या अगम्या महांश्चासौ रणश्च महारणः रणः संग्रामः ॥ ६४ ॥ शोणितेति हे राजन् त-

त्र सद्यः असुर सैन्यस्य मध्ये वारणासुर वाजिनां शोणितौघाः महानद्यः प्रसुस्रुवुः तत्र तस्मिंश्च संग्रामे सद्यः त-

त्क्षणं असुराणां सैन्यं असुरसैन्यं तस्य असुर सैन्यस्य असुराणां दैत्यानां वारणाश्च असुराश्च वाजिनश्च वार-

णासुर वाजिनः तेषां वारणासुर वाजिनां वारणाः हस्तिनः असुरा दैत्याः वाजिनः अश्वाः शोणितानां ओघौ

पातितै रथनागाश्वैरसुरैश्च वसुंधरा ॥ अगम्या साभवत्तत्र यत्राभूत्स-
महारणः ॥ ६४ ॥ शोणितौघा महानद्यः सद्यस्तत्र विसुस्रुवुः ॥ मध्ये-
चासुरसैन्यस्य वारणासुर वाजिनां ॥ ६५ ॥ क्षणेन तन्महासैन्य मसु-
राणां तथाम्बिका ॥ निन्ये क्षयं यथा वह्निस्तृण दारु महाचयं ॥ ६६ ॥

यासुताः शोणितौघाः शोणितानां रुधिराणां ओघः प्रवाहः महत्यश्च ताः नद्यश्च महानद्यः ॥ ६५ ॥ क्षणेनेति

हे राजन् तथा अम्बिका असुराणां तत् महासैन्यं क्षणेन क्षयंनिन्ये अम्बिका देवी असुराणां दैत्यानां महच्च त-

त् सैन्यंच महासैन्यं क्षणेन क्षण मात्रेण क्षयं नाशं निन्ये प्रापयतीक ः क इव तृण दारु महाचयं वह्निः

यथा तृणानिच दारूणिच तृण दारूणि महाचयः समूहः दारूणि काष्ठानि महा चयः समूहः वह्निः अग्निः य-

थाइव ॥ ६६ ॥ ० ॥ ❀ ❀ ॥ ० ॥ ० ॥ ❀ ❀ ॥ ० ॥ ० ॥ ❀ ❀ ॥ ० ॥ ❀ ॥

दु० तएवेति हे राजन् ते एव सद्यः शत सहस्रशः गणाः संभूताः जाताः तत्क्षणं संभूता जाताः ते परशुभिः भिंदिपालासिपट्टिशैः

टी० युयुधुः तेगणाः भिंदिपालासि पट्टिशैः भिंदिपालाश्च असयश्च पट्टिशाश्चते भिंदिपालासिपट्टिशाः तैः भिंदिपालासि पट्टि-

४५ शैः असयः खड्गाः पट्टिशाः खड्ग विशेषाः ॥ ५२ ॥ नाशयंति इतिहे राजन् कथंभूताः ते असुरगणा नाशयंतः असुराणां ग-

णाः तान् असुर गणान् असुराणां दैत्यानां गणाः समूहाः नाशयंतः नाशयंतीति नाशयंतः पुनः कथंभूतास्ते देवी शक्त्युप

बृंहिताः देव्याः शक्तिः देवी शक्तिः देवी शक्त्या उपबृंहिताः देवी शक्त्युप बृंहिताः शक्तिः प्रभावः उपबृंहिताः आप्यायिताः

वर्द्धिताः अस्मिन् युद्ध महोत्सवे केचित् गणाः पटहान् आवादयंत युद्ध एव महोत्सवः युद्ध महोत्सवः तस्मिन् युद्ध महोत्स-

तएव सद्यः संभूता गणाः शत सहस्रशः ॥ युयुधुस्ते परशुभि र्भिंदिपालासि
पट्टिशैः ॥ ५२ ॥ नाशयंतोसुरगणान् देवी शक्त्युप बृंहिताः ॥ आवादयंत प-
टहान् गणाः शंखांस्तथापरे ॥ ५३ ॥ मृदंगांश्च तथैवान्ये तस्मिन् युद्ध महो-
त्सवे ॥ ततो देवी त्रिशूलेन गदया शक्ति वृष्टिभिः ॥ ५४ ॥ खड्गादिभिश्च शत-
शो निजघान महासुरान् ॥ पातयामास चैवान्यान् घंटास्वन विमोहितान् ५५

वे पटहान् आनकान् अवादयंत वादितवंत इत्यर्थः तथा अपरेगणाः शंखान् अवादयंत अपरे अन्ये अवादयं तवादित-

वंत इत्यर्थः ॥ ५३ मृदंगांश्चेति तथैव अन्येच मृदंगान् अवादयंत हे राजन् ततः देवी त्रिशूलेन गदया शक्ति वृष्टिभिः

किंच खड्गादिभिः शतशः महासुरान् निजघान ततः तदनंतरं युद्ध महोत्सव प्रा स्थनं तत् देवी अंबिका शक्ति वृष्टिभिः शक्ती-

नां वृष्टयः शक्ति वृष्टयः ताभिः [illegible] वृष्टिभिः वृष्टयः वर्षाणि महासुरान् महा दैत्यान् किंच घंटा स्वन विमोहितान् अन्या-

न् एव असुरान् पातयामास [illegible]ताः स्वनः घंटास्वनः घंटा स्वनेन विमोहिताः घंटा स्वन विमोहिताः तान् घंटास्वन विमो- ४५

हितान् स्वनः शब्दः विमोहिता [illegible]ताः ॥ ५५ ॥ ❀ ❀ ॥ ❀ ❀ ॥ ❀ ❀ ॥ ❀ ❀ ॥ ❀ ❀ ॥

दु० टी० ५६

असुरानिति किंच अन्यान् असुरान् [illegible]सेन बध्वा भुवि आकर्षयत् भुवि पृथिव्यां तथा देव्या केचित् दैत्याः तीक्ष्णैः खड्गपा-
तैः द्विधा कृताः तीक्ष्णैः तीक्ष्ण[illegible] खड्गैः पाताः खड्गपाताः तैः खड्गपातैः पाताः प्रहाराः पतनानि द्विधा द्विभागी कृताः
॥ ५६ ॥ विपोथिता इति हे राजन् [illegible]परे गदया विपोथिताः संतः निपातेन भुवि शेरते अपरे अन्ये दैत्याः विपोथिताः
आमर्दिताः ताडिताः निपातेन निपतनेन भुवि पृथिव्यां वर्तमान सामीप्ये वर्तमानवद्वा इत्यनेन सूत्रेण भूतेलट् केचित्
दैत्याः मुसलेन भृशं हताः संतः रुधिरं वेमुः भृशं अत्यन्तं हताः ताडिताः ॥ ५७ ॥ केचिदिति हे राजन् केचित् दैत्याः शूलेन

असुरान् भुवि पाशेन बध्वा चान्यान् कर्षयत् ॥ केचिद् द्विधा कृतास्तीक्ष्णैः
खड्गपातैस्तथापरे ॥ ५६ ॥ विपोथिता निपातेन गदया भुवि शेरते ॥ वेमुश्च के
चिद्रुधिरं मुशलेन भृशं हताः ॥ ५७ ॥ केचिन्निपतिता भूमौ भिन्नाः शूलेन व-
क्षसि । निरंतराः शरौघेण कृताः केचिद्रणाजिरे ॥ ५८ ॥ सेनानुकारिणः प्रा-
णान्मुमुचुस्त्रिदशार्दनाः ॥ केषांचिद्बाहवश्छिन्नाः छिन्नग्रीवास्तथापरे ॥ ५९ ॥

वक्षसि भिन्नाः संतः भूमौ निपातिताः शूलेन त्रिशूलेन वक्षसि वक्षः स्थले भिन्नाः ताडिताः भूमौ पृथिव्यां निपातिताः निपे-
तुरित्यर्थः केचित् दैत्याः रणाजिरे शरौघेण निरंतराः कृताः रणाजिरे रणांगणे शराणां ओघः शरौघः तेन शरौघेण श-
राणां बाणानां ओघः समूहः निरन्तराः अंगुलिमात्रावकाश रहिताः कृता इत्यर्थः ॥ ५८ ॥ सेनेति हे राजन् त्रिदशार्दनाः से-
नानुकारिणः संतः प्राणान्मुमुचुः त्रिदशार्दनाः दैत्याः सेनानुकारिणः सेनाग्रिणः केषांचित् बाहवः छिन्नाः संतः प्रा-
णान्मुमुचुः केषांचित् दैत्यानां तथा अपरे छिन्नग्रीवाः संतः प्राणान्मुमुचुः अपरे अन्ये दैत्याः छिन्नाः ग्रीवाः येषां ते छिन्नग्री

दु० टी० ५७

शिरांसीति हे राजन् अन्येषां छिन्नानि शिरांसि भूमौ पेतुः अन्येषां दैत्यानां शिरांसि मस्तकानि भूमौ पृथिव्यां अन्ये मध्ये विदारिताः
संतः भूमौ पेतुः अन्ये दैत्याः मध्ये शरीर मध्यभागे विदारिताः संतः ताडिताः संतः खंड खंडी कृताः संतः भूमौ पृथिव्यां अप-
रे महासुरास्तु विछिन्न जंघाः संतः उर्व्यां पेतुः अपरे महासुराः दैत्याः विछिन्नाः जंघा येषां ते विछिन्न जंघाः उर्व्यां पृथिव्याम्
॥ ६० ॥ एकेति हे राजन् देव्या केचित् एक बाह्वक्षि चरणाः कृताः केचित् दैत्याः बाहुश्च अक्षिणी च चरणौ च प्राण्यंगत्वादेक
वद्भावः बाह्वक्षि चरणं एकं बाह्वक्षि चरणं येषां ते एक बाह्वक्षि चरणाः अक्षिणी नेत्रे चरणौ पादौ देव्या केचित् द्विधा कृताः के-
चित् दैत्या द्विधा द्विभागी कृताः किंच शिरसि छिन्ने अपि सति अन्ये पतिताः संतः पुनः उत्थिताः शिरसि मस्तके अन्ये दैत्याः

शिरांसि पेतुरन्येषामन्ये मध्ये विदारिताः ॥ विछिन्न जंघास्त्वपरे पेतुरुर्व्यां
महासुराः ॥ ६० ॥ एक बाह्वक्षि चरणाः केचिद्देव्या द्विधा कृताः ॥ छिन्नेपि चा
न्ये शिरसि पतिताः पुनरुत्थिताः ॥ ६१ ॥ कबंधा युयुधुर्देव्या गृहीत परमा-
युधाः ॥ ननृतुश्चापरे तत्र युद्धे तूर्यलयाश्रिताः ॥ ६२ ॥ कबंधाः छिन्नशिरसः
खड्गशक्त्यृष्टि पाणयः ॥ तिष्ठ तिष्ठेति भाषंतो देवीमन्ये महासुराः ॥ ६३ ॥ ०

॥ ६१ ॥ कबंधा इति हे राजन् कबंधाः गृहीत परमायुधाः संतः देव्या सह युयुधुः परसंचतत आयुधं च परमायुधं गृहीतं परमायुधं
यैस्ते गृहीत परमायुधाः परमं उत्कृष्टं आयुधं शस्त्रं अपरे छिन्न शिरसः कबंधाः तूर्य लयाश्रिताः संतः तत्र युद्धे ननृतुः अपरे अन्ये छि
न्नानि शिरांसि येषां ते छिन्न शिरसः तूर्याणां लयः तूर्यलयः तूर्यलयेन आश्रिताः तूर्यलयाश्रिताः तूर्याणां आनकानां लयः
वाद्यं आश्रिताः स्थिताः ॥ ६२ ॥ हे [illegible] अन्ये महासुराः खड्ग शक्त्यृष्टि पाणयः संतः देवीं तिष्ठ तिष्ठ इति भाषंतः अन्ये महासुराः
महादैत्याः खड्गश्च शक्तिश्च ऋष्टि[illegible] खड्ग शक्त्यृष्टयः खड्ग शक्त्यृष्टयः पाणिषु येषां ते खड्ग शक्त्यृष्टि पाणय ऋष्टिः उभयतो

दु० टी० ५८ ततइति हेराजन ततः देवी आ[illegible]खड्ग चर्मणा सार्द्धं तं पुरुषं सायकैः चिच्छेद ततः स महागजः एततू तदनंतरं पुरुष देहपात्त
नंतरं आशु एव शीघ्रमेव खड्ग[illegible]सिच ते खड्ग चर्माणी खड्ग चर्मणी समाहारः खड्ग चर्म तेन खड्ग चर्मणा समाहारः सुर समूहः
सार्द्धं सह सायकैः बाणैः ततः तदनंतरं पुरुष देह छेदना नंतरं सः महिषासुरः महांश्चासौ गजश्च महागजः गजः हस्ती ॥३०॥ करे
णेति हे राजन किंच सः तं महासिंहं करेणच कर्षं किंच चकर्ष किंच जगर्ज देवी तु कर्षतः करं खड्गेन निरकृंतत सः महिषासुरः
महांश्चासौ सिंहश्च महासिंहः तस्मिन् सिंह करेण शुंडादंडेन कर्षतीति कर्षन तस्य कर्षतः कर्षतः महागजस्य करं शुंडादंडं अ
तत इति हे राजन ततः महासुरः माहिषं वपुः आस्थितः सन्भूयः तथैव सचराचरं त्रैलोक्यं क्षोभयामास ततः तदनंतरं गजदेह

तत एवा शु पुरुषं देवी चिच्छेद सायकैः ॥ तं खड्ग चर्मणा सार्द्धं ततः सोभू
न्महा गजः ॥३०॥ करेणच महा सिंहं तंचकर्ष जगर्ज च ॥ कर्षतस्तु करं दे
वी खड्गेन निरकृंतत ॥३१॥ ततो महासुरो भूयो माहिषं वपुरास्थितः ॥ तथैव
क्षोभयामास त्रैलोक्यं सचराचरं ॥३२॥ ततः क्रुद्धा जगन्माता चंडिकापान
मुत्तमं ॥ पपौ पुनः पुन श्चैव जहा सारुण लोचना ॥३३॥ ❖ ॥ ❖ ॥३

त्यागानंतरं महासुरः महिषासुरः माहिषस्य इदं माहिषं ततमाहिषं वपुः शरीरं भूयः पुनः चराश्च अचराश्च ते चराचराः चराचरैः सह वर्तमानं
सचराचरं चराः जंगमा मनुष्यादयः अचराः वृक्ष पर्वतादयः सह वर्तमानं युक्तं त्रयो लोकाः त्रैलोक्यं तत त्रैलोक्यं ॥३२॥ ततइ
ति हे राजन ततः जगन्माता चण्डिका क्रुद्धा सती उत्तमं पानं पपौ किंच पुनः पुनः एव जहास कथंभूता चंडिका अरुण लोच
ना तदनंतरं त्रैलोक्य व्याकुलता वलोकना नंतरं जगतांमाता जगन्माता जगतां चतुर्दश लोकानां माता जननी माता श्रेष्ठपानं ५८
मद्यपानं अरुणे लोचने यस्याः सा अरुण लोचना अरुणे अरुण वर्णे लोचने नेत्रे ॥३३॥

दु० टी० ५९ ननर्देति हे राजन वलवीर्य मदोद्धतः अपि सः असुरः ननर्द किंच विषाणाभ्यां चंडिकां प्रति भूधरान चिक्षेप वलं च वीर्यं च वल
वीर्ये वल वीर्याभ्यां मदः वल वीर्य मदः वलवीर्य मदेन उद्धतः वलवीर्य मदोद्धतः वलं शरीरं वीर्यं उत्साहः उद्धतः उन्मत्तः असुरः म
हिषासुरः विषाणाभ्यां शृंगाभ्यां भूधरान पर्वतान ॥३४॥ साचेति हे राजन किंच सा तेन प्रहितान शरोत्करैः चूर्णयंती सतीतं
आकुलाक्षरं यथास्यात्तथा उवाच कथंभूतान मदोद्धूत मुखरागा सा चंडिका तेन महिषासुरेण प्रहितान क्षिप्तान तान भूधरा
न पर्वतान शराणां उत्कराः शरोत्कराः तैः शरोत्करैः शराणां वाणानां उत्कराः समूहाः चूर्णयंतीति चूर्णयंती तं महिषासुरं
आकुलानि अक्षराणि यस्यां क्रियायां तत आकुलाक्षरं आकुलानि अर्द्धोच्चारितानि अक्षराणि वर्णानि मदेन उद्धूतः मु

ननर्द चा सुरः सोपि वल वीर्य मदोद्धतः ॥ विषाणाभ्यांच चिक्षेप चंडिकां
प्रति भूधरान् ॥३४॥ साच तान्प्रहितांस्तेन चूर्णयंती शरोत्करैः ॥ उवाच तं मदोद्धू
तमुख रागा कुलाक्षरम् ॥३५॥ देव्युवाच ॥ गर्ज्ज गर्ज्ज क्षणं मूढ मधु यावत्पिवा
म्यहं ॥ मयात्वयि हतेत्रैव गर्ज्जिष्यंत्या शु देवताः ॥३६॥ ऋषिरुवाच ॥ एवमुक्त्वा
समुत्पत्य सारूढा तं महासुरं ॥ पादेना क्रम्य कंठेच शूलेनैन मताडयत् ॥ ३७॥

खेरागो यस्याः सा मदोद्धूत मुखरागा मदेन मद्येन उद्धूतः अतिशयेन जातः रागः आरुण्यं ॥३५॥ देव्युवाच हे मूढ अहं म
धु यावत पिवामि तावत् त्वं सखं गर्ज गर्ज मया त्वयि अत्र हते सति आशु एव देवता गर्जिष्यंति मधु मद्यं क्षणं क्षणमात्रं अस्म
िन संग्रामे हते सति प्रहारिते सति आशु एवं शीघ्रं आशु देवताः ॥३६॥ ऋषिरुवाच एवमिति हे राजन एवं उक्त्वा समुत्पत्य
[illegible] महासुरं आरूढा सा पादेन [illegible]क्रम्य कंठेच शूले नैन मताडयत एव अनेन प्रकारेण समुत्पत्य कूर्द्दनं कृत्वा तं महासुरं ५९
सा चंडिका पा[illegible]न [illegible] ॥३७॥

हे राजन् ततः तया पदा [illegible] पसः ततः निजमुखात् अर्द्धनिष्क्रांतः एव देव्याः वीर्येण अतिसंवृतः ततः तदनंतरं मूल त
इत्यानंतरं तया देव्या पदा पादे [illegible] क्रांतः हठधृतः सः महिषासुरः ततः तस्मात् इति ततः निजं च ततः मुखं च निजमुखं तस्मात्
निजमुखात् निजं स्वकीयं अर्द्धनिष्क्रान्तः अर्द्धनिष्क्रांतः एव निःसृतार्द्धकायः एव वीर्येण पराक्रमेण अतिशयेन संवृतः प्रति
बद्धो भूत् ॥ ३८ ॥ अर्द्धेति हे राजन् तया देव्या अर्द्धनिःक्रांतः एव युध्यमानः असौ महासुरः शिरः महासिना छित्वा निपातितः अ
र्द्धनिष्क्रांतः एव निःसृतार्द्धकायः एव युध्यते इति युध्यमानः महासुरः महिषासुरः महांश्चासौ असिश्च महासिः तेन महा
सिना असिः खड्गः शिरः मस्तकं निपातितः हतः ॥ ३९ ॥ तत इति हे राजन् ततः सर्वं तद्दैत्य सैन्यं हाहा कृतं सत् ननाश किंच सक

ततः सोपि पदाक्रांतस्तया निजमुखात्ततः ॥ अर्द्धनिष्क्रांत एवाति देव्या वीर्येण संवृतः ॥ ३८ ॥ अर्द्धनिष्क्रांत एवासौ युध्यमानो महासुरः ॥ तया महासिना देव्या शिरः छित्वा निपातितः ॥ ३९ ॥ ततो हाहाकृतं सर्वं दैत्यसैन्यं ननाश तत् ॥ प्रहर्षं च परं जग्मुः सकला देवतागणाः ॥ ४० ॥ तुष्टुवुस्तां सुरा देवीं सह दिव्यैर्महर्षिभिः जगुर्गंधर्वपतयो ननृतुश्चाप्सरोगणाः ॥ ४१ ॥

ला: देवतागणाः परं प्रहर्षं जग्मुः ततः तदनंतरं महिषासुरवधानंतरं सर्ववधावशिष्टं दैत्यानां सैन्यं ननाश पलायितं स
कलाः समस्ताः देवतानां गणाः देवगणाः गणाः समूहाः परं अत्यन्तं प्रहर्षं आनंदं जग्मुः प्रापुः ॥ ४० ॥ तुष्टुवुरिति हे रा
जन् सुराः तां देवीं दिव्यैर्महर्षिभिः सह तुष्टुवुः किंच गंधर्वपतयः जगुः किंच अप्सरोगणाः ननृतुः सुराः देवाः इन्द्रादयः
दिविभवाः दिव्याः तैः दिव्यैः दिविस्वर्गे महांतश्च ते ऋषयश्च महर्षयः तैः महर्षिभिः महांतः श्रेष्ठाः तुष्टुवुः स्तुतवंतः गंध
र्वाणां पतयः गंधर्वपतयः पतयः स्वामिनः अप्सरसांगणः अप्सरोगणाः अप्सरसां स्वर्वेश्यानां गणाः समूहाः ननृतुः नृत्य

हे राजन् घनाः धुतशृंगविभिन्नाः सन्तः खंडखंडं यथा स्यात्तथा ययुः किंच शतशः अचलाः श्वासानिलास्ताः सन्तः नभ
सः निपेतुः घनाः मेघाः धुते चलिते शृंगे च धुतशृंगे धुतशृंगाभ्यां विभिन्नाः धुतशृंगविभिन्नाः धुते कंपिते विभिन्नाः पृथग्भूताः
खंडस्य खंडाः यस्यां क्रियायां तत् खंडखंडं ययुः प्रापुः अचलाः पर्वताः श्वासस्य अनिलः श्वासानिलः श्वासानिलैः अस्ताः
श्वासानिलास्ताः अनिलः वायुः अस्ताः आकाशं प्रतिगताः नभसः आकाशात् ॥ २६ ॥ इतीति हे राजन् इति क्रोधसमा
ध्मातं आपतंतं महासुरं दृष्ट्वा सा चंडिका तदा तद्वधाय कोपं अकरोत् इति अनेन प्रकारेण क्रोधेन समाध्मातः क्रोध
समाध्मातः तं क्रोधसमाध्मातं समाध्मातः उद्दीपितः आपततीति आपतन् तं आपतंतं आपतति आगच्छति महासुरं

धुतशृंगविभिन्नाश्च खंडखंडं ययुर्घनाः ॥ श्वासानिलास्ताः शतशो निपेतुर्नभसोऽचलाः ॥ २६ ॥ इति क्रोधसमाध्मातमापतंतं महासुरं दृष्ट्वा सा चंडिका कोपं तद्वधाय तदाकरोत् ॥ २७ ॥ सा क्षिप्त्वा तस्य वै पाशं तं बबंध महासुरं ॥ तत्याज माहिषं रूपं सोपि बद्धो महामृधे ॥ २८ ॥ ततः सिंहोऽभवत्सद्यो यावत्तस्यांबिका शिरः ॥ छिनत्ति तावत्पुरुषः खड्गपाणिरदृश्यत ॥ २९ ॥

महिषासुरं सा चंडिका तदा तस्मिन् काले तस्य वधः तद्वधः तस्मै तद्वधाय तस्य महिषासुरस्य कोपं क्रोधं ॥ २७ ॥ सेति हे राजन् सा
तस्य उपरि पाशं क्षिप्त्वा तं महासुरं बबंध किंच बद्धोपि सः महामृधे माहिषं रूपं तत्याज तस्य महिषासुरस्य महासुरं महिषा
सुरं सः महिषासुरं महामृधे महासंग्रामे महिषस्य इदं माहिषं तत् माहिषं रूपं स्वरूपं ॥ २८ ॥ तत इति हे राजन् ततः सः सद्यः
सिंहः अभवत् अंबिका तस्य [illegible] यावत् छिनत्ति तावत् देव्या खड्गपाणिः पुरुषः अदृश्यत ततः तदनंतरं माहिषरूपत्यागानं
तरं सः महिषासुरः सद्यः तत्क्षणं [illegible] अंबिका देवी तस्य महिषासुरस्य शिरः मस्तकं खड्गः पाणौ यस्य सः खड्गपाणिः पाणौ हस्ते २९ ५३

दु॰ टी॰ ७

तेइति हे देवि अभ्युदयदा भवती येषां सदा प्रसन्ना भवति ते जन पदेषु संमताः भवंति तेषां धनानि भवंति तेषां यशांसि भवं-
ति ते किंच तेषां धर्मवर्गः नसीदति निभृतात्मज भृत्य दारास्तएव धन्याः भवंति अभ्युदयं ददातीति अभ्युदयदा अभ्युद
यं सर्वं मनोरथं येषां जनानां सदा सर्वदा ते जन्म जन पदेषु देशेषु संमताः, महाजनांगी कृताः तेषां जनानां यशांसि की-
र्त्तयः तेषां जनानां धर्मवर्गः धर्मघटितो वर्गः धर्मवर्गः धर्मार्थ काम मोक्ष रूपं नसीदति न नष्टो भवति आत्मजाश्च
भृत्याश्च दाराश्चते आत्मज भृत्य दाराः निभृताः आत्मज भृत्यदाराः येषां ते निभृता त्मज भृत्यदारा आत्मजाः पुत्राः
भृत्याः सेवकाः दाराः कलत्राणि निभृताः नितरां पोषिताः नितरां अत्यंतं ते एव जनाः धन्याः पुण्य बलेन प्रसिद्धाः ॥१४

तेसंमता जन पदेषु धनानि तेषां तेषां यशांसि नचसीदति धर्मवर्गः ॥ धन्या
स्तएव निभृतात्मज भृत्यदारा येषां सदाभ्युदयदा भवती प्रसन्ना ॥१४॥ ध-
र्म्याणि देवि सकलानि सदैव कर्मा ण्यत्यादृतः प्रतिदिनं सुकृती करोति ॥
स्वर्गंप्रयातिच ततो भवती प्रसादा ल्लोकत्रयेपि फलदा ननु देवितेन ॥१५॥

धर्म्याणीति हे देवि भवती प्रसादात् यः सुकृती अत्यादृतः सन् धर्म्याणि सकलानि कर्माणि प्रतिदिनं सदैव करोति
सः सुकृती ततः स्वर्गं प्रयाति हे देवितेन अस्माभिः त्वं लोक त्रये अपि ननु फलदा ननु फलदा फलदात्री इति ज्ञाय-
से भवत्याः प्रसादः भवती प्रसादः तस्मात् भवती प्रसादात् प्रसादः प्रसन्नता सुकृती प्राग्जन्मार्जित पुण्यवान् अत्या-
दृतः सन् अति प्रासक्तिवान् सन् धर्मो ह्यनु पेतानि धर्म्याणि अनुपेतानि युक्तानि सकलानि नित्य निमित्तिकादीनि दिनं दिनं
प्रतीति प्रतिदिनं सदैव सर्वदैव ततः तदनंतरं नित्य नैमित्तिक कर्मानुष्ठाना नंतरं प्रयाति प्राप्नोति तेन कारणेन लोकानां त्रयं
लोकत्रयं तस्मिन् लोकत्रये लोकानां स्वर्ग मर्त्य पातालानां त्रयं संभूतं ननु इति निश्चयेन फलं ददातीति फलदा फलं

दु॰ टी॰ ७१

दुर्गेति हे दुर्गे जनैः त्वं स्मृता सती अशेष जंतोः भीतिं हरसि स्वस्थैः त्वं स्मृता सती अतीव शुभां मतिं ददासि हे दारिद्र्यदुःख
भयहारिणि सर्वोपकार करणाय सदार्द्र चित्ता त्वत् अन्या काभवति न का पीत्यर्थः अशेष श्चासौ जंतुश्च अशेषजंतुः त-
स्य अशेष जंतोः अशेषः संपूर्णः जंतुः प्राणी भीतिर्भयं स्वस्थैः स्वस्थ चित्तैः जनैः अतीव अत्यंत मेव शुभां कल्याण-
कारिणीं मतिं बुद्धिं दरिद्रस्य भावः दारिद्र्यं दारिद्र्यात् दुःखं दारिद्र्य दुःखं दारिद्र्य दुःखात् भयं दारिद्र्यदुःखभयं दारिद्र्यदुः
खभयं हरतीति दारिद्र्य दुःखभय हारिणि तत्संबोधने हे दारिद्र्य दुःखभयहारिणि भावः धर्मः भयंत्रासः सर्वेषां उपकारः
सर्वोपकारः सर्वोपकारस्य करणं सर्वोपकार करणं तस्मै सर्वोपकार करणाय सर्वेषां जनानां सदा आर्द्रं चित्तं यस्याः सा

दुर्गेस्मृता हरसि भीतिमशेष जंतोः स्वस्थैः स्मृता मतिमतीव शुभां ददासि
दारिद्र्यदुःखभयहारिणि कात्वदन्या सर्वोपकार करणाय सदार्द्रचित्ता ॥
॥१६॥ एभिर्हतैर्जगदुपैति सुखं तथैते कुर्वंतु नामनरकाय चिराय पापं ॥
संग्राम मृत्युमधिगम्य दिवं प्रयांतु मत्वेति नूनमहितान्विनिहंसि देवि ॥१७॥

सदार्द्र चित्ता सदा सर्वदा आर्द्रं कोमलं चित्तं अंतः करणं यस्याः त्वत्तः ॥१६॥ एभिरिति हे देवि जगत् हतैः एभिः सुखं
उपैति एते नाम नरकाय चिराय पापं कुर्वंतु तथा संग्रामे मृत्युं अधिगम्य दिवं प्रयांतु इति मत्वा त्वं अहितान् नूनं वि-
निहंसि हतैः प्रहारितैः एभिः दैत्यैः उपैति प्राप्नोति उपैतीत्यर्थः एते दैत्याः नामइति अभ्युपगमे नरकाय चिरकाल प-
र्यंतं संग्रामे मृत्युः संग्राम मृत्युः मृत्युः मरणं अधिगम्य प्राप्य दिवं स्वर्गं प्रयांतु गच्छंतु इतिहेतु द्वयं मत्वा मनसि विचा-
र्य अहितान् शत्रून् दैत्यान् नूनं निश्चयेन विनिहंसि नाशयसि ॥१७॥

दु० टी० ७२ हे देवि भवती सर्वान सुरान् दृष्ट्वा एव भस्म किं न प्रकरोति त्वं अरिषु शस्त्रं यत् प्रहिणोषि तत्र रिपवः अपि शस्त्र पूताः संत ६८
लोकान् हियांतु इत्थं तेषु अपिते सति: अति साध्वी भवति सर्वे च ते असुराश्च सर्वासुराः तान् सर्वासुरान् सर्वे समस्ताः
असुराः दैत्याः दृष्ट्वैव दर्शन मात्रेणैव अरिषु शत्रुषु दैत्येषु प्रहिणोषि पातयसि रिपवः शत्रवः दैत्याः शस्त्रैः पूताः शस्त्र
पूताः पूताः पवित्राः लोकान् स्वर्गादि लोकान् हीति निश्चयेन प्रयांतु गच्छंतु इत्थं अनेन प्रकारेण तेषु रिपुषु दैत्येषु तेन
वसति: बुद्धिः अति साध्वी अति समीचीना ॥१८॥ खड्गेति हे देवि असुराणां दृशः खड्ग प्रभानिकर विस्फुरणैः तथोग्र शूल
ग्र कांति निवहेन विलयं यत्न आगता तत् एतत् तव अंशुमत् इंदु खंड योग्याननं विलोकयतां च सुधा आश्चर्यं भव-

दृष्ट्वैव किं न भवती प्रकरोति भस्म सर्वासुरान रिपुषु यत्प्रहिणोषि शस्त्रं ॥ लो
कान्प्रयांतु रिपवोपि हि शस्त्रपूता इत्थं मतिर्भवति तेष्वपि तेति साध्वी ॥ १९ ॥
खड्ग प्रभानिकर विस्फुरणैस्तथोग्रैः शूलाग्र कांति निवहेन दृशोसुराणां ॥
यन्नागता विलयमंशुमदिंदुखंड योग्याननं तव विलोकयतां तदेतत् ॥ २० ॥

ति असुराणां दैत्यानां दृशः दृष्टयः खड्गस्य प्रभाः खड्गप्रभाः खड्ग प्रभाणां निकरः खड्ग प्रभानिकरः खड्ग प्रभा निकरस्य विस्फु-
रणः खड्ग प्रभाकर विस्फुरणः तैः खड्ग प्रभाकर विस्फुरणैः प्रभाः कांतयः निकरः समूहः विस्फुरणः सर्वत्र प्रसरणः स्फु-
लिंगाः शूलस्य अग्रं शूलाग्रं उग्रं च तत् शूलाग्रं च उग्रशूलाग्रं उग्रशूलाग्रस्य कांतयः उग्रशूलाग्र कांतयः उग्रशूलाग्र
कांतीनां निवहः उग्रशूलाग्र कांति निवहः तेन उग्रशूलाग्र कांति निवहेन अग्रं अग्रभागः उग्रं भयानकं निवहः समू-
हः विलयं नाशं न आगताः न प्राप्ताः अंशवो विद्यते यस्मिन् तत् अंशुमत् अंशवः कांतयः इंदोः खंडः इंदुखंडः इंदु ७२
खंडस्य योग्यं इंदुखंडयोग्यं च तत् आननं च इंदु खंड योग्याननं तत् इंदु खंड योग्याननं इंदोः चन्द्रस्य खंड अर्द्धभाग:

दु० टी० ६६ दृष्ट्वेति हे देवि तव वक्त्रं दृष्ट्वा महिषः तु प्राणान् सद्यः यन्न मुमोच तत् अतीव चित्रं भवति कथंभूतं वक्त्रं कुपितं पुनः क-
थंभूतं भ्रुकुटी करालं पुनः कथंभूतं वक्त्रं उद्यच्छशांक सदृश च्छवि कुतः कस्मा द्धेतोः हि यतः हेतोः कैः कुपितां
तक दर्शनेन जीव्यते न जीव्यते इति भावः वक्त्रं मुखारविंदं महिषः महिषा सुरः सद्यः तत् क्षणं अतीव चित्रं अतीवा
श्चर्यं कुपितं क्रोधयुक्तं भ्रुवोः कुटी भ्रुकुटी भ्रुकुट्या करालं भ्रुकुटी करालं तत् भ्रुकुटी करालं कुटी वक्रता करालं भीष-
णं भयंकरं उद्यतीति उद्यन् उद्यं श्चासौ शशांकश्च उद्यच्छशांकः उद्यच्छशांकस्य सदृशी छवि र्यस्य तत् उद्य-
च्छशांक सदृश च्छवि शशांकः चंद्रः सदृशी तुल्या छविः कांतिः कुपित श्चासौ अंतकश्च कुपितान्तकः कुपितां

दृष्ट्वातु देवि कुपितं भ्रुकुटीकरालमुद्यच्छशांकसदृशच्छवि यन्न सद्यः ॥ प्रा-
णान्मुमोच महिषस्तदतीव चित्रं कैर्जीव्यते हि कुपितांतक दर्शनेन ॥ २२ ॥
देवि प्रसीद परमा भवती भवाय सद्यो विनाशयसि कोपवती कुलानि ॥ वि
ज्ञातमेतदधुनैव यदस्तमेतन्नीतं वलं सुविपुलं महिषासुरस्य ॥ २३ ॥ ॐ ॥

तकस्य दर्शनं कुपितांतक दर्शनं तेन कुपितांतकदर्शनेन कुपितः क्रोधायमानः अंतकः कालः ॥ २२ ॥ देवीति हे दे-
वि त्वं प्रसीद परमा भवती त्वं कोपवती सद्यः भवाय कुलानि विनाशयसि त्वया महिषा सुरस्य सुविपुलं एतत् वलं अ-
स्तं यत् नीतं अस्माभिः अधुनैव एतत् विज्ञातं प्रसीद प्रसन्ना भव परामायस्याः सा परमा परा सा नुग्रहा सा बुद्धिः
कोपोस्ति यस्याः सा कोपवती कोपः क्रोधः सद्यः तत्क्षणं भवाय संसाराय कुलानि अमर कुलानि सु विपुलं महत्त ६६
वलं सैन्यं अस्तं नाशं नीतं प्रापितं ॥ २३ ॥

शब्देति हे देवि त्वं शब्दात्मिका भवसि त्वं सु विमलर्ग्यजुषां किंच उद्गीथ रम्य पद पाठवतां साम्नां निधानं भवसि या
देवी भगवती त्रयी भवती सा त्वं भवसि या वार्ता भव भावनाय भवति सा वार्ता त्वं भवसि त्वं सर्व जगतां परमार्ति हंत्री भवसि
शब्दः आत्मा यस्याः सा शब्दात्मिका आत्मा स्वरूपं शब्दात्मिका शब्दब्रह्म रूपा ऋक् च यजूंषि च तानि ऋग्यजूंषि
सुविमलानि च तानि ऋग्यजूंषि च सुविमलर्ग्यजूंषि तेषां सुविमलर्ग्यजुषां ऋक् ऋग्वेद शाखाः यजुः यजुर्वेद
शाखाः सुविमलानि अपूर्वत्वेन दोष रहितानि पदानां पाठः पदपाठः उद्गीथेन रम्यः उद्गीथरम्यः उद्गीथरम्य श्चासौ पदपाठश्च
उद्गीथरम्य पदपाठः उद्गीथ रम्य पद पाठो विद्यते येषां ते उद्गीथ रम्य पद पाठवंतः तेषां उद्गीथरम्य पद पाठवताम्

शब्दात्मिका सुविमलर्ग्यजुषां निधानमुद्गीथरम्यपदपाठवतां च साम्नां
देवी त्रयी भगवती भवभावनाय वार्ता च सर्वजगतां परमार्तिहंत्री ॥ ९ ॥

उद्गीथेन भक्ति विशेषेण रम्या मनोहरा : साम्नाम् सामवेद शाखानाम् देवी द्योतन शीला भगवती भगवद्विषया
त्रयी वेदत्रयी सा वेदत्रयी वार्ता कृषिः वाणिज्य पशुपालन रूपा भवतीति भावः भवानां भावनं भवभावनं तस्मै भवभा-
वनाय भवानां प्राणिनां भावनं जीवनं सर्वाणि च तानि जगंति च सर्व जगंति तेषां सर्व जगताम् सर्वाणि समस्तानि जगं-
ति चतुर्दश लोकाः परमा चासौ आर्तिश्च परमार्तिः परमार्तेः हंत्री परमार्ति हंत्री परमा अतिशयिता उत्कृष्टा आर्तिः
पीडा हंत्री नाश कर्त्री ॥ ९ ॥ ॐ ॥ ऽऽ ॥ ऽऽ ॥ ॐ ॥ ऽऽ ॐ ऽऽ ॥ ॐ ॥ ऽऽ ॥ ऽऽ ॐ ऽऽ ॥ ॐ

दु० टी० ९७ मेधासीति हे देवि विदिताखिल शास्त्र सारा या मेधा भवति सा मेधा भवति सा मेधा त्वमेवासि त्वं दुर्गा असि असंगा दु-
र्गभव सागर नौः असि कैटभारि हृदयैक कृताधिवासा या श्रीः भवति सा श्रीः त्वमेवासि शशि मौलि कृत प्रति-
ष्ठा या गौरी भवति सा गौरी त्वमेवासि अखिलानि च तानि शास्त्राणि अखिल शास्त्राणि अखिल शास्त्राणां
सारः अखिल शास्त्रं सारः विदितः अखिलशास्त्रसारो यया सा विदिताखिल शास्त्र सारा अखिलानि समस्तानि शास्त्राणि
व्याकरणादीनि सारः तत्वं विदितः ज्ञातः मेधा सरस्वती सा मेधा त्वमेवासि दुर्गा दुर्जया दुःखेन जेतुं अशक्या दुर्ज-
या नास्ति संगो यस्याः सा असंगा संगः संबन्धः भव एव सागरः भव सागरः दुर्गश्चासौ भव सागरश्च दुर्गभवसा-

मेधासि देवि विदिताखिलशास्त्रसारा दुर्गासि दुर्गभवसागरनौरसंगा
श्रीः कैटभारिहृदयैककृताधिवासा गौरी त्वमेव शशिमौलिकृतप्रतिष्ठा १०

गरः दुर्गभवसागरस्य नौः दुर्गभवसागर नौः भव एव संसार एव सागरः समुद्रः दुर्गः गहना नौः ज्ञान द्वारा कैट
भारेः हृदयं कैटभारि हृदयं कैटभारि हृदये एकः कृतः अधिवासो यया सा कैटभारि हृदयैक कृताधि वासा
कैटभारेः विष्णोः अधिवासः निवासः श्रीः लक्ष्मीः शशी । मौलौ यस्य सः शशि मौलिः शशिमौलौ कृ-
ता प्रतिष्ठा यया सा शशि मौलि कृत प्रतिष्ठा शशी चंद्रः मौलिः मस्तकं शशि मौलौ शिवे प्रतिष्ठा स्थितिः ९७
गौरी पार्वती ॥ १० ॥ ॐ ऽऽ ॐ ऽऽ ॐ ऽऽ ॐ ऽऽ ॐ ऽऽ ॐ ऽऽ ॐ ऽऽ ॐ ऽऽ ॐ ऽऽ ॐ ऽऽ ॐ ऽऽ

दु० ईषदिति हे देवि तव वक्त्रं विलोक्यापि आत्तरुषा महिषासुरेण सहसा तथायत् प्रहृतं तत् अत्यद्भुतं भवति कथं भू-
टी० तं वक्त्रं ईषत्सहासं पुनः कथं भूतं वक्त्रं अमलं पुनः कथं भूतं वक्त्रं परिपूर्णचन्द्रविंबानुकारि पुनः कथं भूतं वक्त्रं क-
६८ नकोत्तमकांति पुनः कथंभूतं कांतं वक्त्रं मुखं विलोक्यापि दृष्ट्वापि आत्तः आरूढः रुट् यस्य सः आत्तरुट् तेन आ-
त्तरुषा आत्तः प्राप्तः रुट् क्रोधः सहसादर्शन समकालमेव तथा अति निष्ठुरं अत्यद्भुतं अत्याश्चर्यं ईषद्धासेन सहवर्त्त-

ईषत्सहासममलं परिपूर्णचन्द्रविम्बानुकारि कनकोत्तमकांति कांतं
अत्यद्भुतं प्रहृतमात्तरुषा तथापि वक्त्रं विलोक्य सहसा महिषासुरेण ॥११॥

मानं ईषत्सहा संतत् ईषद्धासेन स्वल्पहासि सह वर्त्तमानं युक्तं अमलं स्वच्छं परिपूर्णश्चासौ चंद्रश्च परिपूर्णचं-
द्रः परिपूर्णचंद्रस्य विंबः परिपूर्णचंद्रविंबः परिपूर्णचंद्रविम्बं अनुकरोतीति परिपूर्णचंद्रविम्बानुकारि परिपूर्णचंद्रवत् परि-
पूर्णचंद्रविम्बानुकारि विंब: मंडलं अनुकरोतीति सदृशीकरोति कनकेषु उत्तमः कनकोत्तमः कनकोत्तमस्य कां-
तिरिव कांतिर्यस्य तत् कनकोत्तमकांति कनकेषु सुवर्णेषु उत्तमः श्रेष्ठः कांतं मनोहरं ॥११॥

दु० हे देवि अविचिंत्यमहाव्रता या विद्या मुक्तिहेतुर्भवति भगवती परमा सा विद्या त्वमेवासि हि अस्तसमस्तदोषैः मुनि-
टी० तेंद्रियतत्त्वसारैः मोक्षार्थिभिः मुनिभिः त्वं अभ्यस्यसे महत्त्व तत्तत् व्रतं च महाव्रतं विशेषेण चिंतितुं योग्यं विचिन्त्यम्
६५ न विचिन्त्यं अविचिंत्यं महाव्रतं यस्याः सा अविचिन्त्यमहाव्रता अविचिंत्यं अतुर्क्यत्व चित चिंताया अविष-
यं महाव्रतं अहिंसा सत्यास्तेय ब्रह्मचर्या परिग्रह रूपं योगशास्त्रप्रसिद्धं साधनं भगवती भगवद्विषया परमा उ-
त्कृष्टा विद्या तद्विषयावरणभंजिका ब्रह्मज्ञानरूपा हि यतः समस्ताश्च ते दोषाश्च समस्तदोषाः अस्ताः समस्त

या मुक्तिहेतुरविचिंत्यमहाव्रता च अभ्यस्यसे सुनियतेंद्रियतत्त्वसारैः ॥
मोक्षार्थिभिर्मुनिभिरस्तसमस्तदोषैर्विद्यासि सा भगवती परमा हि देवि ॥८॥

दोषाः येषां ते अस्तसमस्तदोषाः तैः अस्तसमस्तदोषैः समस्ताः सम्पूर्णाः दोषाः रागाद्यः अस्ताः नष्टाः तत्त्वं
सारो येषां ते तत्त्वसाराः सुनियतानि इन्द्रियाणि यैः ते सुनियतेंद्रियाः सुनियतेन्द्रियाः अत एव साराः ते सुनिय-
तेन्द्रियतत्त्वसाराः तैः सुनियतेन्द्रियतत्त्वसारैः तत्त्वं ब्रह्मैव सुनियतानि वशीकृतानि इन्द्रियाणि मनश्चक्षुरा-
दीनि मोक्ष एव अर्थः मोक्षार्थः मोक्षोर्थोस्ति येषां ते मोक्षार्थिनः तैः मोक्षार्थिभिः अर्थः प्रयोजनं मननशीलाः ६५
मुनयः तैः मुनिभिः ॥८॥ ॥ ॥ ८ ॥ ॥ ८ ॥ ॥ ८ ॥ ॥

स्तुतेति सुरैः पूर्वं स्तुता तथा सुरेंद्रेण अभीष्ट संश्रयात् दिनेषु सेविता शुभहेतुः सा ईश्वरी नः शुभानि भद्राणि करोतु किंच आप
दः अभिहंतु सुरैः ब्रह्मादिभिः सुराणां इंद्रः सुरेंद्रः तेन सुरेंद्रेण सुराणां देवानां इंद्रः श्रेष्ठः अभीष्टस्य संश्रयः अभीष्ट संश्रयः
तस्मात् अभीष्ट संश्रयात संश्रयः प्राप्तिः दिनेषु प्रतिदिनं आराधिता शुभस्य हेतुः शुभ हेतुः हेतुः करणम् ईश्वरी देवी नः
अस्माकं शुभानि भद्राणि अति श्यानि शुभानि आपदः आपत्तिः अभि हंतु नाशयतु ॥३५॥ येति उद्धत दैत्यतापितैः सु-
रैः अस्माभिः सां प्रतं या ईशान मस्यते किंच भक्ति विनम्र मूर्तिभिः अस्माभिः या च स्मृता सती तत्क्षणं सा चनः सर्वापदः
हंति उद्धताः च ते दैत्या श्च उद्धत दैत्याः उद्धत दैत्यैः तापिताः तैः उद्धत दैत्य तापितैः उद्धताः मदांधाः दैत्याः असुराः तापिताः

स्तुता सुरैः पूर्वमभीष्टसंश्रया त्तथा सुरेंद्रेण दिनेषु सेविता ॥ करोतु सा नः शु-
भहेतुरीश्वरी शुभानि भद्राण्यभिहंतु चापदः ॥ ३५ ॥ या सांप्रतं चोद्धतदैत्यता-
पितै रस्माभिरीशा च सुरैर्नमस्यते ॥ या च स्मृता तत्क्षणमेव हंति नः सर्वापदो भक्ति
विनम्रमूर्तिभिः ॥ ३६ ॥ ऋषिरुवाच ॥ एवं स्तवादि युक्तानां देवानां तत्र पार्व-
ती ॥ स्नातुमभ्याययौ तोये जान्हव्या नृप नन्दन ॥ ३७ ॥ ॐ ॥ ॐ ॥ ३७ ॥

पीडिताः सुरैः देवैः सांप्रतं वर्तमान काले ईशा देवी भक्त्या विनम्रा मूर्तिर्येषां ते भक्ति विनम्र मूर्तयः तैः भक्ति विनम्र मूर्तिभिः
नम्रा नम्रीभूता मूर्तिः तनुः या देवी स्मृता ध्याता आपदश्च सर्वापदः ता सर्वाः पदः सर्वाः समस्ताः आपदः आपत्तयः हंति
नाशयति ॥ ३६ ॥ ऋषिरुवाच एवमिति हे राजन् हे नृपनंदन तत्र पार्वती जान्हव्याः तोये स्नातुं एवं स्तवादि युक्तानां दे
वानां अभि आययौ यत्र देव सन्निहिते देशे जान्हव्याः गंगायास्तोये जले स्नातुमेव एवं अनेन प्रकारेण स्तवादिभिः यु- ८६
क्ताः स्तवादि युक्ताः तेषां स्तवादि युक्तानां स्तवादि युक्तानां स्तोत्र स्तवन युक्तानां देवानां इंद्रादीनां अभिमुखं ॥ ३७ ॥

सेति हे राजन सा सुभ्रूः तान् सुरान् इति अब्रवीत् ब्रवीति किं हे सुराः भवद्भिः अत्र कास्तूयते किंच अस्याः शरीरकोशतः
समुद्भूता शिवा अब्रवीत् शोभने भ्रुवौ यस्याः सा सुभ्रूः शोभने मनोहरे सुभ्रूः देवी तान् प्रसिद्धान् सुरान् इंद्रादीन् अत्र
अस्मिन् स्थले अस्याः पार्वत्याः शरीर एव कोशः शरीर कोशः शरीर कोशादिति शरीर कोशतः शरीर एव देह एव
कोशः गृहं समुद्भूता सत्त्व प्रधानांशेन प्रादुर्भूता शिवा देवी ॥ ३८ ॥ किम ब्रवीत्तदाह स्तोत्र मिति समेतैः समरे निशु-
भेन पराजितैः शुंभ दैत्य निराकृतैः देवैः मम एतत् स्तोत्रं क्रियते समेतैः मिलितैः समरे रणे शुंभ दैत्येन निराकृताः शुंभ दैत्य
निराकृताः तैः शुंभ दैत्य निराकृतैः निराकृताः स्वर्गात् निःसारिताः देवैः इंद्रादिभिः स्तोत्रं स्तुतिः ॥ ३९ ॥ शरीरेति अंबिका

साब्रवीत्तान सुरान सुभ्रूर्भवद्भिः स्तूयतेत्र का ॥ शरीर कोशतश्चास्याः समुद्भू-
ताब्रवीच्छिवा ॥ ३८ ॥ स्तोत्रं ममैतत क्रियते शुंभदैत्य निराकृतैः ॥ देवैः समेतैः सम
रे निशुंभेन पराजितैः ॥ ३९ ॥ शरीर कोशाद्यत्तस्याः पार्वत्या निःसृतांबिका ॥ २
कौशिकीति समस्तेषु ततो लोकेषु गीयते ॥ ४० ॥ तस्यां विनिर्गतायां तु कृष्णा
भूत्सापि पार्वती ॥ कालिकेति समाख्याता हिमाचल कृताश्रया ॥ ४१ ॥ ॐ ॥ ३

तस्याः पार्वत्याः शरीर कोशात यत निस्सृता ततः जनैः समस्तेषु लोकेषु कौशिकी इति गीयते अंबिका देवी शरीर एव कोशः
शरीर कोशः तस्मात शरीर कोशात शरीर एव देहः एव कोशः वदहं ततः तत कौशिकी कोशात् जाता कौशिकी गीयते कथ्य-
ते ४० तस्यामिति तस्यां तु विनिर्गतायां सत्यां सा पार्वती अपि कृष्णा अभूत जनैः हिमाचल कृताश्रया अंबिका का-
लिका इति समाख्याता तस्यां अंबिकायां विनिर्गतायां निःसृतायां कृष्णा कृष्णवर्णा हिमाचले कृतः आश्रयो यया सा हि- ८७
माचल कृताश्रया आश्रयः स्थानं समाख्याता कथिता ॥ ४१ ॥

दु० टी० ८८ १८

तत इति ततः शुंभ निशुंभयोः भृत्यौ चंडः किंच मुंडः सुमनोहरं परं रूपं बिभ्राणां अंबिकां ददर्श ततः तदनंतरं हिमाचले कृताश्रया नंतरं शुंभश्च निशुंभश्च तौ शुंभ निशुंभौ तयोः शुंभ निशुंभयोः भृत्यौ सेवकौ सुमनोहरं अतिरमणीयं उत्कृष्टं रूपं स्वरूपं बिभ्राणां धारयंतीं अंबिकां देवीं ॥४२॥ ताभ्यामिति किंच ताभ्यां शुंभाय इति आख्याता इतीति किं हे महाराज हिमाचलं भासयंती अतीव सुमनोहरा रमणीया कापि आस्ते ताभ्यां चंडमुंडाभ्यां आख्याता कथिता भासयंती प्रकाशयंती अतीव अत्यंतमेव सुमनोहरा रमणीया कापि अनिर्वाच्या ॥४३॥ नैवेति हे असुरेश्वर केन चित् कुत्रचित् उत्तमं ताहक्‌रूपं नैव दृष्टं अतस्त्वया देवी देवी अपिका भवति इति ज्ञायतां किंच गृह्यतां असुराणां ईश्वरः असुरेश्वरः तत्संबोधने हे असुरेश्वर

ततोंबिकां परं रूपं बिभ्राणां सुमनोहरं ॥ ददर्श चंडो मुंडश्च भृत्यौ शुंभ निशुंभयोः ॥४२॥ ताभ्यां शुंभाय चाख्याता अतीव सुमनोहरा ॥ काप्यास्ते स्त्री महाराज भासयंती हिमाचलं ॥४३॥ नैवताहक्‌ क्वचिद्रूपं दृष्टं केनचिदुत्तमं ॥ ज्ञायतां काप्यसौ देवी गृह्यतां चासुरेश्वर ॥४४॥ स्त्रीरत्नमतिचार्वंगी द्योतयंती दिशस्त्विषा ॥ सा तु तिष्ठति दैत्येंद्र तां भवान् द्रष्टुमर्हति ॥४५॥ ॐ॥

असुराणां दैत्यानां ईश्वरः स्वामी उत्तमं श्रेष्ठं रूपं स्वरूपं अतः अस्मात् कारणात् ज्ञायतां मनुष्य द्वारा तत्स्वरूपं विचार्यतां गृह्यतां अंगीक्रियतां ॥४४॥ ननु किमर्थं अंगीकार स्तस्या इत्यत आह स्त्रीरत्नमिति असुरेश्वर तत्र अतिचार्वंगी त्विषा दिशः द्योतयंती सा स्त्रीरत्नं तु तिष्ठति हे दैत्येंद्र भवान् तां द्रष्टुं अर्हति तत्र तस्मिन् हिमाद्रौ अति चारु अंगं यस्याः सा अति चार्वंगी अति चारु अति मनोहरं अंगं शरीरं त्विषा दीप्त्या द्योतयंती प्रकाशयंती स्त्रीरत्नं उत्तमं स्त्री त्यर्थः दैत्यानां इंद्रः दैत्येंद्रः तत्संबोधने हे दैत्येंद्र इंद्रः स्वामी तां द्रष्टुं अर्हति योग्यो भवति ॥४५॥

दु० टी० ८५

येति या देवी सर्वभूतेषु मातृरूपेण संस्थिता भवति तस्यै नमः० नमः० मातृरूपेण पालयित्री रूपेण यद्वा मातृका धिष्ठात्री देवता रूपेण ॥३१॥ या देवी सर्वभूतेषु भ्रांतिरूपेण संस्थिता भवति तस्यै नमः ३ नमः नमः भ्रांति रूपेण अतद् इति तद्भ्रमस्य रूपेण ॥३२॥ इंद्रियेति या अखिलेषु भूतेषु अंतर्यामि विधौ या स्थिता भवति इंद्रियाणां किंच भूतानां अधिष्ठात्री भवति तस्यै व्याप्ति देव्यै सततं नमः नमः अखिलेषु समस्तेषु जनेषु इंद्रियाणां ज्ञान करणानां भूतानां ज्ञान विषयाणां सूक्ष्म स्थूलानां अधिष्ठात्री प्रवर्त्तिका निवर्तिका च व्याप्ति देव्यै व्याप्ति युक्त देव्यै व्याप्ति कार्यै इत्यर्थः ॥३३॥ चिति रूपेति या चिति रूपेण कृत्स्नं

यादेवी सर्वभूतेषु मातृरूपेण संस्थिता ॥ नमस्तस्यै० ३ ॥३१॥ या देवी सर्वभूतेषु भ्रांतिरूपेण संस्थिता ॥ नमस्तस्यै० ३ ॥३२॥ इंद्रियाणामधिष्ठात्री भूतानां चाखिलेषु या ॥ भूतेषु सततं तस्यै व्याप्ति देव्यै नमोनमः ॥३३॥ चितिरूपेण या कृत्स्नमेतद्व्याप्य स्थिता जगत् ॥ नमस्तस्यै० ३ ॥३४॥ ॐ ॥

एतत् जगत् व्याप्य स्थिता भवति तस्यै नमः तस्यै नमः नमः नमः चितिः चयनं दृष्टिः तद्रूपेण ॥३४॥ नम इत्यनेन नमोंतमंत्रं स्वरूपत्वं इदमुपलक्षणं सर्व मंत्र स्वरूपत्व स्येति कश्चित् अत्रायं संग्रहः विष्णुमाया चेतना च बुद्धि र्निद्रा क्षुधा तथा छाया शक्तिश्च तृष्णा च क्षांति र्जाती ततः परं ॥१॥ लज्जा शांति स्तथा श्रद्धा कांति र्लक्ष्मी स्ततः परा वृत्ति स्मृति र्दया चैव तुष्टिर्मातृ ततः परं भ्रांति र्व्याप्ति श्चिति श्चैव त्रयोविंशति मात्रिकाः इतोधिक मनार्षं स्यात्तंत्रेकात्यायने स्फुटं ॥३४॥ ८५

अतीति वयंनताः स्मः अतिसौम्यातिरौद्रायै तस्यै नमः कुर्मः नताः यद्वा अतिसौम्या चासौ अतिरौद्रा च अतिसौम्याति
रौद्रा तस्यै अतिसौम्यातिरौद्रायै विद्यात्वेन संसारतापशांतिकत्वादति सौम्या अविद्यारूपेण संसारहेतुत्वादतिरौद्रा नमस्ये
देव्यै जगत्प्रतिष्ठायै नमः देव्यै नमः कृत्यै नमः जगत्प्रतिष्ठायै जगदुपादानकारणरूपायै यद्वा जगदाधारायै देव्यै देवश
क्त्यै कृत्यै क्रियायै ॥२१॥ येति या देवी सर्वभूतेषु विष्णुमाया इति शब्दिता भवति तस्यै नमः तस्यैनमः तस्यै नमः नमः
नमः सर्वे च ते भूताश्च सर्वभूताः तेषु सर्वभूतेषु समस्ताः भूताः प्राणिनः विष्णोः माया विष्णुमाया विष्णोः हरेः मा
या मूलविद्या शब्दिता सर्वागमेषु प्रतिपादिता तस्यै देव्यै नमः नमस्कारोस्तु तस्यै देव्यै नमः नमस्कारोस्तु तस्यै देव्यै न-

अतिसौम्यातिरौद्रायै नतास्तस्यै नमोनमः ॥ नमोजगत्प्रतिष्ठायै देव्यै कृ-
त्यै नमोनमः ॥२१॥ या देवी सर्वभूतेषु विष्णुमायेति शब्दिता ॥ नमस्तस्यै नम
स्तस्यै नमस्तस्यैनमोनमः ॥२२॥ यादेवी सर्वभूतेषु चेतनेत्यभिधीयते ॥ नमस्त
स्यै ३ ॥२३॥ यादेवी सर्वभूतेषु बुद्धिरूपेण संस्थिता ॥ नमस्तस्यै०३ ॥ २४॥
यादेवी सर्वभूतेषु क्षुधा रूपेण संस्थिता ॥ नमस्तस्यै ०३ ॥ २५॥ ॐ ॥ऽ॥

मः नमः नमस्कारोस्तु नमस्कारोस्तु नमस्कारोस्तु ॥२२॥ येति जनैः या देवी सर्वभूतेषु चेतना इति अभिधीयते तस्यैनमः
तस्यैनमः तस्यैनमः नमः नमः चेतना निर्विकल्पक तया चिच्छक्तिः ॥२३॥ येति या देवी सर्वभूतेषु बुद्धिरूपेण संस्थिता
भवति तस्यै नमः नमः नमः बुद्धिरूपेण सविकल्पक ज्ञानरूपेण ॥२४॥ येति या देवी सर्वभूतेषु निद्रारूपेण संस्थिता भवति
तस्यैनमः ३ नमः निद्रारूपेण सुषुप्त्यवस्था रूपेण यद्वा स्वप्नावस्था रूपेण ॥२५॥ येति या देवी सर्वभूतेषु क्षुधा रूपेण संस्थि
भवति तस्यै नमः ३ नमः नमः क्षुधा रूपेण अभिजिहीर्षा रूपेण ॥२६॥

येति या देवी सर्वभूतेषु छाया रूपेण संस्थिता भवति तस्यैनमः तस्यै नमः नमः नमः छाया रूपेण संस्थिता संसार तपो भाव
यद्वा वर्ण प्रसाद रूपेण ॥२७॥ येति या देवी सर्वभूतेषु शक्ति रूपेण संस्थिता भवति तस्यै नमः ३ नमः नमः शक्ति रूपेण का
न माभव्यसा रूपेण ॥२८॥ येति या देवी सर्वभूतेषु तृष्णा रूपेण संस्थिता भवति तस्यै नमः ३ नमः नमः तृष्णा रूपेण अनालीय
स्वीकारेच्छा रूपेण ॥२९॥ येति या देवी सर्वभूतेषु क्षांति रूपेण संस्थिता भवति तस्यै नमस्तस्यै नमस्तस्यै नमः नमः क्षांतिरू

यादेवी सर्वभूतेषु छाया रूपेण संस्थिता ॥ नमस्तस्यै०३ ॥२७॥ यादेवी सर्वभू-
तेषु शक्तिरूपेण संस्थिता नमस्तस्यै०३ ॥२८॥ यादेवी सर्वभूतेषु तृष्णारू-
पेण संस्थिता ॥ नमस्तस्यै०३ ॥२९॥ यादेवी सर्वभूतेषु क्षांतिरूपेण संस्थिता ॥
नमस्तस्यै०३ ॥३०॥ यादेवी सर्वभूतेषु जातिरूपेण संस्थिता ॥ नमस्तस्यै०३ ॥३१॥
यादेवी सर्वभूतेषु लज्जारूपेण संस्थिता ॥ नमस्तस्यै०३ ॥३२॥ या देवी सर्व
भूतेषु शांति रूपेण संस्थिता ॥ नमस्तस्यै ०३ ॥३३॥ ॐ ॥ऽऽ॥

पेण सामर्थ्ये सत्यपि अपकारिणि अपकारचिकीर्षा रूपेण ॥३०॥ येति या देवी सर्वभूतेषु जाति रूपेण संस्थिता भवति तस्यैनमः
नमः २ जाति रूपेण गोत्वादि रूपेण ॥३१॥ येति या देवी सर्वभूतेषु लज्जा रूपेण संस्थिता भवति तस्यैनमः ३ नमः २ लज्जा रूपेण
स्वकार्य विषयाऽन्य ज्ञानमय रूपेण ॥३२॥ येति या देवी सर्वभूतेषु शांति रूपेण संस्थिता भवति तस्यै नमः ३ नमः २ शांति रूपेण
इंद्रिय संयम विषयो परति रूपेण ॥३३॥

येति यादेवी सर्वभूतेषु श्रद्धा रूपेण संस्थिता भवति तस्यै नमः तस्यै नमः तस्यै नमः नमः नमः श्रद्धा रूपेण श्रुत्या युक्तेर्ये आस्तिकत्व रू-
पेण ॥२४॥ येति यादेवी सर्व भूतेषु कांति रूपेण संस्थिता भवति तस्यै नमः ३ नमः नमः नमः कांति रूपेण शोभा रूपेण ॥२५॥ ये-
ति यादेवी सर्व भूतेषु लक्ष्मी रूपेण संस्थिता भवति तस्यै नमः ३ नमः लक्ष्मी रूपेण धनादि संपत्ति रूपेण यद्वा मोक्ष लक्ष्मी रूपेण॥
॥२६॥ येति यादेवी सर्व भूतेषु वृत्ति रूपेण संस्थिता भवति तस्यै नमः तस्यै नमः तस्यै नमः नमः नमः नमः वृत्ति रूपेण जीविका

या देवी सर्व भूतेषु श्रद्धा रूपेण संस्थिता नमस्तस्यै ०३ ॥२४॥ या देवी सं-
र्वभूतेषु कान्ति रूपेण संस्थिता ॥ नमस्तस्यै ०३ ॥२५॥ या देवी सर्वभू-
तेषु लक्ष्मी रूपेण संस्थिता ॥ नमस्तस्यै ०३ ॥२६॥ या देवी सर्व भूतेषु वृत्ति
रूपेण संस्थिता ॥ नमस्तस्यै ०३ ॥२७॥ या देवी सर्वभूतेषु स्मृति रूपेण सं-
स्थिता ॥ नमस्तस्यै ०३ ॥२८॥ या देवी सर्वभूतेषु दया रूपेण संस्थिता ॥ नम-
स्तस्यै ०३ ॥२९॥ या देवी सर्व भूतेषु तुष्टि रूपेण संस्थिता ॥ नमस्तस्यै ०३ ॥३०॥

रूपेण यद्वा प्रवृत्ति रूपेण ॥२७॥ येति यादेवी सर्व भूतेषु स्मृति रूपेण संस्थिता तस्यै नमः तस्यै नमः नमः ३ स्मृति रूपेण अनु-
भूत विषय ज्ञान रूपेण ॥२८॥ येति यादेवी सर्वभूतेषु दया रूपेण संस्थिता भवति तस्यै नमः तस्यै नमः तस्यै नमः नमः नमः नमः
दया रूपेण पर दुःख प्रहरणेच्छा रूपेण ॥२९॥ येति या देवी सर्वभूतेषु तुष्टि रूपेण संस्थिता भवति तस्यै नमः तस्यै नमः तस्यै नमः
नमः नमः नमः तुष्टि रूपेण अधिगताधिकाराभिलाष रूपेण ॥३०॥

स्तु महादेव्यै ब्रह्मादिं देव सर्गादि व्यवहार प्रवर्त्तन कर्त्र्यै शिवायै मुक्ति रूपायै प्रकृत्यै सृष्टि शक्त्यै भद्रायै रक्षण शक्त्यै नियताः
समाहित चित्ताः स्मेति पाद पूरणे ॥७॥ रौद्रायै इति रौद्रायै नमः नित्यायै नमः गौर्यै नमः धात्र्यै नमः किंच इंदु रूपिण्यै ज्योत्
स्नायै नमः सुखायै नमः सुखायै सततं नमः सर्वत्र वीप्स्यं रौद्रायै संहार शक्त्यै नित्यायै कालानवच्छिन्नायै यद्वा नित्या रव्य
शक्ति रूपायै गौर्यै गौर वर्णायै धात्र्यै जगदाधारायै ज्योत्स्नायै चंद्र किरणायै सुखायै परमानंद रूपायै ॥८॥ कल्याणीति क-
ल्याण्यै नमः वृद्ध्यै नमः सिद्ध्यै नमः वयं प्रणताः संतः ताभ्यः नमः नमः कुर्मः कल्याण्यै कल्याण कर्त्र्यै वृद्ध्यै उपचय रूपायै
सिद्ध्यै अणिमाद्यष्ट विधि रूपायै प्रणताः नमाः नैर्ऋत्यै नमः भूभृतां लक्ष्म्यै नमः सर्वाण्यै ते नमः नैर्ऋत्यै राक्षस लक्ष्म्यै

रौद्रायै नमो नित्यायै गौर्यै धात्र्यै नमोनमः ॥ ज्योत्स्नायै चेंदु रूपिण्यै सु-
खायै सततं नमः ॥८॥ कल्याण्यै प्रणता वृद्ध्यै सिद्ध्यै कुर्मो नमोनमः ॥ नै-
र्ऋत्यै भूभृतां लक्ष्म्यै शर्वाण्यै ते नमोनमः ॥९॥ दुर्गायै दुर्गपारायै सारा-
यै सर्व कारिण्यै ॥ ख्यात्यै तथैव कृष्णायै धूम्रायै सततं नमः ॥१०॥ ॐ ॥

यद्वा नैर्ऋत्यै रक्षः शक्त्यै भूभृतां राज्ञां सर्वाण्यै शिव शक्त्यै ते तुभ्यं ॥९॥ दुर्गायै इति दुर्गायै नमः दुर्गपारायै नमः सारायै
नमः सर्व कारिण्यै नमः तथैव ख्यात्यै नमः कृष्णायै नमः धूम्रायै सततं नमः दुर्गायै दुर वज्रायै दुर्गः पारो यस्याः २
सा दुर्ग पारा तस्यै दुर्गपारायै दुर्गः दुर धिगमः पारः परिच्छेदः यद्वा दुर्गात् पारं करोतीति दुर्ग पारा तस्यै
दुर्ग पारायै दुर्गात् संसारात् सारायै बल वत्यै सर्व कारिण्यै सर्व जनेन स्वतंत्रायै ख्यात्यै प्रकृति पुरुष भेद
ज्ञान रूपायै यद्वा ख्यात्यै प्रसिद्ध्यै कृष्णायै कृष्ण वर्णायै यद्वा कृष्ण शक्त्यै धूम्रायै धूम्र वर्णायै यद्वा धू- ८१
म्रावत्यै शक्त्यै ॥१०॥

दु० टी० ७८

इतीति हे भूप हे राजन् पुरा जगत्त्रय हितैषिणी सा देवी देव शरीरेभ्यः यथा संभूता बभूव मया ते इति एतत् कथितं भुवं पातीति भूपः तत्संबोधने हे भूप भुवं पृथिवीं पाति रक्षति जगतां त्रयं जगत्त्रयं जगत्त्रयस्य हितैषिणी जगत्त्रय हितैषिणी जगतां स्वर्गमर्त्य पातालानां हितैषिणी हितकर्त्री देवानां शरीराणि देव शरीराणि तेभ्यः देव शरीरेभ्यः देवानां इंद्रादीनां शरीराणि देहाः यथा येन प्रकारेण संभूता प्रकटीभूता तथा तेन प्रकारेण ते तुभ्यं ॥ ३४ ॥ पुनश्चेति हे राजन् पुनश्च देवानां उपकारिणी गौरी देहा सा दुष्ट दैत्यानां तथा शुंभनिशुंभयोः वधाय किंच लोकानां रक्षणाय यथा समुद्भूता अभवत् तथा मया ख्यातं तत् त्वं शृणुष्व अहं यथावत् ते कथयामि देवानां इंद्रादीनां उपकारिणी उपकार कर्त्री गौर्याः देहः गौरी देहः गौरीदेहः

इत्येतत्कथितं भूप संभूता सा यथा पुरा ॥ देवी देव शरीरेभ्यो जगत्त्रय हितैषिणी ॥ ३४ ॥ पुनश्च गौरीदेहा सा समुद्भूता यथाभवत् । वधाय दुष्टदैत्यानां तथा शुंभनिशुंभयोः ॥ ३५ ॥ रक्षणाय च लोकानां देवानामुपकारिणी । तच्छृणुष्व मयाख्यातं यथावत्कथयामि ते ॥ ३६ ॥ इति मार्कंडेय पुराणे सावर्णिके मन्वंतरे देवी माहात्म्ये शक्रादि

गौरीदेहस्य कारणं यस्याः सा गौरी देहा गौर्याः पार्वत्याः देहः शरीर कारणं हेतुः दुष्टाश्च ते दैत्याश्च दुष्ट दैत्याः तेषां दुष्ट दैत्यानां दुष्टाः कुटिलाः शुंभश्च निशुंभश्च तौ शुंभ निशुंभौ तयोः शुंभ निशुंभयोः लोकानाम् जनानाम् सा देवी यथा येन प्रकारेण समुद्भूता प्रकटी भूता तथा तेन प्रकारेण मया मत्तः ख्यातं लोक प्रसिद्धं तत् प्रकारं यथावत् यथार्थं ते तुभ्यं कथयामि कथयिष्ये वर्तमान सामीप्ये वर्तमान वद्वा इत्यनेन सूत्रेण भूते लट् ॥ ३५ । ३६ ॥ इति श्री नागोजीभ[ट्ट] संमत कृते सप्तसती व्याख्याने शक्रादि स्तुति नाम चतुर्थोऽध्यायः ॥ ४ ॥

दु० टी० ७९

यथावत्कथयामीति प्रतिज्ञातमिति हास माह ऋषिरुवाच पुरेति हे राजन् पुरा असुराभ्यां शुंभनिशुंभाभ्यां मद बलाश्रयात् श[ची]पतेः त्रैलोक्यं हृतं किंच यज्ञभागाः हृताः पुरा पूर्वं असुराभ्यां दनुजाभ्यां शुंभश्च निशुंभश्च तौ शुंभ निशुंभौ ताभ्यां शुंभ निशुंभाभ्यां मदश्च बलं च तेमद बले मद बलयोः आश्रयः मद बलाश्रयः तस्मात् मद बलाश्रयात् मदः गर्वः बलं शक्तिः आश्रयः आधारः शच्याः पतिः शचीपतिः तस्य शचीपतेः शच्याः इंद्राण्याः पतिः स्वामी इंद्रः त्रयो लोकाः त्रैलोक्यं लोकाः स्वर्ग मर्त्य पातालानि हृतं स्वाधीनं कृतं यज्ञभागाः यज्ञभागा हृताः स्वाधीनी कृताः ॥ १ ॥ तावेवेति हे राजन् तौ एव सूर्यतां तद्वत् ऐंद्रवं अधिकारं तथा कौबेरं अधिकारं अथच याम्यं अधिकारं किंच वरुणस्य च अधिकारं चक्राते तौ एव शुंभनिशुंभौ एव सुव

ऋषिरुवाच ॥ पुरा शुंभनिशुंभाभ्यामसुराभ्यां शचीपतेः ॥ त्रैलोक्यं यज्ञभागाश्च हृता मद बलाश्रयात् ॥ १ ॥ तावेव सूर्यतां तद्वदधिकारं तथैंदवं कौबेरमथ याम्यं च चक्राते वरुणस्य च ॥ २ ॥ तावेव पवनर्द्धिं च चक्रतुर्वन्हिकर्म च ॥ ततो देवा विनिर्द्धूता भ्रष्टराज्याः पराजिताः ॥ ३ ॥ * ॥ ०

तीति सूर्यः सूर्यस्य भावः सूर्यता तां सूर्यतां सुवति कर्मणि लोकं प्रेरयति भावः धर्मः सूर्यतां सर्व लोक कर्म प्रेरकत्वं अधिकारं तद्वत् तथैव ऐंदवं इंदोः अयं ऐंदवः तं ऐंदवं इंदोः चंद्रस्य कुबेरस्य अयं कौबेरः तं कौबेरं यमस्य अयं याम्यः तं याम्यं ॥ २ ॥ ताविति हे राजन् तौ एव किंच पवनर्द्धिं किंच वन्हि कर्म चक्रतुः तौ एव शुंभ निशुंभौ एव पवनः ऋद्ध्यते अनेनेति पवनर्द्धिः तं पवनर्द्धिं पवनः वायुः ऋद्ध्यते वर्ध्यते पवनर्द्धिं पवनाधिकारं वन्हेः कर्म वन्हि कर्म तत् वन्हि कर्म अग्न्यधिकारं ततः विनिर्द्धूताः देवाः पराजिताः संतः भ्रष्टराज्याः जाता इत्यर्थः तदनंतरं स्व स्वाधिकार हरणानंतरं विनिर्द्धूताः कंपिताः देवाः इंद्रादयः परैः आजिताः पराजिताः परैः शत्रुभिः आसन् ॥ ३ ॥ १९

दु० हृतेति हे राजन् महासुराभ्यां ताभ्यां निराकृताः सर्वे त्रिदशाः हृताधिकाराः संतः अपराजितां तां देवीं स्मरंति महांतौ च तौ असुरौ
टी० च महासुरौ ताभ्यां महासुराभ्यां महांतौ बलवंतौ असुरौ दैत्यौ ताभ्यां शुंभनिशुंभाभ्यां निराकृताः स्वर्गात् निःसारिताः सर्वे स-
८० मस्ताः त्रिः दशाः येषां ते त्रिदशाः दशाः अवस्थाः त्रिदशाः देवाः हृतः अधिकारो येषां ते हृताधिकाराः हृतः गतः अ-
धिस्व स्वाधिकारः अपरैः अजिता पराजिता तां अपराजितां अपरैः शत्रुभिः संस्मरंति स्मृतवंतः वर्तमान सामीप्ये भूतेल
टू ॥४॥ तत्र हेतुमाह तयेति तया अस्माकं इति यथा वरः दत्तः इतीति किं हे त्रिदशाः भवद्भिः अहं आपत्सु स्मृता सती त-
त्क्षणात् भवतां अखिलाः परमापदः नाशयिष्यामि तया देव्या यथा यथार्थः इतीति किं अखिलाः समस्ताः परमाश्च

हृताधिकारास्त्रिदशास्ताभ्यां सर्वे निराकृताः ॥ महासुराभ्यां तां देवीं संस्मरंत्य
पराजितां ॥ ४ ॥ तयास्माकं वरो दत्तो यथापत्सु स्मृताखिलाः ॥ भवतां नाश-
यिष्यामि तत्क्षणात्परमापदः ॥ ५ ॥ इति कृत्वा मतिं देवा हिमवंतं नगेश्वरं ॥ ज-
ग्मुस्तत्र ततो देवीं विष्णुमायां प्रतुष्टुवुः ॥ ६ ॥ देवा ऊचुः ॥ नमो देव्यै महादे
व्यै शिवायै सततं नमः ॥ नमः प्रकृत्यै भद्रायै नियताः प्रणताः स्मतां ॥ ७ ॥ ॥

ताः आपदश्च परमापदः ताः परमापदः परमाः उत्कृष्टाः आपदः आपत्तयः ॥ ५ ॥ इतीति देवाः इतिमतिं कृत्वा नगेश्वरं हिम
वंतं जग्मुः ततः तत्र विष्णुमायां देवीं प्रतुष्टुवुः देवाः इंद्रादयः मतिं बुद्धिं नगानां ईश्वरः नगेश्वरः तं नगेश्वरं नगानां पर्वता
नां ईश्वरः स्वामी हिमवंतं हिमाचलं ततः तदनंतरं हिमवत्गमना नंतरं तत्र हिमवति विष्णोः माया विष्णुमाया तां विष्णु
मायां विष्णोः हरेः मायाशक्तिः ॥६॥ प्रशाव्य योगीति तां सर्वात्म्य न स्तुतिमाह देवा ऊचुः नमः इति देव्यै सततं नमः शिवायै
सततं नमः प्रकृत्यै सततं नमः भद्रायै सततं वयं नियताः संतः तां प्रणताः स्म देव्यै इत्यादि मध्ये सततं निरंतरं नमः नमस

दु० यदीति हे महेश्वरि यदि चापि त्वया अस्माकं वरः देयः न हिंसं संस्मृता सती असंस्मृता सती नः परमाः पदः हिंसेयाः या-
टी० चापि यद्येवं सत्यपि अस्माकं असमर्थनः अस्माकं परमा श्चताः आपदश्चताः परमापदः परमा उत्कृष्टाः आपदः आपत्तय
११ हिंसेयाः नाशय ॥३०॥ उत्तरार्द्ध मुत्तराल्वयिय इति हे अमलानने हे अंविकेयः मर्त्यः त्वां एभिः स्तवैः स्तोष्यति तस्य त्वं वित्तर्द्धि वि
भवैः सह धनदारादि संपदां किंच अस्मत् हृदये सर्वदा प्रसन्ना भवेथाः अमलं आननं यस्याः सा अमलानना तत्संबोधने हे अ
मलानने अमलं प्रसन्नं आननं मुखारविंदं तस्य मर्त्यस्य मानुष्यस्य वित्तस्य ऋद्धिः वित्तर्द्धिः वित्तर्द्धेः विभवाः वित्तर्द्धिविभवाः तैः वि
त्तर्द्धि विभवैः वित्तस्य ज्ञानस्य ऋद्धि उपचयः विभवाः ऐश्वर्यादयः धनानि च दाराश्च धनदाराः धनदाराः आदिर्येषां ते धनदाराद

यदयं निहतः शत्रुरस्माकं महिषासुरः ॥ यदि वापि वरो देयस्त्वयास्माकं म-
हेश्वरि ॥ ३० ॥ संस्मृता संस्मृता त्वं नो हिंसेथाः परमापदः ॥ ३० ॥ यश्च मर्त्यः स्त-
वैभिस्त्वां स्तोष्यत्यमलानने ॥ ३१ ॥ तस्य वित्तर्द्धि विभवैर्धनदारादिसंपदां ॥ हृ-
द्ये स्यास्मत्प्रसन्ना त्वं भवेथाः सर्वदांबिके ॥ ३२ ॥ ऋषिरुवाच ॥ इति प्रसादिता
देवैर्जगतोर्थे तथात्मनः ॥ तथेत्युक्त्वा भद्रकाली बभूवांतर्हिता नृप ॥ ३३ ॥

यः धनदारादीनां संपदः धनदारादि संपदः तासां धनदारादि संपदां धनानि द्रव्याणि दाराः कलत्राणि संपदः अनुरूपात्मभावः अ-
स्मत् अस्माकं हृदये उपचयाय सर्वदा सदा भवेथाः भव ॥३२॥ ऋषिरुवाच इतीति हे नृप हे राजन् देवैः जगतः तथा आत्मनः
अर्थे इति प्रसादिता भद्रकाली तथा इति उक्त्वा अंतर्हिता बभूव नृन् पातीति नृपः तत्संबोधने हे नृप नृन् जनान् पाति रक्षति
देवैः इंद्रादिभिः इति पूर्वोक्त प्रकारेण प्रसादिता प्रसन्ना सती भद्रं कालयतीति भद्रकाली भद्रं कल्याणं कालयति वर्द्धयति ११
तथा तथास्तु अंतर्हिता अदृश्या ॥३३॥

दु० टी० ७४ त्रैलोक्यमिति हे देवि त्वया अखिलं एतत् त्रैलोक्यं रिपुनाशनेन त्रातं समरमूर्द्धनि तान् हत्वा ते रिपुगणाः अपि दिवं नीताः ८५
उन्मदसुरारिभवं अस्माकं भयं अपि अपास्तं अतः ते त्वया अखिलं समस्तं त्रयो लोकाः त्रैलोक्यं रिपूणां नाशनं रिपुनाशनं तेन रिपुनाशनेन रिपूणां शत्रूणां दैत्यानां नशनं नाशः त्रातं रक्षितं समरस्य मूर्द्धा समरमूर्द्धा तस्मिन् समरमूर्द्धनि समरस्य संग्रामस्य मूर्द्धा प्रधानस्थानं यान् रिपुगणान् रिपूणां गणाः रिपुगणाः ॥ रिपूणां शत्रूणां दैत्यानां गणाः समूहाः दिवं स्वर्गं नीताः प्रापिताः सुराणां अरयः सुरारयः उन्मदाश्च ते सुरारयश्च उन्मदसुरारयः उन्मदसुरारिभ्यः भवतीति उन्मदसुरारिभवं सुराणां देवानां अरयः शत्रवः दैत्याः उन्मदाः मदांधाः भयं त्रासः अपास्तं

त्रैलोक्यमेतदखिलं रिपुनाशनेन त्रातं त्वया समरमूर्द्धनि तेपि हत्वा नीता ।
दिवं रिपुगणा भयमप्यपास्तमस्माकमुन्मदसुरारिभवं नमस्ते ॥ २२ ॥
शूलेन पाहि नो देवि पाहि खड्गेन चाम्बिके ॥ घण्टास्वनेन नः पाहि ।
चापज्यानिःस्वनेन च ॥ २३ ॥ ॐ ॥ २३ ॥ ॐ ॥ २३ ॥ ॐ ॥ ॐ ॥

दूरीकृतं अतः अस्मात् कारणात् ते तुभ्यं नमः नमस्कारोऽस्तु ॥ २२ ॥ शूलेनेति हे देवि त्वं शूलेन पाहि नः अस्मान् शूलेन त्रिशूलेन पाहि रक्ष किंच हे अंबिके त्वं नः खड्गेन पाहि नः अस्मान् खड्गेन असिना पाहि रक्ष किंच त्वं नः घंटास्वनेन पाहि नः अस्मान् घंटायाः स्वनः घंटास्वनः तेन घंटास्वनेन स्वनः शब्दः पाहि रक्ष किंच त्वं नः चापज्यानिःस्वनेन पाहि नः अस्मान् चापस्य ज्या चापज्या चापज्यायाः निःस्वनः चापज्यानिःस्वनः तेन चापज्यानिःस्वनेन चापस्य धनुषः ज्या प्रत्यंचा । ७४
निःस्वनः टंकारशब्दः ॥ २३ ॥

दु० टी० ७५ प्राच्यामिति हे देवि प्राच्यां स्थितान् नः रक्ष प्राच्यां पूर्वस्यां दिशि नः अस्मान् किंच हे चंडिके त्वं प्रतीच्यां स्थितान् नः रक्ष प्रतीच्यां पश्चिमायां दिशि नः अस्मान् किंच त्वं दक्षिणे स्थितान् नः रक्ष दक्षिणे दक्षिणस्यां दिशि नः अस्मान् हे ईश्वरि तथा त्वं उत्तरस्यां स्थितान् नः आत्मशूलस्य भ्रामणेन रक्ष उत्तरस्यां उदीच्यां दिशि नः अस्मान् आत्मनः शूलं आत्मशूलं तस्य आत्मशूलस्य ॥ २४ ॥ सौम्यानीति हे देवि ते सौम्यानि यानि रूपाणि किंच अत्यर्थं घोराणि यानि रूपाणि त्रैलोक्ये विचरंति तैः त्वं अस्मान् तथा भुवं रक्ष ते तव सौम्यानि सृष्टिस्थितिव्यापाराणि यानि रूपाणि अत्यर्थं घोराणि संहारव्यापाराणि यानि रूपाणि स्वरूपाणि त्रयो लोकाः त्रैलोक्यं तस्मिन् त्रैलोक्ये विचरन्ति गच्छन्ति तैः रूपैः भुवं पृथिवीं ॥ २५ ॥ ८८

प्राच्यां रक्ष प्रतीच्यां च चण्डिके रक्ष दक्षिणे । भ्रामणेनात्मशूलस्य उत्त-
रस्यां तथेश्वरि ॥ २४ ॥ सौम्यानि यानि रूपाणि त्रैलोक्ये विचरंति ते ॥ या-
नि चात्यर्थघोराणि ते रक्षास्मांस्तथा भुवं ॥ २५ ॥ खड्गशूलगदादीनि या-
नि चास्त्राणि तेऽम्बिके करपल्लवसंगीनि तैरस्मान् रक्ष सर्वतः ॥ २६ ॥ ॐ ॥

खड्गेति हे अम्बिके किंच करपल्लवसंगीनि खड्गशूलगदादीनि ते यानि अस्त्राणि भवंति तैः त्वं अस्मान् ।
सर्वतः रक्ष करा एव पल्लवाः करपल्लवाः करपल्लवानां संगः करपल्लवसंगः करपल्लवसंगोऽस्ति येषां तानि करपल्लवसंगीनि करा एव अष्टादश भुजा एव पल्लवाः किशलयपत्राणि संगः संसर्गः सम्बन्धः खड्गश्च शूलं च गदा च ताः खड्गशूलगदाः खड्गशूलगदा आदिर्येषां तानि खड्गशूलगदादीनि खड्गः असिः ते तव शूलं त्रिशूलं तैः अस्त्रैः सर्वतः सर्वत्र ॥ २६ ॥ ७५

ऋषिरुवाच एवमिति हे राजन् त्रिदशैः समस्तैः सुरैः सु एवं स्तुता जगतां धात्री प्रसाद सुमुखी सती प्रणतान् समस्तान् सुरान् प्राह कथंभूता जगतां धात्री भक्त्या दिव्यैः नंदनोद्भवैः कुसुमैः तथा गंधानुलेपनैः अर्चिता पुनः कथंभूता जगतां धात्री दिव्यैः धूपैः धूपिता तिस्रः दशाः येषां ते त्रिदशाः तैः त्रिदशैः दशाः अवस्थाः समस्तैः संपूर्णैः सुरैः देवैः एवं पूर्वोक्त प्रकारेण जगतां चतुर्दश लोकानां धात्री जननी देवी सुष्ठु सुखं यस्याः सा सुमुखी प्रसादेन सुमुखी प्रसाद सुमुखी सुष्ठु शोभनं सुखं आननं प्रसादेन प्रसन्न तथा प्रणतान् कृत नमस्कारान् समस्तान् सम्पूर्णान् सुरान् देवान् प्राह उवाच दिवि भवानि दिव्यानि तैः दिव्यैः दिवि स्वर्गे भवानि उत्पन्नानि दिव्यैः उत्कृष्टैः नंदनात् उद्भवो येषां तानि नंदनोद्भवानि तैः नंदनोद्भवैः

ऋषिरुवाच ॥ एवं स्तुता सुरैर्दिव्यैः कुसुमैर्नंदनोद्भवैः ॥ अर्चिता जगतां धात्री
तथा गंधानुलेपनैः ॥ २७ ॥ भक्त्या समस्तैस्त्रिदशैर्दिव्यैर्धूपैस्तु धूपिता ॥ प्रा-
ह प्रसाद सुमुखी समस्तान् प्रणतान् सुरान् ॥ २८ ॥ देव्युवाच ॥ व्रियतां त्रिदशाः सर्वे
यदस्मत्तोऽभिवांछितं ॥ देवा ऊचुः ॥ भगवत्या कृतं सर्वं न किंचिदवशिष्यते ७६

नंदनात् देव वनात् उद्भवः प्रादुर्भावः कुसुमैः पुष्पैः गंधाश्च अनुलेपनानि च तानि गंधानुलेपनानि तैः गंधानुलेपनैः गंधाः रागादयः अनुलेपनानि श्रीचंदनादीनि अर्चिता पूजिता दिव्यैः मनोज्ञैः ॥ २७ । २८ ॥ देव्युवाच व्रियतामिति देवा ऊचुः भगवत्येति हे सर्वे त्रिदशाः भवता अस्मत् यत् अभिवांछितं भवति तत् भवद्भिः व्रियतां अभिवांछितं इच्छितं व्रियतां प्रोच्य तां देवा ऊचुः हे देवि भगवत्या अस्माकं शत्रुः अयं महिषासुरः यत् निहतः तत् सर्वं कृतं किंचित् न अवशिष्यते ७६
भगवत्या त्वया शत्रुः वैरी निहतः प्रहारितः न सवशिष्यते न अवशिष्टो भवति ॥ २९ ॥

योग्यं सदृशं आननं मुखारविंद विलोकयंतीति विलोकयंतः तेषां विलोकयतां विलोकयंति पश्यंति चक्षुषां नेत्राणां आश्रयः आधारः ॥ १९ ॥ दुर्वृत्तेति हे देवि तव शीलं दुर्वृत्त शमनं भवति तथा अन्यैः असतुल्यं एतत् तव रूपं अविचिंत्यं भवति किंच तव वीर्यं हृत देव पराक्रमाणां हंतृ भवति इत्थं त्वया दया एवं वैरिषु अपि प्रकटिता शीलं स्वाभाविको गुणः दुष्टं वृत्तं येषां ते दुर्वृत्ताः दुर्वृत्तानां वृत्तं दुर्वृत्त वृत्तं दुर्वृत्त वृत्तस्य शमनं दुर्वृत्त शमनं दुराचरणं दुर्वृत्तानां पापात्मनां वृत्तं पापं शमनं नाशं अतुल्यं असाधारणं रूपं आकृति विशेषणं चिंतितुं योग्यं विचिंत्यं न विचिंत्यं अविचिंत्यं वीर्यं पराक्रमः देवानां पराक्रमः देवपराक्रमः हृतो देव पराक्रमो यैस्ते हृत देवपराक्रमाः तेषां हृत देव पराक्रमाणां

दुर्वृत्त वृत्त शमनं तव देवि शीलं रूपं तथैतदविचिंत्यमतुल्यमन्यैः ॥ वी-
र्यं च हंतृ हृतदेव पराक्रमाणां वैरिष्वपि प्रकटितैव दया त्वयेत्थं ॥ २० ॥
केनोपमा भवतु तेऽस्य पराक्रमस्य रूपं च शत्रुभय कार्यति हारि कुत्र ॥ चि-
त्ते कृपा समर निष्ठुरता च दृष्टा त्वय्येव देवि वरदे भुवन त्रयेऽपि ॥ २१ ॥ ॐ ॥

हृतदेव पराक्रमाणां दैत्यानां हंतृ नाशकं इत्थं अनेन प्रकारेण वैरिषु शत्रुषु दैत्येषु प्रकटिता ॥ २० ॥ केनेति हे देवि वरदे अस्य पराक्रमस्य उपमा केन भवतु किंच तव रूपं कुत्र शत्रु भय कारि भवति कुत्र अति हारि भवति अस्मािभिः भुवन त्रये अपि एव चित्ते कृपा दृष्टा किंच समर निष्ठुरता दृष्टा ते नैव वरं ददातीति वरदा तत्संबोधने हे वरदे वरं वरदानं ते नैव रूपं स्वरूपं कुत्र कुत्रापि शत्रूणां भयं शत्रुभयं करोतीति शत्रुभय कारि भयं त्रासः कुत्र कुत्रापि अति हारि अति मनोहरं भुवनानां त्रयं भुवनत्रयं तस्मिन् भुवनत्रये भुवनानां स्वर्ग मर्त्य पातालानां त्रयं समूहः चित्ते अंतःकरणे ७३
कृपा दया निष्ठुरस्य भावः निष्ठुरता समरे निष्ठुरता समर निष्ठुरता निष्ठुरस्य कठोरस्य भावः धर्मे समरे संग्रामे ॥ २१ ॥

दु० टी० २० छत्रमिति हे प्रभो कांचनस्रावि वारुणं छत्रं ते गेहे तिष्ठति तथा अयं स्यंदनवरः तिष्ठति अयंकः यः पुरा प्रजापतेः आसीत १०
कांचनं स्रवतीति कांचनस्रावि कांचनं सुवर्णं स्रवति वर्षति वरुणस्य इदं वारुणं ते तव गेहे गृहे स्यंदनवरः रथश्रेष्ठः पुरा पू
र्वं प्रजापतेः दक्षस्य ॥५०॥ मृत्योरिति हे प्रभो हे ईश त्वया मृत्योः उत्क्रांतिदा नाम शक्तिः हृता सलिलराजस्य पाशः ते
व भ्रातुः परिग्रहे तिष्ठति मृत्योः यमस्य उत्क्रांतिं ददातीति उत्क्रांतिदा उत्क्रांतिं मरणं सलिलानां राजा सलिलराजः तस्य स
लिलराजस्य सलिलानां जलानां सलिलराजस्य वरुणस्य भ्रातुः निशुंभस्य परिगृह्यते अनेनेति परिग्रहः तस्मिन् परिग्र

छत्रं ते वारुणं गेहे कांचनस्रावि तिष्ठति ॥ यथायं स्यंदनवरो यः पुरासीत्प्र-
जापतेः ॥५०॥ मृत्योरुत्क्रांतिदा नाम शक्तिरीश त्वया हृता ॥ पाशः सलि-
लराजस्य भ्रातुस्तव परिग्रहे ॥५१॥ निशुंभस्याब्धिजाताश्च समस्ता रत्नजातयः
वह्निरपि ददौ तुभ्यमग्निशौचे च वाससी ॥५२॥ एवं दैत्येंद्र रत्नानि समस्तान्या-
हृतानि ते ॥ स्त्रीरत्नमेषा कल्याणी त्वया कस्मान्न गृह्यते ॥५३॥ ॐ ॥११

हे हस्ते ॥५१॥ निशुंभेति हे ईश किंच अब्धिजाताः समस्ताः रत्नजातयः निशुंभस्य परिग्रहे तिष्ठंति किंच वह्निः अपि अ-
ग्निशौचे वाससी तुभ्यं ददौ अब्धेः जाताः अब्धिजाताः अब्धेः क्षीरसमुद्रात् जाताः प्रकटाः समस्ताः संपूर्णाः रत्नजातयः र-
त्नश्रेष्ठाः परिग्रहे हस्ते वह्निः अग्निः अग्निरेव शौचं ययोः ते अग्निशौचे शौचे नैर्मल्यकारणं वाससी वस्त्रे ॥५२॥ ए-
वमिति हे दैत्येंद्र ते एवं समस्तानि रत्नानि आहृतानि त्वया कल्याणी एषा स्त्रीरत्नं कस्मात् न गृह्यते ते त्वया सर्वं अनेन प्र-
कारेण समस्तानि सम्पूर्णानि कल्याणी कल्याणकारिणी ॥५३॥

दु० टी० २१ ऋषिरुवाच निशम्येति हे राजन् चंडमुंडयोः इति वचः निशम्य तदा महासुरः शुंभः सुग्रीवं दूतं देव्याः प्रेषयामास चंडश्च
मुंडश्च तौ चंडमुंडौ तयोः चंडमुंडयोः वचः वाक्यं निशम्य श्रुत्वा तदा तस्मिन् काले महांश्चासौ असुरश्च महासुरः असुरः
दैत्यः सः प्रसिद्धः सुग्रीवं सुग्रीवनामकं देव्याः समीपे ॥५४॥ इति चेति हे सुग्रीव त्वया गत्वा मम वचनात् इति च इति च
सा वक्तव्या यथा च सा संप्रीत्या अभ्येति तथा त्वया लघु कार्यं वचनात् वाक्यात् इदं चेदं चेत्यर्थः सा देवी अभ्येति प्राप्नो-
ति लघु शीघ्रं कार्यं कर्तव्यं ॥५५॥ स इति सः ततः अतिशोभने यत्र शैलोद्देशे सा देवी आस्ते तत्र गत्वा तां मधुरया गिरा

ऋषिरुवाच ॥ निशम्येति वचः शुंभः स तदा चंडमुंडयोः ॥ प्रेषयामास सुग्री-
वं दूतं देव्या महासुरं ॥५४॥ इति चेति च वक्तव्या सा गत्वा वचनान्मम ॥ यथा
चाभ्येति संप्रीत्या तथा कार्यं त्वया लघु ॥५५॥ स तत्र गत्वा यत्रास्ते शैलोद्देशे
तिशोभने ॥ सा देवी तां ततः प्राह श्लक्ष्णं मधुरया गिरा ॥५६॥ दूत उवाच ॥ देवि दै-
त्येश्वरः शुंभस्त्रैलोक्ये परमेश्वरः ॥ दूतोऽहं प्रेषितस्तेन त्वत्सकाशमिहागतः ५७

श्लक्ष्णं यथा स्यात्तथा प्राह सः दूतः ततः शुंभसकाशात् अतिशोभने मनोहरे यत्र यस्मिन् शैलोद्देशे पर्वतप्रांते आस्ते तिष्ठ-
ति तत्र तस्मिन् शैलोद्देशे तां देवीं मधुरया कोमलया गिरा वाण्या श्लक्ष्णं अनुत्कंठं प्राह उवाच ॥५६॥ दूत उवाच ॥ देवी-
ति हे देवि दैत्येश्वरः त्रैलोक्ये परमेश्वरः शुंभः भवति तेन त्वत्सकाशं प्रेषितः दूतः अहं इह आगतः दैत्यानां ईश्वरः दैत्ये-
श्वरः स्वामी त्रयो लोकाः त्रैलोक्यं त्रैलोक्यस्य परमेश्वरः त्रैलोक्यपरमेश्वरः तेन शुंभेन त्वत्सकाशं त्वत्समीपं इह अस्मिन् हि- २१
माद्रौ आगतः ॥५७॥

तद्देवो त्साद्यति अव्याहतेतिहे देवि निर्जिताखिल दैत्यारिः सर्वासु देव योनिषु यः सदा अव्याहताज्ञः भवति सः यत्आह
तत् त्वं शृणुष्व दैत्यानां अरयः दैत्यारयः अखिलाश्चते दैत्या स्तेषां अखिल दैत्यारयः निर्जिता अखिल दैत्या रयो येन सः
निर्जिताखिल दैत्यारिः अरयः शत्रवः देवाः अखिला: समस्ताः सर्वासु समस्तासु देव योनिषु विद्याधरादिषु यः शुं-
भः सदा सर्वदा न व्याहता आज्ञा यस्य सः अव्याहताज्ञः व्याहता अप्रतिहताः शुंभः यत् वाक्यं आह उवाच तत्वा-
क्यं ॥५८॥ तदुक्तिमाह ममेति हे देवि अखिल त्रैलोक्यं मम वश्यं भवति देवाः मम वशानुगाः भवंति अहं सर्वान् य-
ज्ञभागान् पृथक् पृथक् उपाश्नामि अखिलं समस्तं त्रयोलोकाः त्रैलोक्यं देवाः इंद्रादयः वशाः अतएव अनुगाः वशानु-

अव्याहताज्ञः सर्वासु यः सदा देवयोनिषु ॥ निर्जिताखिलदैत्यारिः सयदाह
शृणुष्व तत् ॥ ५८॥ मम त्रैलोक्यमखिलं मम देवा वशानुगाः ॥ यज्ञभा-
गानहं सर्वानुपाश्नामि पृथक् पृथक् ॥ ५९॥ त्रैलोक्ये वररत्नानि मम व-
श्यान्यशेषतः ॥ तथैव गजरत्नानि हृत्वा देवेंद्रवाहनं ॥ ६०॥ ॐ॥ ॐ॥

गाः अत्याः सर्वान् समस्तान् यज्ञभागान् तान् यज्ञभागान् पृथक् पृथक् इंद्राद्यधिकार भेदेन उपस्नामि गृह्णामि ॥५९॥
त्रैलोक्ये इति हे देवि त्रैलोक्ये अशेषतः वररत्नानि मम वश्यानि भवंति हृत्वे त्या द्युत्तरान्यपि मया तथैव गजरत्नानि देवेंद्र
वाहनं हृत्वा त्रयो लोकाः त्रैलोक्यं तस्मिन् त्रैलोक्ये अशेषतः अशेषाणि सकलानि वररत्नानि रत्नं श्रेष्ठानि वश्यानि व
शीभूतानि गज रत्नानि गजश्रेष्ठं देवानां इंद्रः देवेंद्रः देवेंद्रस्य वाहनं देवेंद्र वाहनं इंद्रः श्रेष्ठः देवेंद्र वाहनं ऐरावतः हृत्वा
हृतः अर्थवशात् विभक्तेर्वि परिणामः ॥ ६०॥

ननु यदि सा रत्नभूता कथमस्माकं स्यादत आह यानीति हे प्रभो त्रैलोक्ये तु मणयः गजाश्वादीनि यानि रत्नानि भवंति समस्ता-
नि सांप्रतं ते गृहे भवंति वै त्रयो लोकाः त्रैलोक्यं तस्मिन् त्रैलोक्ये गजश्च अश्वश्च गजाश्वौ आदिर्येषां तानि गजाश्वादीनि
गजः हस्ती रत्नानि स्वजाति श्रेष्ठानि समस्तानि संपूर्णानि तानि रत्नानि सांप्रतं वर्तमानकाले ते तव गृहे भवने भांति शो-
भंते वै इति निश्चयेन अत इयमपि तव भविष्यतीति भावः ॥ ४६॥ तदेव विवृणोति ऐरावत इति हे प्रभो त्वया पुरंद-
रात् ऐरावतः गज रत्नं समानीतः किंच अयं पारिजात तरुः तथैव उच्चैः श्रवाः हयः समानीतः पुरंदरात् इन्द्रात् ग-
जरत्नं गजश्रेष्ठः समानीतः हृतः पारिजातश्चासौ तरुश्च पारिजात तरुः तरुः वृक्षः हयः अश्वः समानीतः हृतः ॥

यानि रत्नानि मणयो गजाश्वादीनि वै प्रभो ॥ त्रैलोक्ये तु समस्तानि सांप्रतं भां-
ति ते गृहे ॥ ४६॥ ऐरावतः समानीतो गजरत्नं पुरंदरात् ॥ पारिजाततरुश्चायं त-
थैवोच्चैःश्रवा हयः ॥ ४७॥ विमानं हंससंयुक्तमेतत्तिष्ठति तेंगणे ॥ रत्नभूतमिहा-
नीतं यदासीद्वेधसोऽद्भुतं ॥ ४८॥ निधिरेष महापद्मः समानीतो धनेश्व-
रात् ॥ किंजल्किनीं ददौ चाब्धिर्मालामम्लानपंकजां ॥ ४९॥ ॐ॥ ॐ॥

॥ ४७॥ विमानमिति वेधसः अद्भुतं हंस युक्तं यत् एतत् विमानं रत्नभूतं आसीत् तत् विमानं ते इह अंगणे आनीतं सत्तिष्ठ-
ति वेधसः ब्रह्मणः अद्भुत आश्चर्य कारकम् हंसैः संयुक्तं हंससंयुक्तं ते तव इह अस्मिन् ॥ ४८॥ निधिरिति हे प्रभो त्वया धने-
श्वरात् महापद्मः एषः निधिः समानीतः किंच अब्धिः अम्लान पंकजां किंजल्किनीं मालां तुभ्यं ददौ धनेश्वरात् कुबेरात्
महापद्मः महापद्म नामा निधिः क्षीरसमुद्रः अम्लानानि पंकजानि यस्यां सा अम्लान पंकजा तां अम्लान पंकजाम् अ-
म्लानानि मलीनानि कमलानि किंजल्किनी तन्नामिका ॥ ४८॥ ८९

दु० परमेति हे देवि त्वं अतुलं परमैश्वर्यं मत्परिग्रहात् प्राप्स्यसे एतत् बुद्ध्वा समालोच्य मत्परिग्रहतां व्रज अतुलं महत् परमं च तत्
टी० ऐश्वर्यं च परमैश्वर्यं परमं उत्कृष्टं मत्परिग्रहात् मदाश्रयात् समालोच्य विचार्य मत्परिग्रहतां मत्पत्नीत्वं व्रज प्राप्नुहि ॥ ६५॥
६४ ऋषिरुवाच इत्युक्तेति हे राजन् इति उक्ता सा देवी तदा अंतःस्मिता सती जगौ सा कायया इदं जगत् धार्यते कथंभूता देवी गंभी-
रा पुनः कथंभूता देवी दुर्गा पुनः कथंभूता देवी भगवती पुनः कथंभूता देवी भद्रा इति अनेन प्रकारेण उक्ता कथिता तदा त-
स्मिन् काले अंतःस्मितं यस्याः सा अंतःस्मिता अंतःकरणे स्मितं ईषद्धासं जगौ उवाच यया देव्या गंभीरा निश्चला दुर्गा
दुर्गया भग मास्ति यस्याः सा भगवती भगं षडैश्वर्यं भद्रमस्ति यस्याः सा भद्रा भद्रं कल्याणं ॥ ६६॥ देव्युवाच ॥ सत्यमिति

परमैश्वर्यमतुलं प्राप्स्यसे मत्परिग्रहात् ॥ एतद्बुद्ध्वा समालोच्य मत्परिग्रह-
तां व्रज ॥ ६५॥ ऋषिरुवाच ॥ इत्युक्ता सा तदा देवी गंभीरांतःस्मिता जगौ ॥ दुर्गा
भगवती भद्रा ययेदं धार्यते जगत् ॥ ६६॥ देव्युवाच ॥ सत्यमुक्तं त्वया नात्र मिथ्या
किंचित्त्वयोदितं ॥ त्रैलोक्याधिपतिः शुंभो निशुंभश्चापि तादृशः ॥ ६७॥ किं त्वत्र ६४
यत्प्रतिज्ञातं मिथ्या तत्क्रियते कथं ॥ श्रूयतामल्पबुद्धित्वात्प्रतिज्ञा या कृता पुरा

हे दूत त्वया सत्यं उक्तं त्वया उदितं किंचित् मिथ्या न भवति शुंभः किंच तादृशः निशुंभः अपि त्रैलोक्याधिपतिः भवति अत्र
शुंभ विषये सत्यं यथार्थं उक्तं कथितं त्रयो लोकाः त्रैलोक्यं त्रैलोक्यस्य आधिपतिः त्रैलोक्याधिपतिः अधिपतिः स्वामी ॥ ६७
किं त्विति हे दूत किंतु अत्र मया यत्प्रतिज्ञातं तत् मिथ्या कथं क्रियते मया पुरा अल्पबुद्धित्वात् या प्रतिज्ञा कृता सा त्वया श्रूय-
तां अत्र परिग्रहत्व विषये एतत्प्रतिज्ञातं पुरा पूर्वं अल्पा बुद्धिर्यस्याः सा अल्पबुद्धिः अल्पबुद्धेः भावः अल्पबुद्धित्वं तस्मा-
त् अल्पबुद्धित्वात् अल्पा स्वल्पा भावः धर्मः सा प्रतिज्ञा ॥ ६८॥

दु० प्रतिज्ञात मादृयोमामिति हे दूत संग्रामे यो मां जयति यः मे दर्पं व्यपोहति यः लोके मे प्रतिबलः भवति सः मे भर्ता भविष्यति
टी० मे मम दर्पं बलत्वाभिमानं व्यपोहति दूरीकरोति मे मम प्रतिबलः समानबलः मे मम भर्ता स्वामी ॥ ६९॥ तदिति हे दूत तत्
६५ अत्र शुंभः वा महासुरः निशुंभः आगच्छतु मां जित्वा लघु मे पाणिं गृह्णातु अत्र चिरेण किं भवति तत् तस्मात् कारणा-
त् अत्र अस्मिन् स्थले वा अथवा महांश्चासौ असुरश्च महासुरः असुरः दैत्यः लघु शीघ्रं मे मम पाणिं हस्तं अत्र अस्मिन्
विषये चिरेण बहुकालेन किं किं प्रयोजनं पाणिग्रहणात् पूर्वं मम गमनं नोचितमिति भावः ॥ ७०॥ दूत उवाच ॥ अवलि-
प्तेति हे देवि त्वं अवलिप्ता असि मम अग्रतः एवं मा ब्रूहि त्रैलोक्ये कः पुमान् शुंभनिशुंभयोः अग्रे तिष्ठति अवलिप्ता

यो मां जयति संग्रामे यो मे दर्पं व्यपोहति ॥ यो मे प्रतिबलो लोके स मे भर्ता भ-
विष्यति ॥ ६९ ॥ तदागच्छतु शुंभोऽत्र निशुंभो वा महासुरः ॥ मां जित्वा किं चि-
रेणात्र पाणिं गृह्णातु मे लघु ॥ ७० ॥ दूत उवाच ॥ अवलिप्तासि मैवं त्वं देवि
ब्रूहि ममाग्रतः ॥ त्रैलोक्ये कः पुमांस्तिष्ठेदग्रे शुंभनिशुंभयोः ॥ ७१ ॥ अन्येषा-
मपि दैत्यानां सर्वे देवा न वै युधि ॥ तिष्ठंति संमुखे देवि किं पुनः स्त्री त्वमेकिका ७२

गर्विता एवं अनेन प्रकारेण न ब्रूहि कथय यत् त्रयो लोकाः त्रैलोक्यं तस्मिन् त्रैलोक्ये शुंभश्च निशुंभश्च तौ शुंभनिशुंभौ
तयोः शुंभनिशुंभयोः ॥ ७१॥ मन्वहं देवी त्वत्तः स्या स्वामी त्वत् आह अन्येषामपीति हे देवि युधि सर्वे देवाः अ-
न्येषां अपि दैत्यानां सम्मुखे न तिष्ठंति एकिका स्त्री त्वं तिष्ठेत् किं पुनः दैत्युधि संग्रामे सर्वे समस्ताः एकिका एकाकिनी ६५
किं पुनः किं वक्तव्यं वै इति निश्चयेन ॥ ७२॥ ॥ ऽऽ ॥ ॥ ऽऽ ॥ ॥ ऽऽ ॥ ॥

दु० टी० ६६

इंद्राद्या इति हे देवि इंद्राद्याः सकलाः देवाः येषां संयुगे न तस्थुः शुंभादीनां तेषां सम्मुखं स्त्री कथं प्रयास्य सि इंद्रः आद्यो ये
षां ते इंद्राद्याः सकलाः समस्ताः येषां दैत्यानां संयुगे संग्रामे शुंभः आदिर्येषां ते शुंभादयः तेषां शुंभादीनां तेषां दैत्यानां
प्रयास्यसि तिष्टसि गमिष्यसि ॥ ७३ ॥ उपसंहरति सा त्वमिति हे देवि मया एवं उक्ता सा त्वं शुंभ निशुंभयोः पार्श्वे ग-
च्छ विपक्ष वाधकम हत्वं केशाकर्षण निर्द्धूत गौरवा सती सा गमिष्यसि उक्ता कथिता शुंभश्च निशुंभश्च तौ शुंभ
निशुंभौ तयोः शुंभ निशुंभयोः पार्श्वे पार्श्वे भागं केशानां आकर्षणं केशाकर्षणं केशाकर्षणेन निर्द्धूतं गौरवं

इंद्राद्याः सकला देवास्तस्थुर्येषां न संयुगे ॥ शुंभादीनां कथं तेषां स्त्री प्रयास्य
सि संमुखं ॥ ७३ ॥ सा त्वं गच्छ मयै वोक्ता पार्श्वे शुंभ निशुंभयोः ॥ केशाक
र्षण निर्द्धूत गौरवा मा गमिष्यसि ॥ ७४ ॥ देव्युवाच ॥ एवमेतद्बली शुंभो
निशुंभश्चाति वीर्यवान् ॥ किं करोमि प्रतिज्ञा मे यदनालोचिता पुरा ॥ ७५ ॥

यस्याः सा केशाकर्षण निर्द्धूत गौरवा निर्द्धूतं खंडितं गौरवं गुरुत्वं ॥ ७४ ॥ देव्युवाच ॥ एवमेतदिति हे दूत शुंभः किं
च अति वीर्यवान् निशुंभ एवं एतत् वली भवति अहं किं करोमि यत् मे पुरा अनालोचिता प्रतिज्ञा कृता अतिवीर्यं
विद्यते यस्य सः अति वीर्यवान् एवं अनेन प्रकारेण एतत् वलमस्या स्तीति एतत् वलीयत् यस्मात् कारणात् मे
मया पूर्वं पुरा अनालोचिता अविचारिता ॥ ७५ ॥ ॐ ॥ ऽऽ ॥ ॐ ॥ ऽऽ ॥ ॐ ॥ ऽऽ ॥ ॐ ॥ ऽऽ

दु० टी० ६३

क्षीरोदेति हे देवि अमरैः प्रणिपत्य उच्चैः श्रवस संज्ञं तत् अश्वरत्नं मम समर्पितं कथंभूतं अश्वरत्नं क्षीरोद मथनोद्भूतम् अमरैः देवैः प्र-
णिपत्य नमस्कृत्य उच्चैः श्रवस इति संज्ञा यस्य तत् उच्चैः श्रवस संज्ञं उच्चैःश्रवसं इत्यत्र पृषोदरादित्वात् आगमः स्थितः समर्पितं द-
त्तं क्षीरोदस्य मथनं क्षीरोद मथनं क्षीरोद मथनात् उद्भूतं क्षीरोद मथनोद्भूतं क्षीरोदस्य क्षीर समुद्रस्य मथनोद्भूतं मथनं विलोडनं
उद्भूतं प्रादुर्भूतं ॥ ६१ ॥ यानि चेति हे शोभने देवेषु किंच गंधर्वेषु किंच उरगेषु अन्यानि यानि रत्न भूतानि भूतानि भवंति तानि
मयि एव तिष्टंति हे शोभने हे मनोहरे देवेषु इंद्रादिषु उरगेषु सर्पेषु रत्न भूतानि भूतानि रत्न रूपाणि तानि रत्नानि मयि एव मद्गृहे
एव तिष्टंति स्थिता नीत्यर्थः ॥ ६२ ॥ स्त्री ति हे देवि लोके वयं त्वां स्त्री रत्न भूतां मन्यामहे अतः सा त्वं अस्मान् उपागच्छ अतः

क्षीरोद मथनोद्भूत मश्वरत्नं ममामरैः ॥ उच्चैः श्रवस संज्ञं तत्प्रणिपत्य समर्पि
तं ॥ ६१ ॥ यानि चान्यानि देवेषु गंधर्वेषूरगेषु च ॥ रत्न भूतानि भूतानि तानि मय्येव
शोभने ॥ ६२ ॥ स्त्री रत्न भूतां त्वां देवि लोके मन्यामहे वयं ॥ सा त्वमस्मानुपागच्छ
यतो रत्न भुजो वयं ॥ ६३ ॥ मां वा ममानुजं वापि निशुंभ मुरु विक्रमं ॥ भ-
ज त्वं चंचलापांगि रत्न भूतासि वै यतः ॥ ६४ ॥ ऽऽ ॥ ॐ ॥ ऽऽ ॥ ॐ ॥ ऽऽ

कुतः यतः वयं रत्न भुजः भवामः स्त्री रत्नं भवतीति स्त्री रत्न भूता ताम् स्त्री रत्न भूतां मन्यामहे जानीमः अतः अस्मात् कारणात्
उपागच्छ आभुद्दिं रत्नं भुंजं तीति रत्न भुजः वय मित्यात्म गौरवार्थं बहुवचनं ॥ ६३ ॥ मां वेति हे चंचलापांगि त्वं मां वा मम
अनुजं उरु विक्रमं निशुंभं वापि भज कुतः यतः त्वं रत्न भूता वै असि चंचलौ अपांगौ यस्याः सा चंचलापांगी तत्संबोधने हे चं-
चलापांगि अपांगौ नेत्रांते अनुजं कनिष्टं भ्रातरं उरुः विक्रमो यस्य सः उरुविक्रमः तं उरु विक्रमं उरुः महान् विक्रमः ६३
पराक्रमः यतः यस्मात् कारणात् वै ध्रुवं निश्चयेन ॥ ६४ ॥

हे इति हे धूम्रलोचन त्वं स्वसैन्य परिवारितः सन् आसु केशाकर्षण विह्वलां दुष्टां तां वलात् आनय स्वस्य सैन्यं स्वसैन्यं
स्वसैन्येन परिवारितः स्वसैन्य परिवारितः युक्तः केशानां आखेरणं केशाकर्षणं केश कर्षणेन विह्वला केशाकर्षण विह्वला
तां केशाकर्षण विह्वलां विह्वला आकुला दुर्वचनां तां देवीं वलात् वलात्कारात् आनय प्रापय ॥ ३ ॥ तदिति हे धूम्रलो-
चन तत्परित्राणदः कश्चित् अपरः यदि च उत्तिष्ठते तर्हि त्वया अमरः वा यक्षः अपि वा गंधर्वः एव सः हंतव्यः तस्याः परि-
त्राणं ददातीति तत्परित्राणदः तस्याः देव्याः परित्राणं रक्षणं अपरः अन्यैः अमरः देवः ॥ ४ ॥ ऋषिरुवाच ॥ तेनेति
हे राजन् शीघ्रं तेन आज्ञप्तः धूम्रलोचनः सः दैत्यः सहस्राणां असुराणां षष्ट्या वृतः सन् ततः द्रुतं ययौ तेन शुंभेन आ-

हे धूम्रलोचनाशु त्वं स्वसैन्यपरिवारितः ॥ तामानय वलाद्दुष्टां केशाकर्ष-
णविह्वलां ॥ ३ ॥ तत्परित्राणदः कश्चिद्यदि वोत्तिष्ठतेऽपरः ॥ स हंतव्योऽमरो
वापि यक्षो गंधर्व एव वा ॥ ४ ॥ ऋषिरुवाच ॥ तेनाज्ञप्तस्ततः शीघ्रं स दैत्यो धू-
म्रलोचनः वृतः षष्ट्या सहस्राणामसुराणां द्रुतं ययौ ॥ ५ ॥ स दृष्ट्वा तां ततो दे-
वीं तुहिनाचलसंस्थितां ॥ जगादोच्चैः प्रयाहीति मूलं शुंभनिशुंभयोः ॥ ६ ॥

ज्ञप्तः आज्ञाकृतः असुराणां दैत्यानां वृतः युक्तः ततः तदनंतरं शुंभाज्ञा ग्रहणानंतरं द्रुतं शीघ्रं ययौ जगाम ॥ ५ ॥ स इति
हे राजन् ततः सः तुहिनाचल संस्थितां तां देवीं दृष्ट्वा उच्चैः इति जगाद इतीति किं हे देवि त्वं शुंभनिशुंभयोः मूलं प्रयाहि ततः
तदनंतरं वाम्नानंतरं सद्वृत्तः तुहिनाचले संस्थिता तुहिनाचलसंस्थिता तां तुहिनाचलसंस्थितां तुहिनाचले हिमाचले तां प्रसिद्धां
उच्चैः उच्चस्वरेण जगाद उवाच शुंभश्च निशुंभश्च तौ शुंभनिशुंभौ तयोः शुंभनिशुंभयोः मूलं समीपं प्रयाहि गच्छ विपक्षे
वाधकमाह ॥ ६ ॥ ःः ॥ ॐ ॥ ःः ॥ ॐ ॥ ःः ॥ ॐ ॥ ःः ॥ ॐ ॥ ःः ॥

न चेदिति हे देवि भवती अद्य प्रीत्या मद्भर्तारं न उपेष्यति चेत् ततः एषः अहं केशाकर्षण विह्वलां त्वां वलात् नयामि अद्य इ-
दानीं मम भर्ता मद्भर्ता तं मद्भर्तारं स्वामिनं शुंभं चेत् यदि ततः तर्हि एषः विद्यमानः वलात् वलात्कारात् ॥ ७ ॥ देव्युवाच ॥
दैत्येश्वरेणेति हे दूत दैत्येश्वरेण प्रहितः वलवान् वलसंवृतः त्वं एवं मां वलात् नयसि ततः अहं ते किं करोमि दैत्यानां
ईश्वरः दैत्येश्वरः तेन दैत्येश्वरेण शुंभेन प्रहितः प्रेषितः वलं विद्यते यस्य सः वलवान् वलेन संवृतः वलसंवृतः वले
न सैन्येन संवृतः युक्तः एवं यदि वलात् वलात्कारात् नयसि प्रापयसि ततः तर्हि ते तव ॥ ८ ॥ ऋषिरुवाच ॥ इत्युक्त इति हे राज-

न चेत्प्रीत्याद्य भवती मद्भर्तारमुपैष्यति ॥ ततो वलान्नयाम्येष केशाकर्ष-
णविह्वलां ॥ ७ ॥ देव्युवाच ॥ दैत्येश्वरेण प्रहितो वलवान्वलसंवृतः ॥ वला-
न्नयसि मामेवं ततः किं ते करोम्यहं ॥ ८ ॥ ऋषिरुवाच ॥ इत्युक्तः सोऽभ्यधा-
वत्तामसुरो धूम्रलोचनः ॥ हुंकारेणैव तं भस्म सा चकारांबिका ततः ॥ ९ ॥ अथ
क्रुद्धं महासैन्यमसुराणां तथांबिका ॥ ववर्ष सायकैस्तीक्ष्णैस्तथा शक्तिपरश्वधैः

न इति उक्तः सः धूम्रलोचनः असुरः तां अभ्यधावत् तदा सा अंबिका तं हुंकारेण एव भस्म चकार उक्तः कथितः असु-
रः दैत्यः तां देवीं तदा तस्मिन् काले अंबिका देवी तं धूम्रलोचनं ॥ ९ ॥ अथेति हे राजन् अंबिका तथा क्रुद्धं असुराणां म-
हासैन्यं तीक्ष्णैः सायकैः तथा शक्तिपरश्वधैः ववर्ष अथ अस्य नंतरं धूम्रलोचनवधानंतरं अंबिका देवी असुरा-
णां दैत्यानां महच्च तत् सैन्यं च महासैन्यं तत् महासैन्यं सायकैः वाणैः शक्तयश्च परश्वधाः च ते शक्तिपरश्वधा- २९
स्तैः शक्तिपरश्वधैः ॥ १० ॥ ॐ ॥ ःः ॥ ॐ ॥ ॥ ॐ ॥ ःः ॥ ॐ ॥ ॥ ॐ ॥

निर्नायक सैन्ये देव्याः प्रयासो व्यर्थ इति मत्वा सिंहो युयुधे तत इति हे राजन् ततः देव्याः स्ववाहनः सिंहः धुतसटः सन् कोपात्
सुभैरवं नादं कृत्वा असुरसेनायां पपात ततः तदनंतरं निर्नायक सैन्य दर्शनानंतरं स्वस्य वाहनः धुताः सटाः येन सः
धुतसटः धुताः कंपिताः सटाः ग्रीवा केशाः कोपात् क्रोधात् सुभैरवं महांतं नादं शब्दं असुराणां सेना असुर सेना तस्यां
असुर सेनायां असुराणां दैत्यानां पपात प्राविशत् स्ववाहन इति अर्द्धचोदि त्वात् पुंस्त्वं स्वीय वाहन इत्यर्थः ॥ २१ ॥ कां-
श्चिदिति हे राजन् सः कांश्चित् दैत्यान् करप्रहारेण जघान किंच अपरान् दैत्यान् आस्येन जघान किंच अन्यान् महा-
अधरेण आक्रांत्या जघान सः सिंहः करेण प्रहारः करप्रहारः तेन करप्रहारेण करेण हस्तेन अपरान् अन्यान् आस्ये-

ततो धुतसटः कोपात्कृत्वा नादं सुभैरवं ॥ पपातासुरसेनायां सिंहो देव्याः स्ववाहनः ॥ २१ ॥
कांश्चित् करप्रहारेण दैत्यानास्येन चापरान् ॥ आक्रांत्या चाधरेणान्यान् जघा-
न स महासुरान् ॥ २२ ॥ केषांचित्पाटयामास नखैः कोष्ठानि केशरी ॥ तथा तलप्रहारे-
ण शिरांसि कृतवान्पृथक् ॥ २३ ॥ विच्छिन्नबाहुशिरसः कृतास्तेन तथापरे ॥

न मुखेन अधरेण अधर कायेन यद्वा अधरोष्टेन आक्रांत्या आक्रमणेन ॥ २२ ॥ केषामिति हे राजन् केशरी केषां-
चित् कोष्ठानि नखैः पाटयामास तथा तलप्रहारेण शिरांसि पृथक् कृतवान् केशरी सिंहः कोष्ठानि उदर मध्यानि
तलेन प्रहारः तलप्रहारः तेन तलप्रहारेण तलेन विस्तृतांगुलि पाणिना शिरांसि मस्तकानि पृथक् देहात् भिन्नानि
॥ २३ ॥ विच्छिन्नेति हे राजन् तथा तेन अपरे विच्छिन्न बाहु शिरसः कृताः किंच धुतकेशरः सः अन्येषां को- १००
ष्ठात् रुधिरं पपौ तेन सिंहेन अपरे अन्ये दैत्या बाहवश्च शिरांसि च बाहु शिरांसि बाहु शिरांसि विच्छिन्नानि-

त्वमिति हे दूत सः त्वं गच्छ मया ते यत् एतत् उक्तं तत् सर्वं आदृतः सन् असुरेंद्राय आचक्ष्व किंच यत् युक्तं भवति सः तत् करोतु
ते तुभ्यं उक्तं कथितं आदृतः सन् आदरवान् सन् असुराणां इंद्रः असुरेंद्रः तस्मै असुरेंद्राय असुराणां दैत्यानां इंद्रः श्रेष्ठः
आचक्ष्व कथय युक्तं योग्यं ॥ ७६ ॥ इति श्री नागोजी भट्ट संमत कृते सप्तशती व्याख्याने देव्या दूत संवादो नाम पंचमो
ऽध्यायः ॥ ५ ॥ इत्तीति हे राजन् देव्याः इति वचः आकर्ण्य अमर्ष पूरितः सः दूतः समागम्य दैत्यराजाय विस्तरात् समा-
चष्ट वाक्यं आकर्ण्य श्रुत्वा अमर्षेण पूरितः अमर्ष पूरितः अमर्षेण क्रोधेन पूरितः व्याप्तः समागम्य शुंभ समीपं गत्वा

स त्वं गच्छ मयोक्तं ते यदेतत्सर्वमादृतः ॥ तदाचक्ष्वासुरेंद्राय स च युक्तं करो-
तु यत् ॥ ७६ ॥ इति मार्कण्डेयपुराणे सावर्णिके मन्वंतरे देवीमाहात्म्ये देव्या
दूतसंवादः ॥ ५ ॥ ऋषिरुवाच ॥ इत्याकर्ण्य वचो देव्याः स दूतोऽमर्षपूरितः ॥
समाचष्ट समागम्य दैत्यराजाय विस्तरात् ॥ १ ॥ तस्य दूतस्य तद्वाक्यमा-
कर्ण्यासुरराट् ततः ॥ सक्रोधः प्राह दैत्यानामधिपं धूम्रलोचनं ॥ २ ॥ ✻ ॥

दैत्यानां राजा दैत्य राजः तस्मै दैत्यराजाय विस्तरात् विस्तारात् समाचष्ट उक्तवान् ॥ १ ॥ तस्येति तस्य दूतस्य तत् वाक्यं आ-
कर्ण्य ततः सक्रोधः असुरराट् दैत्यानां अधिपं धूम्र लोचनं प्राह तत् पूर्वोक्तं आकर्ण्य श्रुत्वा ततः तदनंतरं दूत वाक्य
श्रवणानंतरं क्रोधेन सह वर्तमानः सक्रोधः सह वर्तमानः युक्तः असुराणां राट् असुर राट् असुराणां दैत्यानां राट् ८७
राजा शुंभः अधिपं सेनापतिं प्राह उवाच ॥ २ ॥ ऽऽ ॥ ✻ ॥ ऽऽ ॥ ✻ ॥ ऽऽ ॥ ✻ ॥ ऽऽ ॥

आनयने प्रकार इय माह केशेष्विति हे चंड हे मुंड केशेषु आकृष्य वा बध्वा यदि वः युधि संशयः भवति तदा अशेषायुधैः सर्वैः असुरैः सा विनिहन्यतां केशेषु केशैरित्यर्थः वा यद्वा यः वां युवयोः युधि संग्रामे संशयः संदेहः तदा तर्हि अशेषाणि आयुधानि येषां ते अशेषायुधाः तैः अशेषायुधैः अशेषाणि समस्तानि आयुधानि शस्त्राणि सर्वैः समस्तैः असुरैः दैत्यैः सा देवी विनिहन्यतां ॥ २९ ॥ उपसंहरति तस्यामिति हे चंड हे मुंड युवाभ्यां दुष्टायां तस्यां हतायां सत्यां किंच सिंहे विनिपातिते सति आयतां अंबिकां बध्वा गृहीत्वा शीघ्रं आगम्यतां दुष्टायां दुर्वचनायां तस्यां अंबिकायां हतायां सत्यां प्राप्तायां सत्यां सिंहे च विनिपातिते सति प्रहारिते सति अथेति पक्षांतरं अंबिकां देवीं वा यद्वा ॥ ३० ॥ इति श्रीनागोजी

केशेष्वाकृष्य बध्वा वा यदि वः संशयो युधि ॥ तदाशेषायुधैः सर्वैरसुरैर्विनिहन्यतां ॥ २९ ॥ तस्यां हतायां दुष्टायां सिंहे च विनिपातिते ॥ शीघ्रमागम्यतां बध्वा गृहीत्वा तामथांबिकां ॥ ३० ॥ इति मार्कंडेयपुराणे सावर्णिके मन्वंतरे देवीमाहात्म्ये शुंभनिशुंभसेनानीधूम्रलोचनवधः ॥ ६ ॥ ऋषिरुवाच ॥ आज्ञप्तास्ते ततो दैत्याश्चंडमुंडपुरोगमाः ॥ चतुरंगबलोपेता ययुरभ्युद्यतायुधाः ॥ १ ॥

भट्टकृते सप्तसती व्याख्याने धूम्रलोचनवधो नाम षष्ठोऽध्यायः ॥ ६ ॥ ऋषिरुवाच ॥ आज्ञप्ता इति हे राजन् ततः आज्ञप्ताः चंडमुंडपुरोगमाः चतुरंगबलोपेताः दैत्याः तु अभ्युद्यतायुधाः संतः तेन शुंभेन आज्ञप्ताः आज्ञा कृताः चंडश्च मुंडश्च चंडमुंडौ चंडमुंडौ पुरोगमौ येषां ते चंडमुंडपुरोगमाः पुरोगमौ अग्रसरौ चत्वारि अंगानि यस्य तत् च तुरंगं तुरंगं च तत् बलं च चतुरंगबलं चतुरंगबलेन उपेताः चतुरंगबलोपेताः चतुरंगं हस्त्यश्वरथपदातितलं सैन्यं उपेताः युक्ताः अभ्युद्यतायुधाः निष्काशितायुधाः ययुः जग्मुः

ददृशुरिति शैलेंद्रशृंगे हिमाचलशृंगे सिंहस्योपरि स्थितामित्यन्वयः ॥ २ ॥ ते इति चंडादयः प्रधानाः समादातुं ... उद्यमं उद्योगं उद्यताः उत्साहवंतो जाताः आकृष्टचापासिधराः संतः तत्समीपगाः गृहीतुमुद्यतानां रक्षणार्थं समीपगाः

ददृशुस्ते ततो देवीमीषद्धासां व्यवस्थितां ॥ सिंहस्योपरि शैलेंद्रशृंगे महति कांचने ॥ २ ॥ ते दृष्ट्वा तां समादातुमुद्यमं चक्रुरुद्यताः ॥ आकृष्टचापासिधरास्तथान्ये तत्समीपगाः ॥ ३ ॥ ततः कोपं चकारोच्चैरंबिका तानरीन्प्रति ॥ कोपेन चास्या वदनं मसीवर्णमभूत्तदा ॥ ४ ॥ भ्रुकुटीकुटिलात्तस्या ललाटफलकाद्द्रुतं ॥ काली करालवदना विनिष्क्रांतासिपाशिनी ॥ ५ ॥

इत्यर्थः ॥ ३ ॥ अनेन चंडादीनामपि नामसत्वं ध्वनितं अतस्तद्धार्यमिति तां समीप्राप्य प्रादुर्भाव नाहतत् इति मसी लिपिसाधन द्रव्यं तद्वत् श्यामवर्णमित्यर्थः कालीप्रति बिंबादि तिभावः भ्रुकुटीति तस्याः कुपितदेव्याः विनिःक्रांता निःसृता ॥ ५ ॥ १०३

विचित्रेति कथंभूता काली विचित्र खट्वांगधरा तीति धरा विचित्रं तत खट्वांगं विचित्र खट्वांगं तस्य धरा विचित्र खट्वांगधरा
धरति धारयति विचित्रं नाना विधं खट्वांगं पत्रिका कंकालं यद्वा पंजरास्थि पुनः कथंभूता काली नरमाला विभूषणा नरमाला वि-
भूषणं यस्याः सा नर माला विभूषणा नरमाला मुंडमाला नरमाले त्यत्र नरशब्दस्तु मुंडमाला लाक्षणिकः पुनः कथंभूता का-
ली द्वीपिचर्म परीधाना द्वीपिनः चर्म द्वीपिचर्म परीधाना द्वीपी व्याघ्रः परीधानं वस्त्रं पुनः कथंभूता काली शुष्कमांसा शुष्कं
मांसं यस्याः सा शुष्क मांसा अर्थात् निर्मांस देहा पुनः कथंभूता काली अतिभैरवा अतिभयं रवो यस्याः सा अतिभैरवा
अति अत्यंतं भयं भयंकरं रवः शब्दः ॥ ६ ॥ अतीति पुनः कथंभूता काली अति विस्तार वदना अति विस्तारो यस्य तत्

विचित्र खट्वांग धरा नरमाला विभूषणा ॥ द्वीपिचर्म पराधीना शुष्क मां-
सा ति भैरवा ॥ ६ ॥ अति विस्तार वदना जिह्वा ललन भीषणा ॥
निमग्ना रक्त नयना नादा पूरित दिङ्मुखा ॥ ७ ॥ ॥ ॥ ॥

अति विस्तारं अति विस्तारं वदनं यस्याः सा अति विस्तारवदना अति अतिशयितः वदनं मुखं पुनः कथंभूता काली जिह्वा
ललन भीषणा जिह्वाया ललनं जिह्वाललनं जिह्वाललने भीषणा जिह्वाललनभीषणा ललनं चालनं भीषणा भयंकरी
पुनः कथं भूता काली निमग्ना रक्त नयना आरक्तानि च तानि नयनानि च आरक्त नयना निमग्नानि आरक्त
नयनानि यस्याः सा निमग्ना रक्तनयना आरक्तानि अरुणानि नयनानि नेत्राणि निमग्नानि निम्न प्रविष्टानि
पुनः कथंभूता काली नादा पूरित दिङ्मुखा दिशां मुखं दिङ्मुखं नादेन आपूरितं दिङ्मुखं यया सा नादापूरित दिङ्मुख
नादेन शब्देन आपूरितं व्याप्तं ॥ ७ ॥

दु० टी० १०२

बाहु शिरांसि येषां ते विछिन्नबाहु शिरसः सः सिंहः अन्येषां दैत्यानां कोष्ठात् उदर मध्यादिति ॥ २४ ॥ क्षणेनेति हे राजन् म-
हात्मना देव्या वाहनेन अति कोपिना तेन केशरिणा सर्वं तत् बलं क्षणेन क्षयं नीतं महात्मना बलवता अति कोपोस्यास्तीति अ-
तिकोपी तेन अतिकोपिना अति कोपः अति क्रोधः केशरिणा सिंहेन सर्वं समस्तं बलं सैन्यं क्षणेन क्षणमात्रेण क्षयं नाशं
नीतं प्रापितं ॥ २५ ॥ श्रुत्वेति हे राजन् देव्या निहतं तं धूम्रलोचनं असुरं श्रुत्वा किंच देवी केशरिणा कृत्स्नं बलं क्षयितं श्रु-
त्वा ततः दैत्याधिपतिः शुंभः प्रस्फुरिताधरः सन् चुकोप किंच तौ महासुरौ चंडमुंडौ आज्ञापयामास निहतं प्रहारितं अ-

पपौ च रुधिरं कोष्ठादन्येषां धुतकेशरः ॥ २४ ॥ क्षणेन तद्बलं सर्वं क्षयं नीतं महात्मना
तेन केशरिणा देव्या वाहनेनाति कोपिना ॥ २५ ॥ श्रुत्वा तमसुरं देव्या निहतं
धूम्र लोचनं ॥ बलं च क्षयितं कृत्स्नं देवी केशरिणा ततः ॥ २६ ॥ चुकोप दैत्या
धिपतिः शुंभः प्रस्फुरिताधरः ॥ आज्ञापयामास च तौ चंडमुंडौ महासुरौ ॥ २७ ॥ हे चंड
हे मुंड बलै र्बहुलैः परिवारितौ ॥ तत्र गच्छत गत्वा च सा समानीयतां लघु ॥ २८ ॥

सुरं दैत्यं देव्या केशरी देवी केशरी तेन देवी केशरिणा केशरी सिंहः कृत्स्नं समस्तं बलं सैन्यं क्षयितं नाशितं ततः तदनंतरं
धूम्रलोचन वध श्रवणानंतरं ॥ २६ ॥ दैत्यानां अधिपतिः दैत्याधिपतिः अधिपतिः स्वामी प्रस्फुरितः अधरो यस्य सः प्रस्फुरि-
ताधरः प्रस्फुरितः कंपितः अधरः अधरोष्टः तौ पूर्वोक्तौ महांतौ च तौ असुरौ च महासुरौ असुरौ दैत्यौ चंडश्च मुंडश्च तौ चंड
मुंडौ ॥ २७ ॥ हे चंडेति हे चंड हे मुंड युवां बहुलैः बलैः परिवारितौ संतौ तत्र गच्छत किंच गत्वा युवाभ्याम् सा समानीयतां ब-
हुलैः बहुभिः बलैः सैन्यैः परिवारितौ संतौ रक्षितौ संतौ तत्र तस्मिन् देवी निकटे गच्छत गच्छतं ॥ न्दो नुरोधा द्दिंदु लोपस्त

॥ दुर्गापाठ ॥ १०१

दु० टी० १०६ तैरितिहे राजन् सा तैः असुरैः मुक्तानि शस्त्राणि तथा महास्त्राणि मुखेन जग्राह किंच दशनैः मथितान्यपि तैः प्रसिद्धैः असु- १०५
रैःदैत्यैः मुक्तानि क्षिप्तानि महास्त्राणि ब्रह्मास्त्रादीनि रुषा क्रोधेन दशनैः दंतैः मथितान्यपि मथितानी चूर्णीकृतानीत्यर्थः ॥२२॥
बलिनामिति हे राजन् सा बलिनां महात्मनां असुराणां सर्वं तत् बलं ममर्द किंच अन्यान् अभक्षयत् तथाच अन्यान् अता-
डयत् सा काली बलमस्ति येषां ते बलिनः तेषां बलिनां बलं पराक्रमः महात्मनां महादेहानां असुराणां दैत्यानां सर्वं समस्तं
बलं सैन्यं ममर्द अमर्दयत् अन्यान् दैत्यान् ॥२३॥ असिनेति हे राजन् तया केचित् दैत्याः असिना निहताः संतः विना-

तैर्मुक्तानि च शस्त्राणि महास्त्राणि तथासुरैः ॥ मुखेन जग्राह रुषा दशनैर्म-
थितान्यपि ॥ २२ ॥ बलिनां तद्बलं सर्वमसुराणां महात्मनां ॥ ममर्दाभ-
क्षयच्चान्यानन्यांश्चाताडयत्तथा ॥ २३ ॥ असिना निहताः केचित्केचि-
त्खट्वांगताडिताः ॥ जग्मुर्विनाशमसुरा दंताग्राभिहतास्तथा ॥ २४ ॥ क्षणेन
तद्बलं सर्वमसुराणां निपातितं ॥ दृष्ट्वा चंडोभिदुद्राव तां कालीमतिभीषणां ॥ २५ ॥

शं जग्मुः केचिद्दैत्याः खट्वांग ताडिताः संतः विनाशं जग्मुः तया केचित् असुराः दंताग्राभिहताः संतः विनाशं जग्मुः तया का-
ल्या असिना खड्गेन निहताः संतः प्रहारिताः संतः असुराः दैत्याः दंतानां अग्राणि दंताग्राणि तैः दंताग्रैः अभिहता दंताग्रा-
भिहताः अभिहताः ताडिताः विनाशं मरणं जग्मुः प्रापुः ॥२४॥ क्षणेनेति तया असुराणां सर्वं तत् बलं क्षणेन निपातितं
दृष्ट्वा चंडः अतिभीषणां तां कालीं अभिदुद्राव तया काल्या असुराणां दैत्यानां सर्वं समस्तं बलं सैन्यं क्षणेन क्षणमात्रेण नि- १०६
पातितं प्रहारितं अतिभीषणां अतिभयंकरीं तां प्रसिद्धां ॥ २५ ॥

दु० टी० १०७ शरेति हे राजन् महासुरः चंडः महाभीमैः शरवर्षैः किंच सुंडः सहस्रशः क्षिप्तैः चक्रैः भीमा क्षीतां छादयामास महासुरः म- १०
हादैत्यः महाभीमैः महाभयंकरैः शराणां वर्षाणि शरवर्षाणि तैः शरवर्षैः शराणां बाणानां वर्षाणि वृष्टयः भीमानि अक्षी-
णि यस्याः सा भीमा क्षीतां भीमाक्षीं भीमानि भयंकराणि अक्षीणि नेत्राणि तां देवीं ॥ २६ ॥ तानीति हे राजन् तन्मुखं विश-
मानानि अनेकानि तानि चक्राणि घनोदरं विशमानानि सुबहूनि अर्कबिंबानि यथा बभुः तस्याः मुखं तन्मुखं तस्याः
काल्याः विशमानानि प्रविष्टानि घनस्य उदरं घनोदरं तत् घनोदरं घनस्य मेघस्य उदरं मध्यं विशमानानि प्रविष्टानि सुब-
हूनि अनेकानि अर्कबिंबानि अर्कस्य सूर्यस्य बिंबानि मंडलानि यथा इव बभुः शुशुभिरे ॥ २७ ॥ तत इति हे राजन् ततः

शरवर्षैर्महाभीमैर्भीमाक्षीं तां महासुरः ॥ छादयामास चक्रैश्च सुंडः क्षिप्तैः
सहस्रशः ॥ २६ ॥ तानि चक्राण्यनेकानि विशमानानि तन्मुखं ॥ बभुर्यथार्-
कबिंबानि सुबहूनि घनोदरं ॥ २७ ॥ ततो जहासातिरुषा भीमं भैरवनादि-
नी ॥ काली करालवक्त्रांतर्दुर्दर्शदशनोज्ज्वला ॥ २८ ॥ ❀ ॥ ऽऽ ॥ ❀ ॥

तदनंतरं सा काली अतिरुषा भीमं यथा स्यात्तथा जहास अतिक्रोधेन भीमं भयंकरं यथा स्यात्तथा काली भूता काली भैरव-
नादिनी भैरवः नादो यस्याः सा भैरवनादिनी भैरवः भयंकरः नादः शब्दः पुनः कथंभूता काली करालवक्त्रांतर्दुर्दर्शदशनो-
ज्ज्वला दुर्दर्शाश्चते दशना दुर्दर्शदशना करालं च तत् वक्त्रं करालवक्त्रं करालं वक्त्रस्य अंतः करालवक्त्रांतः करालवक्त्रांते दु-
र्दर्शदशना करालवक्त्रांतर्दुर्दर्शदशना करालवक्त्रांतर्दुर्दर्शदशनैः उज्ज्वला करालवक्त्रांतर्दुर्दर्शदशनोज्ज्वला दुर्दर्शाः भयं- १०७
कराः दशनाः दंताः करालं भयंकरं वक्त्रं मुखं अंतः मध्यं उज्ज्वला तेजोमया ॥२८॥

दु॰ उत्थायचेति सादेवी महा सिंहं उत्थायहमित्युक्ता चंडं अधावत् किंचकेशेषु ग्रहीत्वा अस्यशिरः तेन असिना आच्छिनत्तम- १०८
टी॰ हंत्यासौ असिश्च महासिः तं महासिं असिः खड्गः केशेषु केशान् अस्यचंडस्य शिरः मस्तकं असिना खड्गेन ॥ २९॥ अथे-
१९८ ति हेराजन् अथ चंडं निपातितं दृष्ट्वा मुंडः तां अभ्यधावत् सारुषा खड्गाभिहतं अपि भूमौ आपातयत् अथ अथेत्यनंतरं
चंडवधानंतरं निपातितं प्रहारितं सा काली रुषा क्रोधेन खड्गेन अभिहतः तं खड्गाभिहतं अभिहतः ताडितः तं मुंडं ॥ ३०॥
हत इति हे राजन् ततः हतशेषं सैन्यं चंडं किंच सुमहावीर्यं मुंडं निपातितं दृष्ट्वा दिशः भयातुरं यथा स्यात्तथा भेजे ततनंत-

उत्थायच महासिंहं देवी चंडमधावत ॥ ग्रहीत्वा चास्य केशेषु शिरस्तेना-
सिनाच्छिनत् ॥ २९॥ अथ मुंडोप्यधावत्तां दृष्ट्वा चंडं निपातितं ॥ तमप्य-
पातयद्भूमौ साखड्गाभिहतंरुषा ॥ ३०॥ हतशेषं ततः सैन्यं दृष्ट्वा चंडं नि-
पातितं ॥ मुंडंच सुमहावीर्यं दिशोभेजे भयातुरं ॥ ३१॥ शिरश्चंडस्य काली
चग्रहीत्वा मुंडमेवच ॥ प्राह प्रचंडाट्टहास मिश्रमभ्येत्यचंडिकां ॥ ३२॥ ॐ ॥ ६

नंतरं चंडमुंडवधानंतरं हतात् शेषं हतशेषं हतात् प्रहारितात् शेषं अवशिष्टं महत् वीर्यं यस्य सः महावीर्य स्तं महावी-
र्यं वीर्यं पराक्रमः निपातितं प्रहारितं भयेन आतुरं भयातुरं आतुरं व्याकुलं ॥ ३१॥ शिर इति हे राजन् काली चंडस्य
शिरः किंच मुंडं एव गृहीत्वा चंडिकां अभ्येत्य चंडाट्टहास मिश्रं यथा स्यात्तथा प्राह शिरः मस्तकं मुंडं एव स शिरस्कं
एव चंडिका देवी अभ्येत्य अभिमुखमागत्य प्रचंड श्चासौ अट्टहासश्च प्रचंडाट्टहासः प्रचंडाट्टहासेन मिश्रं प्रचंडाट्ट- १९८
हासमिश्रं प्रचंडः महान् मिश्रं युक्तं प्राह ॥ ३२॥

दु॰ सेति हे राजन् सुरारीणां तत्र सैन्ये वेगेन अभिपतिता सा महासुरान् घातयंती सती तद्बलं अभक्षयत सुराणां अरयः सुरा- १०९
टी॰ रयः तेषां सुरारीणां सुराणां देवानां अरयः शत्रवः दैत्याः तत्र तस्मिन् सैन्ये सा देवी महासुरान् महादैत्यान् बलं सैन्यं ॥ ८॥ पार्ष्णी-
२०४ ति हे राजन् आयार्ष्णि ग्राहांकुशग्राहि योधघंटा समन्वितान् वारणान् एकहस्तेन समादाय मुखे चिक्षेप सा देवी घंटाभिः स-
मन्विताः घंटा समन्विताः पार्ष्णि ग्राहाश्च अंकुशग्राहिणश्च योधाश्च घंटा समन्विताश्च ते पार्ष्णि ग्राहांकुशग्राहि योध
घंटासमन्विताः तान् समन्विताः युक्ताः पार्ष्णिग्राहाः गज पार्श्व रक्षकाः अंकुश ग्राहिणः महामात्राः योधाः गजारूढा
वीराः वारणान् हस्तिनः एक श्चासौ हस्तश्च एकहस्तः तेन एकहस्तेन समादाय गृहीत्वा ॥ ९॥ तथैवेति हे राजन् तथैव

सावेगेनाभिपतिता घातयंती महासुरान् ॥ सैन्येतत्र सुरारीणामभक्षय-
त तद्बलं ॥ ८॥ पार्ष्णिग्राहांकुशग्राहि योधघंटासमन्वितान् ॥ समादायैक-
हस्तेन मुखे चिक्षेप वारणान् ॥ ९॥ तथैव योधं तुरगै रथं सारथिना सह ॥ नि-
क्षिप्य वक्त्रे दशनैश्चर्वयंत्यति भैरवं ॥ १०॥ एकं जग्राह केशेषु ग्रीवा-
यामथ चापरं ॥ पादेनाक्रम्य चैवान्य मुरसान्य मपोथयत् ॥ ११॥ ॐ ॥ ९

योधं तुरगैः सारथिना सह रथं वक्त्रे निक्षिप्य दशनैः अतिभैरवं यथा स्यात्तथा अति चर्वयंती योधं योद्धारं योधमि-
ति जातावेक वचनं तुरगैः अश्वैः वक्त्रे मुखे निक्षिप्य गृहीत्वा दशनैर्दंतैः अतिभैरवं अतिभयंकरं यथा स्यात्त-
था चर्वयन्तीति वर्त्तमान समीप्ये भूते लट् ॥ १०॥ एकमिति हे राजन् सा एकं केशेषु जग्राह अथ अपरं अन्यं
ग्रीवायां जग्राह किंच अन्यं पादेन एव आक्रम्य उरसा अपोथयत् तत्काली ग्रीवायां एकं पादेन चरणेन उरसा वक्षस्थ- २०४
लेन अपोथयत् अवधीत् ॥ ११॥

दु० टी० ११० सति विनिपातिते सति स्फुटे सति बहुलेषु अनेकेषु क्षयितेषु सत्सु कोपेन पराधीनं चेतो यस्य सः कोपपराधीनचेताः कोपेन क्रोधेन पराधीनं परतंत्रं चेतः अंतःकरणं प्रतापो विद्यते यस्य सः प्रतापवान् प्रतापः तेजः असुराणां ईश्वरः असुरेश्वरः असुराणां दैत्यानां ईश्वरः स्वामी सः इति ततः सर्वाणि सैन्यानि येषां ते सर्वसैन्याः तेषां सर्वसैन्यानां सर्वाणि समस्तानि उद्योगं उद्यमं आदिदेश आज्ञापयामास ह इति पादपूरणे ॥२॥ अद्येति अद्य सर्वैर्बलैः सहिताः दैत्याः निर्यांतु उदायुधाः षट् अशीतिः दैत्या निर्यांतु किंच कंबूनां चतुः अशीति दैत्याः स्वबलैः वृताः संतः निर्यांतु अद्य इदानीं वर्तमानकाले सर्वै

बहुलेषु च सैन्येषु क्षयितेष्वसुरेश्वरः ॥१॥ ततः कोपपराधीनचेताः शुंभः प्रतापवान् ॥ उद्योगं सर्वसैन्यानां दैत्यानामादिदेश ह ॥२॥ अद्य सर्वबलैर्दैत्याः षडशीतिरुदायुधाः ॥ कंबूनां चतुरशीतिर्निर्यांतु स्वबलैर्वृताः ॥ कोटिवीर्याणि पंचाशदसुराणां कुलानि वै ॥ शतं कुलानि धौम्राणां निर्गच्छंतु ममाज्ञया ॥४॥ ॥ SS ॥ ॥ SS ॥ ॥S

णि च तानि बलानि च सर्वबलानि तैः सर्वबलैः सर्वाणि समस्तानि बलानि सैन्यानि सहिताः युक्ताः निर्यांतु निर्गच्छंतु उदायुधाः उदायुधनामानः कंबूनां कंबुनाम्नां स्वस्य बलानि स्वबलानि तैः स्वबलैः बलानि सैन्यानि वृताः संतः वेष्टिताः संतः निर्यांतु निर्गच्छंतु ॥३॥ कोटीति मम आज्ञया कोटिवीर्याणि असुराणां पंचाशत् कुलानि वै निर्गच्छंतु धौम्राणां शतं कुलानि निर्गच्छंतु कोटिवीर्याणि कोटिवीर्यनामानः दैत्याः असुराणां दैत्यानां कुलानि वृंदानि वै इति निश्चयेन धौम्राणां धूम्रवंशोद्भवानां दैत्यानां कुलानि वृंदानि ॥४॥

दु० टी० १११ कालकादौ इति कालकाः दौर्हृदाः मौर्याः तथा कालकेयाः असुराः युद्धाय सज्जाः संतः मम आज्ञया त्वरिता निर्यांतु कालकाः कालकनामानः दैत्याः दौर्हृदाः दुर्हृदवंशजाः दैत्याः मौर्याः मौर्यनामानः दैत्याः कालकेयाः अपत्यानि पुमांसः कालकेयाः असुराः दैत्याः युद्धाय संग्रामाय सज्जाः संनद्धसामग्रीकाः संतः त्वरिताः शीघ्रं निर्यांतु निर्गच्छंतु ॥५॥ इतीति हे राजन् इति आज्ञाप्य भैरवशासनः असुरपतिः शुंभः बहुभिः महासैन्यसहस्रैः वृतः सन् निर्जगाम इति अनेन प्रकारेण यथा ज्ञाप्य आज्ञां कृत्वा भैरवं शासनं यस्य सः भैरवशासनः भैरवं उग्रं शासनं आज्ञा असुराणां पतिः असुरपतिः

कालका दौर्हृदा मौर्याः कालकेयास्तथासुराः ॥ युद्धाय सज्जा निर्यांतु आज्ञया त्वरिता मम ॥५॥ इत्याज्ञाप्यासुरपतिः शुंभो भैरवशासनः ॥ निर्जगाम महासैन्यसहस्रैर्बहुभिर्वृतः ॥६॥ आयांतं चंडिका दृष्ट्वा तत्सैन्यमतिभीषणं ॥ ज्यास्वनैः पूरयामास धरणीगगनांतरं ॥७॥

असुराणां दैत्यानां पतिः स्वामी बहुभिः असंख्यातैः महांति च तानि सैन्यानि च महासैन्यानि महासैन्यानां सहस्राणि महासैन्यसहस्राणि तैः महासैन्यसहस्रैः वृतः सन् वेष्टितः सन् ॥६॥ आयांतमिति हे राजन् चंडिका अतिभीषणं तत्सैन्यं आयांतं दृष्ट्वा धरणीगगनांतरं ज्यास्वनैः पूरयामास चंडिका देवी अतिभीषणं अतिभयंकरं तत्सैन्यं आयांतं आगतं धरणी च गगनं च धरणीगगने धरणीगगनयोः अंतरं धरणीगगनांतरं धरणी पृथ्वी गगनं आकाशं अंतरं मध्यं ज्यायाः स्वनाः ज्यास्वनाः तैः ज्यास्वनैः ज्यायाः प्रत्यंचायाः स्वनाः शब्दाः पूरयामास ॥७॥ १११

दु॰ टी॰ ९९ ततइति हे नृप ततः सिंहः अतीव महानादं कृतवान् अंबिका घंटा स्वनेन तान्नादान् उपबृंहयत् ततः तदनंतरं ज्या स्वनैः ५१
धरणी गगनान्तरं व्यापना नंतरं अतीव अत्यंत मेव महानादं महांश्चासौ नादश्च महानादः तं महानादं नादः शब्दः अं-
बिका देवी घंटायाः स्वनः सः तेन घंटा स्वनेन स्वनः शब्दः तस्य नादाः तन्नादाः तान् तन्नादान् तस्य सिंहस्य नादाः शब्दाः
उपबृंहयत वर्द्धयत ॥८॥ धनुः इति हे राजन् धनुर्ज्या सिंह घंटानां भीषणैः निनादैः नादापूरित दिङ्मुखा विस्तारिताननाः
काली जिग्ये धनुषः ज्या धनुर्ज्या धनुर्ज्या च सिंहश्च घंटा च ताः धनुर्ज्या सिंह घंटाः तासां धनुर्ज्या सिंह घंटानां ज्या प्रत्यंचा भी-
षणैः भयंकरैः निनादैः शब्दैः दिशां मुखं दिङ्मुखं नादैः आपूरितं दिङ्मुखं यया सा नादा पूरित दिङ्मुखा नादैः शब्दैः

ततः सिंहो महानाद मतीव कृतवान् नृप ॥ घंटास्वनेन तन्नादा नंबिका-
चोप बृंहयत् ॥ ८ ॥ धनुर्ज्या सिंहघंटानां नादापूरित दिङ्मुखा ॥ निना-
दैर्भीषणैः काली जिग्ये विस्तारिताननाः ॥ ९ ॥ तं निनाद मुपश्रुत्य दैत्य-
सैन्यैश्चतुर्दिशं ॥ देवी सिंहस्तथा काली सरोषैः परिवारिताः ॥ २० ॥ ६४

आपूरितं व्याप्तं विस्तारितं आननं यया सा विस्तारितानना आननं मुखं जिग्ये जिता देव्या धनु रादि शब्दैः काली
शब्दो जित इति भवति ॥ ९ ॥ तमिति हे राजन् तन्निनादं उपश्रुत्य चतुर्दिशं सरोषैः दैत्य सैन्यैः देवी सिंहस्तथा काली परि-
वारिताः तेषां निनादः तन्निनादः तं तन्निनादं तेषां धनुर्ज्या सिंहः घंटानां निनादः शब्दः उपश्रुत्य श्रुत्वा चतुर्दिशं
चतुर्दिक्षु रोषेण सह वर्तमानानि सरोषाणि तैः सरोषैः रोषेण क्रोधेन सह वर्तमानानि तानि दैत्यानां सैन्यानि दैत्य सैन्या-
नि दैत्य सैन्यानि तैः दैत्य सैन्यैः चंडी काली ललाटजा परिवारिता वेष्टिता ॥ २० ॥

दु॰ टी॰ ९९ मयेति हे देवि मया महा पशू चंड मुंडौ तव उपहृतौ अत्र युद्ध यज्ञे त्वं स्वयं शुंभं किंच निशुंभं हनिष्यसि महांतौ च तौ पशू च म-
हापशू चंडश्च मुंडश्च तौ चंड मुंडौ उपहृतौ उपहारी कृतौ अत्र अस्मिन् युद्ध एव यज्ञः तस्मिन् युद्ध यज्ञे ॥ २३ ॥ ऋषिरुवाच ॥
तावितिहे राजन् ततः आनीतौ महासुरौ तौ चंड मुंडौ दृष्ट्वा कल्याणी चंडिका कालीं ललितं वचः उवाच ततः तदनंतरं काली
वाक्य श्रवणा नंतरं महांतौ च तौ असुरौ च महासुरौ तौ महासुरौ असुरौ दैत्यौ तौ प्रसिद्धौ चंडश्च मुंडश्च तौ चंड मुंडौ तौ चं-
डमुंडौ कल्याणी कल्याण कर्त्री चंडिका कौशिकी कालीं ललाट भवां देवीं ललितं मनोहरं वचः वाक्यं ॥ २४ ॥ यस्मादिति

मया तवात्रोप हृतौ चंड मुंडौ महा पशू ॥ युद्ध यज्ञे स्वयं शुंभं निशुंभं च हनिष्यसि
॥ २३ ॥ ऋषिरुवाच ॥ तावानीतौ ततो दृष्ट्वा चंड मुंडौ महासुरौ ॥ उवाच कालीं कल्या-
णी ललितं चंडिका वचः ॥ २४ ॥ यस्माच्चंडं च मुंडं च गृहीत्वा त्व मुपागता ॥ चामुंडे-
ति ततो लोके ख्याता देवि भविष्यसि ॥ २५ ॥ इति मार्कंडेय पुराणे सावर्णिके मन्वं-
तरे देवी माहात्म्ये चंडमुंड वधः ॥ ७ ॥ ऋषिरुवाच ॥ चंडे च निहते दैत्ये मुंडे च विनिपातिते

हे देवि यस्मात् त्वं चंडं किंच मुंडं गृहीत्वा उपागता ततः त्वं लोके चामुंडा इति ख्याता भविष्यसि यस्मात् कारणात् उपागता
प्राप्ता ततः तस्मात् कारणात् ॥ २५ ॥ इति श्री नागोजी भट्ट संमत कृते सप्तशती व्याख्याने चंड मुंड वधो नाम सप्तमोऽध्यायः
॥ ७ ॥ ऋषिरुवाच ॥ चंडे इति हे राजन् दैत्ये चंडे निहते सति किंच मुंडे विनिपातिते सति किंच बहुलेषु सैन्येषु क्षयितेषु १०२
सत्सु कोप पराधीन चेताः प्रतापवान् असुरेश्वरः ततः शुंभः सर्व सैन्यानां दैत्यानां उद्योगं आदिदेश ह निहते सति प्रहारिते

दु॰ टी॰ ११४

हंसेति हे राजन् हंसयुक्त विमानाग्रे स्थिता साक्षसूत्रकमंडलुः सा ब्रह्मणः शक्तिः आयाता सा कथ्यते ब्रह्माणी अभिधीयते हंसैर्युक्तं हंसयुक्तं हंसयुक्तं च तत् विमानं च हंसयुक्तविमानं हंसयुक्तस्य विमानस्य अग्रं हंसयुक्तविमानाग्रं तस्मिन् हंसयुक्तमानाग्रे अक्षसूत्रं च कमंडलुश्च अक्षसूत्रकमंडलू ताभ्यां सह वर्त्तमाना साक्षसूत्रकमंडलुः अक्षसूत्रं जपमाला सह वर्तमाना युक्ता शक्तिः स्वभ्रतिरेकिणी देवता आयाता आगता अभिधीयते कथ्यते ॥२४॥ माहेश्वरीति हे राजन् वृषारूढा त्रिशूलवरधारिणी महाहिवलया चंद्ररेखाविभूषणा माहेश्वरी प्राप्ता वृषे आरूढा।

हंसयुक्तविमानाग्रे साक्षसूत्रकमण्डलुः ॥ आयाता ब्रह्मणः शक्तिर्ब्रह्माणी साभिधीयते ॥२४॥ माहेश्वरी वृषारूढा त्रिशूलवरधारिणी ॥ महाहिवलया प्राप्ता चन्द्ररेखाविभूषणा ॥२५॥ कौमारी शक्तिहस्ता च मयूरवरवाहना ॥ योद्धुमभ्याययौ दैत्यानंबिका गुहरूपिणी ॥२६॥

वृषारूढा आरूढा स्थिता त्रिशूलं च वरं च त्रिशूलवरे त्रिशूलवरयोः धारिणी त्रिशूलवरधारिणी महाही वलयौ यस्याः सा महाहिवलया महाही तक्षकौ तौ वलयौ कंकणौ चंद्रस्य रेखा चंद्ररेखा चंद्ररेखा विभूषणं यस्याः सा चंद्ररेखाविभूषणा रेखा कला ॥२५॥ कौमारीति हे राजन् शक्तिहस्ता मयूरवरवाहना गुहरूपिणी कौमारी अंबिका दैत्यान् योद्धुं अभ्याययौ शक्तिः हस्ते यस्याः सा शक्तिहस्ता मयूरवरं वाहनं यस्याः सा मयूरवरवाहना मयूरवरं मयूरश्रेष्ठं गुहरूपिणी गुहसमानाकारा कौमारी कुमारसंबंधिनी अंबिका शक्तिः ॥२६॥ ११

दु॰ टी॰ ११५

तथैवेति हे राजन् तथैव गरुडोपरि संस्थिता शंखचक्रगदाशार्ङ्गखड्गहस्ता वैष्णवी शक्तिः अभ्युपाययौ गरुडस्य उपरि गरुडोपरि शंखं चक्रं च गदा च शार्ङ्गश्च खड्गश्च ते शंखचक्रगदाशार्ङ्गखड्गास्ते हस्तेषु यस्याः सा शंखचक्रगदाशार्ङ्गखड्गहस्ता शार्ङ्गं धनुः अत्र शार्ङ्गपदेन बाणोप्युपलक्ष्यते वैष्णवी विष्णुसंबंधिनी बाहुभिर्गरुडारूढा शंखचक्रगदासिनी शार्ङ्गबाणधराजाता वैष्णवी रूपशालिनीति वामनपुराणात् एतेनास्याः षड्भुजत्वं ॥२७॥ यज्ञेति हे राजन् अतुलं यज्ञवाराहं रूपं बिभ्रतः हरेः वाराहीं तनुं बिभ्रती या शक्तिः भवति सा अपि तत्र आययौ अतुलं महत् यज्ञवाराहं यज्ञाय कल्पितं वा-

तथैव वैष्णवी शक्तिर्गरुडोपरिसंस्थिता ॥ शंखचक्रगदाशार्ङ्गखड्गहस्ताभ्युपाययौ ॥२७॥ यज्ञवाराहमतुलं रूपं या बिभ्रतो हरेः ॥ शक्तिः साप्याययौ तत्र वाराहीं बिभ्रती तनुं ॥ नारसिंही नृसिंहस्य बिभ्रती सदृशं वपुः ॥ प्राप्ता तत्र शटाक्षेपक्षिप्तनक्षत्रसंहतिः ॥२८॥

राहीकारं रूपं स्वरूपं बिभ्रतीति बिभ्रन् तस्य बिभ्रतः बिभ्रतः धारयतः हरेः विष्णोः वाराहीं वाराहसंबंधिनीं तनुं मूर्तिं बिभ्रती बिभ्रतीति बिभर्ति धारयतीति तत्र तस्मिन् संग्रामे आपयौ आगता ॥२८॥ नारसिंहीति हे राजन् शटाक्षेपक्षिप्तनक्षत्रसंहतिः नृसिंहस्य सदृशं वपुः बिभ्रती नारसिंही तत्र प्राप्ता शटानां आक्षेपः निःक्षेपः शटाक्षेपः शटाक्षेपेण क्षिप्ता नक्षत्रसंहतिर्यया सा शटाक्षेपक्षिप्तनक्षत्रसंहतिः शटानां ग्रीवाकेशानां आक्षेपः प्रक्षेपः क्षिप्ताः इतस्ततः प्रक्षिप्ता नक्षत्रसंहतिः नक्षत्रसमूहः सदृशं तुल्यं वपुः शरीरं बिभ्रतीति बिभ्रती बिभर्ति धारयतीति नारसिंही नृसिंहसंबंधिनी

दु० टी० १९६ वज्रेति हे राजन् तथैव वज्रहस्ता गजराजोपरि संस्थिता सहस्र नयना ऐंद्री शक्तिः तत्र प्राप्ता यथा शक्रो भवति तथैव साभवति
वज्रं हस्ते यस्याः सा वज्रहस्ता गजराजस्य उपरि गजराजोपरि गजराजस्य ऐरावतस्य सहस्राणि नयनानि यस्याः सा सहस्रनय-
ना नयनानि नेत्राणि ऐंद्री इंद्र संबंधिनी तत्र तस्मिन् युद्धे शक्रः इंद्रः सा इंद्राणी ॥२०॥ अति विशिष्ट तेजसः कौशिक्याः स-
मीपे स्वयं गंतुमशक्ता स्ता देवशक्ती रीशानो देव्यै दर्शितवानित्याह तत इति हे राजन् ततः ताभिः परिवृतः ईशानः इत्यन्वं-
डिकां आह इतीति किं हे चंडिके त्वया देवशक्तिभिः सह असुराः मम प्रीत्या शीघ्रं हन्यं ताम् ततः तदनंतरं देवशक्ति गमना
नंतरं ताभिः देवशक्तिभिः परिवृतः वेष्टितः ईशानः शिवः आह उवाच देवानां शक्तयः देवशक्तयः ताभिः देवशक्तिभिः

वज्रहस्ता तथैवैंद्री गजराजोपरिस्थिता ॥ प्राप्ता सहस्रनयना यथा श-
क्रस्तथैव सा ॥ २० ॥ ततः परिवृतस्ताभिरीशानो देवशक्तिभिः ॥ हन्यं-
तामसुराः शीघ्रं मम प्रीत्याह चंडिकां ॥ २१ ॥ ततो देवी शरीरात्तु विनि
ष्क्रांतातिभीषणा ॥ चंडिका शक्तिरत्युग्रा शिवाशत निनादिनी ॥ २२ ॥

देवानां ब्रह्मादीनां शक्तयः देव्यः असुरा दैत्याः हन्यंतां प्रहन्यंतां ॥२१॥ यस्यापि सहाय प्रदर्शनेन याद्दृष्टा भवावतीति
स्योत्तरमाह किं तु काञ्चिच्छक्ति रित्यादि तत इति हे राजन् ततः देवी शरीरात्तु अतिभीषणा अत्युग्रा शिवाशत निनादि-
नी चंडिका शक्तिः विनिष्क्रांता ततः तदनंतरं शिव वाक्य श्रवणानंतरं देव्याः शरीरं देवि शरीरं तस्मात् देवी शरीरात् अतिभीषणा दर्श
नमात्रादूभयंकरी अत्युग्रा रौद्र स्वभावा शिवानां शतं शिवाशतं शिवाशतेन निनदतीति शिवानां शृगालीनां निनदति ११६
शब्दं करोति चंडिका अत्यंत कोपना शक्तिः देवी विनिष्क्रांता निःसृता ॥ २२॥

दु० एतस्मिन्निति हे भूप एतस्मिन् अंतरे सुरद्विषां विनाशाय अमर सिंहानां भवाय अति वीर्य बलान्विताः ब्रह्मेश गुह वि-
टी० विष्णूनां तथा च इंद्रस्य शक्तयः शरीरेभ्यः विनिष्क्रम्य तद्रूपैः चंडिकां ययुः एतस्मिन् अंतरे देवी दानव संपातावसरे सुरद्विषां
१२३ दैत्यानां अमर सिंहानां अमर श्रेष्ठानां भवाय संपदे अति वीर्यं च बलं च ते अति वीर्य बले अति वीर्य बलाभ्यां अ-
न्विताः अति वीर्य बलान्विताः अति वीर्यं अति तेजः बलं सामर्थ्यं आन्विताः युक्ताः ॥२१॥ ब्रह्मा च ईशश्च गुहश्च
विष्णुश्च ते ब्रह्मेश गुह विष्णवः तेषां ब्रह्मेश गुह विष्णूनां ईशः शिवः गुहः कार्तिकेयः विष्णु शब्देन वाराह नृसिंहावपि

एतस्मिन्नंतरे भूप विनाशाय सुरद्विषां ॥ भवायामरसिंहानामतिवीर्य
बलान्विताः ॥ २३ ॥ ब्रह्मेश गुह विष्णूनां तथेन्द्रस्य च शक्तयः ॥ शरीरे-
भ्यो विनिष्क्रम्य तद्रूपैश्चंडिकां ययुः ॥ २४ ॥ यस्य देवस्य यद्रूपं यथा-
भूषणवाहनं ॥ तद्वदेव हि तच्छक्तिरसुरान्योद्धुमाययौ ॥ २५ ॥ ॐ ॥

शक्तयः स्वव्यतिरेकिण्यो देवताः शरीरेभ्यः ब्रह्मादि देहेभ्यः विनिष्क्रम्य निर्गत्य तेषां रूपाणि तद्रूपाणि तैस्तद्रूपैः तेषां
ब्रह्मादीनां रूपाणि स्वरूपाणि चंडिकां देवीं ययुः प्रापुः ॥२४॥ यस्येति हे राजन् यस्य देवस्य यत् रूपं भवति तथा भूष
णवाहनं तद्वत् तच्छक्तिः असुरान् योद्धुं हि आययौ रूपं स्वरूपं भूषणं च वाहनं च भूषण वाहने भूषण वाहनयोः
समाहारः भूषण वाहनं तद्वत् एवं तथा विध रूप भूषण वाहने स्वर्णः तेषां शक्तिः तच्छक्तिः तेषां ब्रह्मादीनां शक्तिः स्व
व्यतिरेकिणी देवता असुरान् दैत्यान् हीति निश्चयेन ॥ २५॥

तेपीति हे राजन् शर्वाख्यातं देव्याः वचः श्रुत्वा ते महासुरा अपि अमर्षापूरिताः संतः ततः जग्मुर्यतः कात्यायनी स्थिताभवति शर्वेण आख्यातं शर्वाख्यातं तत् शर्वाख्यातं शर्वेण शिवेण आख्यातं कथितं वचः वाक्यं ते प्रसिद्धाः महासुराः महा दैत्याः अमर्षेण आपूरिताः अमर्षापूरिताः अमर्षेण क्रोधेन आपूरिताः व्याप्ताः संतः तं देशं तं कं यतः यं देशं कात्यायनी देवी ॥२८॥ ततइति हे राजन् ततः अमरारयः उद्धतामर्षाः संतः प्रथमं एव अग्रे तां देवीं शर शक्त्यृष्टि वृष्टिभिः ववर्षुः ततः तदनंतरं देवी निकट गमनानंतरं असुराणां देवानां अरयः शत्रवः दैत्याः उद्धतः अमर्षो येषां ते उद्धतामर्षाः उद्धतः वर्धितः अमर्षः क्रोधः प्रथमं एवं पूर्वमेव अग्रे सन्मुखे तां प्रसिद्धां शराश्च शक्तयश्च ऋष्टयश्च ताः शर शक्त्यृष्टयः शरशक्त्यृष्टीनां वृष्टयः

तेपि श्रुत्वा वचो देव्याः शर्वाख्यातं महासुराः ॥ अमर्षापूरिता जग्मुर्यतः कात्यायनी स्थिता ॥२८॥ ततः प्रथममेवाग्रे शरशक्त्यृष्टिवृष्टिभिः ववर्षुरुद्धतामर्षास्तां देवीममरारयः ॥२९॥ सा च तान्प्रहितान्बाणाञ्छूलशक्तिपरश्वधान् ॥ चिच्छेद लीलयाध्मातधनुर्मुक्तैर्महेषुभिः ॥३०॥

शर शक्त्यृष्टि वृष्टयः ताभिः शर शक्त्यृष्टि वृष्टिभिः शराः वाणाः ऋष्टयः एकधार खड्गाः ॥२९॥ सेति हे राजन् सा लीलया आध्मात धनुर्मुक्तैः महेषुभिः प्रहितान् तान् वाणान् किंच शूल शक्ति परश्वधान् चिच्छेद सा चंडिका लीलया अनायासेन आध्मातं च तत् धनुश्च आध्मात धनुः आध्मात धनुषः मुक्ताः आध्मात धनुर्मुक्तास्तैः आध्मात धनुर्मुक्तैः आध्मातं सशब्दं धनुः कार्मुकं मुक्ताः प्रेरिताः महांतश्च ते इषवश्च महेषवः तैः महेषुभिः इषवः वाणाः प्रहितान् प्रक्षिप्तान् तान् प्रसिद्धान् शूलं च शक्तिश्च परश्वधश्च ते शूल शक्ति परश्वधाः तान् शूल शक्ति परश्वधान् शूलं त्रिशूलं परश्वधः कुठारः ॥३०॥

तस्येति हे राजन् तस्याः अग्रतः तथा तदा काली शूल पात विदारितान् किंच खट्वांग पोथितान् अरीन् कुर्वती सती व्यचरत् तस्याः कौशिक्याः अग्रतः अग्रे अंहसः संधिः तथा चंडीवत् तदा तस्मिन् देव्या शस्त्र छेदे काली ललाटजा देवी शूलेन पातः शूलपातः शूलपातेन विदारिताः शूलपात विदारिताः तान् शूल पात विदारितान् शूलेन त्रिशूलेन पातः प्रहारः विदारिताः मारिताः खट्वांगेन पोथिताः खट्वांग पोथिताः तान् खट्वांग पोथितान् खट्वांगेन नरास्थिपंजरेण पोथिताः प्रहारिताः अरीन् शत्रून् दैत्यांश्च करोतीति कुर्वती करोति भक्षणं करोति ॥३१॥ कमंडलु इति हे राजन् ब्रह्माणी शत्रून् कमंडलु जलाक्षेप हतवीर्यान् हतौजसः अकरोत् किंच शत्रवः येन येन धावति स्म तेन तेन साधावति स्म कमंडलोः जलं

तस्याग्रतस्तथा काली शूलपातविदारितान् ॥ खट्वांगपोथितांश्चारीन्कुर्वती व्यचरत्तदा ॥३१॥ कमंडलुजलाक्षेपहतवीर्यान्हतौजसः ॥ ब्रह्माणी चाकरोच्छत्रून्येन येन स्म धावति ॥३२॥ माहेश्वरी त्रिशूलेन तथा चक्रेण वैष्णवी ॥ दैत्याञ्जघान कौमारी तथा शक्त्यातिकोपना ॥३३॥ ॐ ॥

कमंडलु जलं कमंडलुजलस्य आक्षेपः कमंडलु जलाक्षेपः कमंडलु जलाक्षेपेण हतं वीर्यं येषां ते कमंडलुजलाक्षेप हत वीर्याः तान् कमंडलु जलाक्षेप हतवीर्यान् आक्षेपः प्रक्षेपः हतं नष्टं वीर्यं हतं बलं ओजो येषां ते हतौजसः तान् हतौजसः हतं नष्टं ओजः पराक्रमः शत्रवः दैत्याः येनयेन मार्गेण तेनतेन मार्गेण सा ब्रह्माणी ॥३२॥ माहेश्वरीति हे राजन् माहेश्वरी त्रिशूलेन दैत्यान् जघान तथा वैष्णवी चक्रेण दैत्यान् जघान तथा अति कोपना कौमारी शक्त्या दैत्यान् जघान माहेश्वरी महेश्वर संबंधिनी शक्तिः वैष्णवी विष्णु संबंधिनी शक्तिः अति कोपोस्ति यस्याः सा अति कोपना अति कोपः अति क्रोधः कौमारी कुमार संबंधिनी शक्तिः ॥३३॥ ११९

दु० टी० १२० ऐंद्रीति हे राजन् ऐंद्री कुलिश पातेन विदारिताः शतशः दैत्यदानवाः रुधिरौघ प्रवर्षिणः संतः पृथ्व्यां पेतुः ऐंद्र्याः कुलि
शं ऐंद्री कुलिशं ऐंद्री कुलिशस्य पातः ऐंद्री कुलिश पातस्तेन ऐंद्री कुलिश पातेन ऐंद्र्याः इंद्राण्याः कुलिशं वज्रं पातः प्र
क्षेपः विदारिताः दैत्याश्च दानवाश्च ते दैत्य दानवाः रुधिराणां ओघः रुधिरौघः रुधिरौघं प्रवर्षितुं शीलं येषां ते रुधिरौघ प्र
वर्षिणः ओघः समूहः शीलं स्वभावः पृथ्व्यां भूमौ पेतुः पतिताः ॥३४॥ तुंडेति हे राजन् वाराहमूर्त्या केचित् दैत्याः तुंडप्रहा
र विध्वस्ताः संतः भूमौ न्यपतन् केचित् दैत्याः दंष्ट्राग्र क्षत वक्षसः संतः भूमौ न्यपतन् किंच केचित् दैत्याः चक्रेण विदारि
ताः संतः भूमौ न्यपतन् वाराही चासौ मूर्तिश्च वाराह मूर्तिस्तया वाराहमूर्त्या देव्या तुंडेन प्रहारः तुंडप्रहारः तुंड प्रहारेण वि-

ऐंद्री कुलिश पातेन शतशो दैत्य दानवाः ॥ पेतुर्विदारिताः पृथ्व्यां रुधिरौ-
घ प्रवर्षिणः ॥ ३४ ॥ तुंडप्रहार विध्वस्ता दंष्ट्राग्र क्षत वक्षसः ॥ वाराह
मूर्त्या न्यपतंश्चक्रेण च विदारिताः ॥ ३५ ॥ नखैर्विदारितांश्चान्यान् भक्ष-
यंती महासुरान् ॥ नारसिंही चचाराजौ नादा पूर्ण दिगंबरा ॥ ३६ ॥ ॐ ॥

ध्वस्ताः तुंडप्रहार विध्वस्ताः तुंडेन मुखेन विध्वस्ताः नाशिताः दंष्ट्रायाः अग्रं दंष्ट्राग्रं दंष्ट्राग्रेण क्षतं वक्षो येषां ते दंष्ट्राग्र क्षतवक्ष
सः अग्रं अग्रभागः क्षतं विदीर्णं वक्षः वक्षसा एव विदारिताः प्रहारिताः भूमौ पृथिव्यां न्यपतन् पतिताः ॥३५॥ नखैरिति हे
राजन् आजौ नादापूर्ण दिगंबरा नारसिंही नखैर्विदारितान् अन्यान् महासुरान् भक्षयंती सती चचार आजौ संग्रामे दिक् च
अंबरं च दिगंबरे नादेन आपूर्णे दिगंबरे यया सा नादा पूर्ण दिगंबरा दिक् दिशः अंबरं आकाशं नादेन शब्देन आपूर्णे व्याप्ते नार १२०
सिंही नृसिंह संबंधिनी शक्तिः विदारितान् प्रहारितान् महासुरान् महादैत्यान् ॥३६॥

दु० टी० १२१ सा चेति हे राजन् अपराजिता सा धूम्र जटिलं ईशानं इति आह इतीति किं हे भगवन् त्वं दूतः सन् शुंभ निशुंभयोः पार्श्वं गच्छ
अपरैः अजिता अपराजिता अपरैः शत्रुभिः सा देवी धूम्रजटिलं धूम्र वर्ण जटावंतं ईशानं शिवं आह उवाच शुंभश्च निशुं
भश्च तौ शुंभ निशुंभौ तयोः शुंभ निशुंभयोः पार्श्वं निकटं ॥२३॥ ब्रूहीति हे भगवन् त्वं अति गर्वितौ दानवौ शुंभं किंच निशुंभं
किंच तान् ब्रूहि तान् कान् ये अन्ये दानवाः तत्र युद्धाय समुपस्थिताः तान् दानवान् तत्र शुंभांतिके समुपस्थिताः आगताः २४
वचन माह त्रैलोक्यमिति हे शुंभादयः इंद्रः त्रैलोक्यं लभतां देवाः हविर्भुजः संतु यूयं यदि जीवितुं इच्छथ तर्हि पातालं प्रयात-

सा चाह धूम्र जटिल मीशानमपराजिता ॥ दूतत्वं गच्छ भगवन् पार्श्वं शुंभ
निशुंभयोः ॥२३॥ ब्रूहि शुंभं निशुंभं च दानवावतिगर्वितौ ॥ ये चान्ये दानवास्तत्र
युद्धाय समुपस्थिताः ॥२४॥ त्रैलोक्य मिंद्रो लभतां देवाः संतु हविर्भुजः ॥ यूयं प्र
यात पातालं यदि जीवितु मिच्छथ ॥२५॥ बलावलेपादथ चेद्भवंतो युद्धकांक्षि
णः ॥ तदागच्छत तृप्यंतु मच्छिवाः पिशितेन वः ॥२६॥ यतो नियुक्तो दौ-
त्येन तया देव्या शिवः स्वयं ॥ शिवदूतीति लोकेस्मिंस्ततः सा ख्यातिमागता २७

लभतां प्रयात हविः भुंजंतीति हविर्भुजः हविः शाकल्यं प्रयात गच्छत ॥२५॥ बलेति हे शुंभादयः अथ भवंतः बला
वलेपात युद्ध कांक्षिणः भवंति ते यूयं आगच्छत मच्छिवाः वः पिशितेन तृप्यंतु अथ अथवा बलस्य अवलेपः बलावले
पः तस्मात् बलावलेपात् अवलेपः गर्वः युद्धं कांक्षंतीति युद्ध कांक्षिणः चेत् यदि तत् तर्हि मम शिवा मच्छिवा शिवाः देव्यः
वः युष्माकं पिशितेन मांसेन ॥२६॥ यत इति हे राजन् यतः तया देव्या स्वयं शिवः दौत्येन नियुक्तः ततः अस्मिन् लोके सा
शिवदूती ख्यातिं आगता यतः यस्मात् कारणात् दूतस्य भावः दौत्यं दूत्यमेव दौत्यं तेन दौत्येन भावः धर्मः नियुक्तः प्रेरितः ततः तस्मात् कारणात् सा देवी ख्यातिं प्रसिद्धिं ॥२७॥

दु॰ टी॰ १२२ वदेवाहरक्तेति हे राजन् यदा अस्य शरीरतः रक्तविंदुः भूमौ पतितस्तदा तत्प्रमाणः असुरः मेदिन्याः समुत्पतति अस्य रक्तवी- १२४
जस्य शरीरादिति शरीरतः रक्तस्य विंदुः रक्तविंदुः तत्प्रमाणः सएव प्रमाणं यस्य सः तत्प्रमाणः स एव रक्तवीजस्य असु
रः दैत्यः मेदिन्याः मेदिनीं आश्रित्य समुत्पतति उत्तिष्ठतीत्यर्थः ॥४०॥ युयुधे इति हे राजन् महासुरः सः गदापाणिः सन्
इंद्रशक्त्या सह युयुधे ततः ऐंद्री स्ववज्रेण रक्तवीजं अताडयत् महासुरः महादैत्यः सः रक्तवीजः गदापाणौ यस्य सः गदा
पाणिः पाणौ हस्ते इंद्रस्य शक्तिः इंद्रशक्तिः तया इंद्रशक्त्या ततः तदनंतरं युद्धप्रारंभानंतरं ऐंद्री इंद्रसंबंधिनी शक्तिः
स्वस्य वज्रं स्ववज्रं तेन स्ववज्रेण ॥४१॥ कुलिशेनेति हे राजन् आशु कुलिशेन आहतस्य शोणितं सुस्रावततः तद्रूपाः

रक्तविंदुर्यदा भूमौ पतत्यस्य शरीरतः ॥ समुत्पतति मेदिन्यास्तत्प्रमाणस्त-
दासुरः ॥ ४०॥ युयुधे स गदापाणि रिंद्रशक्त्या सहासुरः ॥ ततश्चैंद्री स्ववज्रे
ण रक्तवीजमताडयत् ॥ ४१॥ कुलिशेनाहतस्याशु बहु सुस्राव शोणितं ॥
समुत्तस्थुस्ततो योधास्तद्रूपास्तत्पराक्रमाः ॥४२॥ यावंतः पतितास्तस्य
शरीराद्रक्तविंदवः ॥ तावंतः पुरुषा जातास्तद्वीर्यबलविक्रमाः ॥ ४३॥ ऽऽ॥

तत्पराक्रमा योधाः तसमुत्तस्थुः आशु शीघ्रं कुलिशेन वज्रेण आहतस्य ताडितस्य तस्य रक्तवीजस्य शोणितं रुधिरं ततः तद
नंतरं रुधिरस्रावानंतरं तद्रूपाः रक्तवीजरूपाः तत्पराक्रमाः रक्तवीजपराक्रमाः समुत्तस्थुः उत्थितवंतः ॥४२॥ यावंत इति
हे राजन् तस्य शरीरात् यावंतः रक्तविंदवः पतिताः तावंतः तद्वीर्यबलविक्रमाः पुरुषाः जाताः तस्य रक्तवीजस्य शरीरात् दे-
हात् यावंतः यावत्संख्याकाः रक्तस्य विंदवः रक्तविंदवः तावंतः तावत्संख्याकाः वीर्यं च बलं च विक्रमं च ते वीर्यबल
विक्रमाः तस्य वीर्यबलविक्रमा इव वीर्यबलविक्रमा येषां ते तद्वीर्यबलविक्रमा वीर्यं प्रभावः बलं शारीरं विक्रमः पराक्र

दु॰ टी॰ १२२ तेइति हे राजन् रक्तसंभवाः ते पुरुषाः अपि तत्र मातृभिः समं अतुलं शस्त्रपातातिभीषणं यथा स्यात्तथा युयुधुः रक्तात्संभवो १२३
येषां ते रक्तसंभवाः रक्तात् रुधिरात् संभवः प्रादुर्भावः तेषु प्रसिद्धाः तत्र तस्मिन् संग्रामे मातृभिः ब्रह्म्यादिभिः समं सह शस्त्रा-
णां पातः शस्त्रपातः शस्त्रपातेन अतिभीषणं शस्त्रपातातिभीषणं पातः प्रक्षेपः अतिभीषणं अतिभयंकरं ॥४४॥ पुन
श्चेति हे राजन् पुनः यदा वज्रपातेन क्षतं अस्य शिरः रक्तं ववाह तदा ततः सहस्रशः पुरुषा जाताः वज्रस्य पातः वज्रपातः तेन
वज्रपातेन पातः प्रक्षेपः क्षतं विदीर्णं अस्य रक्तवीजस्य शिरः मस्तकं रक्तं रुधिरं ततः रक्तात् ॥४५॥ वैष्णवीति हे राजन्
समरे वैष्णवी एनं चक्रेण अभिजघान किंच ऐंद्री असुरेश्वरं तं गदया ताडयामास समरे संग्रामे वैष्णवी विष्णुसंबंधिनी शक्तिः

तेचापि युयुधुस्तत्र पुरुषा रक्तसंभवाः ॥ समं मातृभिरत्युग्रं शस्त्रपातातिभी-
षणं ॥४४॥ पुनश्च वज्रपातेन क्षतमस्य शिरो यदा ॥ ववाह रक्तं पुरुषास्त
तो जाताः सहस्रशः ॥ ४५॥ वैष्णवी समरे चैनं चक्रेणाभिजघान ह ॥ गदया
ताडयामास ऐंद्री तमसुरेश्वरं ॥ ४६॥ वैष्णवी चक्रभिन्नस्य रुधिरस्राव
संभवैः ॥ सहस्रशो जगद्व्याप्तं तत्प्रमाणैर्महासुरैः ॥४७॥ ॐ ॥ ऽऽ ॥ छ

एवं रक्तवीजं ऐंद्री इंद्रसंबंधिनी शक्तिः असुराणां ईश्वरः असुरेश्वरः तं असुरेश्वरं असुराणां दैत्यानां ईश्वरः स्वामी तं रक्त
वीजं ॥४६॥ वैष्णवीति हे राजन् वैष्णवी चक्रभिन्नस्य तस्य रुधिरस्रावसंभवैः तत्प्रमाणैः सहस्रशः महासुरैः जगत् व्या
प्तं वैष्णव्याः चक्रं वैष्णवीचक्रं तेन भिन्नः वैष्णवीचक्रभिन्नः तस्य वैष्णवीचक्रभिन्नस्य भिन्नः विदीर्णः तस्य रक्तवीजस्य रु
धिरस्य स्रावः रुधिरस्रावः रुधिरस्रावात् संभवो येषां ते रुधिरस्रावसंभवाः तैः रुधिरस्रावसंभवैः स्रावः प्रवाह संभवः प्रादु- १२२
र्भावः सएव प्रमाणं येषां ते तत्प्रमाणाः तैः तत्प्रमाणैः सएव रक्तवीज एव महासुरैः महादैत्यैः ॥४७॥

दु० टी० १२४

शक्त्येति हे राजन् कौमारी महासुरं रक्तवीजं शक्त्या जघान तथा च वाराही असिना जघान माहेश्वरी त्रिशूलेन जघान कौमारी कुमार संबंधिनी शक्तिः महासुरं महादैत्यं वाराही वाराह संबंधिनी शक्तिः असिना खड्गेन माहेश्वरी महेश्वर संबंधिनी शक्तिः ॥ ४८ ॥ स चापीति हे राजन् कोप समाविष्टः महासुरः दैत्यः सः रक्तवीजः सर्वा एव मातृः पृथक् पृथक् आहनत् कोपेन समाविष्टः कोप समाविष्टः कोपेन क्रोधेन समाविष्टः युक्तः महांश्चासौ असुरश्च महासुरः दितेः अपत्यं पुमान् दैत्यः सः प्रसिद्धः सर्वा एव समस्ता एव पृथक् पृथक् ॥ ४९ ॥ तस्येति हे राजन् आहतस्य तस्य शक्ति शूलादिभिः बहुधा यः

शक्त्या जघान कौमारी वाराही च तथासिना ॥ माहेश्वरी त्रिशूलेन रक्तवीजं महासुरं ॥ ४८ ॥ स चापि गदया दैत्यः सर्वा एवाहनत् पृथक् ॥ मातृः कोप समाविष्टो रक्तवीजो महासुरः ॥ ४९ ॥ तस्याहतस्य बहुधा शक्ति शूलादिभिर्भुवि ॥ पपात यो वै रक्तौघस्तेनासंश्छतशोऽसुराः ॥ ५० ॥ तैश्चासुरासृक्संभूतैरसुरैः सकलं जगत् ॥ व्याप्तमासीत्ततो देवा भयमाजग्मुरुत्तमं ॥ ५१ ॥

रक्तौघः वै भुवि पपात तेन शतशः असुराः आसन् आहतस्य ताडितस्य तस्य रक्तवीजस्य शक्तिश्च शूलं च शक्ति शूले शक्तिशूले आदिर्येषां ते शक्ति शूलादयः तैः शक्तिशूलादिभिः बहुधा अनेक विधः रक्तानां ओघः रक्तौघः रुधिराणां समूहः ओघः समूहः वै इति निश्चयेन भुवि पृथिव्यां तेन रक्तौघेन असुरा दैत्या आसन् बभूवुः ॥ ५० ॥ तैश्चेति हे राजन् सकलं जगत् असुरासृक् संभूतैः तैः असुरैः व्याप्तं आसीत् ततः देवाः उत्तमं भयं आजग्मुः सकलं समस्तं असुरस्य असृक् असुरासृक् असुरासृजः संभूताः असुरासृक् संभूताः तैः असुरासृक् संभूतैः असुरस्य दैत्यस्य रक्तवीजस्य असृक् रुधिरं संभूताः उत्पन्नाः तैः असि १२५

दु० टी० १२१ ॥

चंडेति हे राजन् चंडाट्टहासैः शिवदूत्यभिदूषिताः असुराः पृथिव्यां पेतुः अथ सा तदा पतितान् च खाद अट्टाश्च ते हासाश्च अट्टहासाः चंडाश्च ते अट्टहासाश्च चंडाट्टहासाः तैः चंडाट्टहासैः अट्टाः महांतः चंडाः उत्कटाः शिवदूत्या अभिदूषिताः शिवदूत्याभिदूषिताः प्रापित मूर्च्छाः असुराः दैत्याः पृथिव्यां भूमौ पेतुः पतिताः अथ अथेत्यनंतरं दैत्य पतनानंतरं सा शिवदूती तदा तस्मिंश्च काले तान् दैत्यान् चखाद भक्षितवती ॥ ३७ ॥ इतीति हे राजन् इति विविधैः अभ्युपायैः महासुरान् मर्दयंतं क्रुद्धं मातृगणं दृष्ट्वा देवारि सैनिकाः नेशुः इति पूर्वोक्तैः विविधैः अनेकैः अभ्युपायैः महासुरान् संग्राम साधनैः महादैत्यान् मर्दयतीति मर्दयन् तं मर्दयंतं क्रुद्धं क्रोध युक्तं मातॄणां गणः मातृगणः तं मातृगणं मातॄणां ब्रह्माण्यादीनां गणः समूहः देवा

चंडाट्टहासैरसुराः शिवदूत्यभिदूषिताः ॥ पेतुः पृथिव्यां पतितांस्तांश्च खादाथ सा तदा ॥ ३७ ॥ इति मातृगणं क्रुद्धं मर्दयंतं महासुरान् ॥ दृष्ट्वाभ्युपायैर्विविधैर्नेशुर्देवारि सैनिकाः ॥ ३८ ॥ पलायन परान् दृष्ट्वा दैत्यान्मातृगणार्दितान् ॥ योद्धुमभ्याययौ क्रुद्धो रक्तवीजो महासुरः ॥ ३९ ॥ ॐ ॥ ऽऽ ॥

नां अरयः देवारयः देवारीणां सैनिका देवारि सैनिकाः देवानां इंद्रादीनां अरयः शत्रवः दैत्याः नेशुः पलायिताः ॥ ३८ ॥ पलायनेति हे राजन् मातृगणार्दितान् दैत्यान् पलायन परान् दृष्ट्वा महासुरः रक्तवीजः क्रुद्धः सन् योद्धुं अभ्याययौ मातॄणां गणः मातृगणः मातृगणेन अर्दिताः मातृगणार्दिताः तान् मातृगणार्दितान् मातॄणां ब्रह्माण्यादीनां गणः समूहः अर्दिताः पीडिताः पलायनेपराः पलायनपराः तान् पलायनपरान् पराः तत्पराः महादैत्या रक्तं वीजं यस्य सः रक्तवीजः वीजं कारणं १२२
अभ्याययौ आगातः ॥ ३९ ॥ ॐ ॥ ऽऽ ॥ ॐ ॥ ऽऽ ॥ ॐ ॥ ऽऽ ॥ ॐ ॥ ऽऽ ॥

भक्ष्यमाणा इति हे चामुंडे त्वया भक्ष्यमाणाः उग्राः अपरे न च उत्पत्स्यंति इति तां उक्त्वा ततः देवी शूलेन अभिजघान भक्ष्यंते इति भक्ष्यमाणाः उग्राः महांतः अपरे अन्ये दैत्याः इति अनेन प्रकारेण तां कालीं उक्त्वा कथयित्वा ततः तदनंतरं कथनानंतरं रक्तबीजं अभिजघान ताडयामास ॥५५॥ मुखेनेति हे राजन् काली मुखेन रक्तबीजस्य शोणितं जगृहे ततः अथ असौ तत्र चंडिका गदया आजघान शोणितं रुधिरं जगृहे गृहीतवती ततः तदनंतरं शोणितग्रहणानंतरं अथ अथ च असौ रक्तबीजः तत्र तस्मिन् संग्रामे आजघान ताडयामास न चेति हे राजन् गदापातः अस्याः

भक्ष्यमाणास्त्वया चोग्राः न चोत्पत्स्यंति चापरे ॥ इत्युक्त्वा तां ततो देवी शूलेनाभिजघान तं ॥५५॥ मुखेन काली जगृहे रक्तबीजस्य शोणितं ॥ ततोसावाजघानाथ गदया तत्र चंडिकाम् ॥५६॥ न चास्या वेदनां चक्रे गदापातोल्पिकामपि ॥ तस्याहतस्य देहात्तु बहु सुस्राव शोणितं ॥५७॥

अल्पिकां अपि वेदनां न च चक्रे आह तस्य तस्य देहात् तु बहु शोणितं सुस्राव गदायाः पातः गदापातः पातः प्रक्षेपः अस्याः चंडिकायाः अल्पिकां स्वल्पां वेदनां पीडां न च चक्रे नैव कृतवती आहतस्य ताडितस्य तस्य रक्तबीजस्य देहात् शरीरात् बहु शोणितं रुधिरं ॥५७॥ " " " " " " "

यतस्तत इति हे राजन् ततः यतः ततः अस्या वक्त्रेण रक्तपातात् ये महासुराः समुद्भूताः तान् चामुंडा मुखेन संप्रतीच्छति किंच चखाद तत तस्मात् कारणात् यतः ततः सर्वत इत्यर्थः अस्याः काल्याः वक्त्रेण मुखेन रक्तपातः तस्मात् रक्तपातात् रक्तस्य रुधिरस्य पातः यतस्ततं ये महासुरा दैत्याः समुद्भूताः जाताः तान् महादैत्यान् संप्रतीच्छति गृह्णाति च खादभक्षितवती अथ चामुंडा तस्य शोणितं पपौ अथ अथवा तस्य रक्तबीजस्य शोणितं रुधिरं देवी शूलेन वज्रेण बाणैः असिभिः ऋष्टिभिः चामुंडापीतशोणितं तं रक्तबीजं जघान असिभिः खड्गैः ऋष्टिभिः उभयतो धारखड्गैः चामुंडया पीतं शो-

यतस्ततस्तद्वक्त्रेण चामुंडा संप्रतीच्छति ॥ मुखे समुद्गता येस्या रक्तपातान्महासुराः ॥५८॥ तांश्चखादाथ चामुंडा पपौ तस्य च शोणितं ॥ देवी शूलेन वज्रेण बाणैरसिभिर्ऋष्टिभिः ॥५९॥ जघान रक्तबीजं तं चामुंडापीतशोणितं ॥ स पपात महीपृष्ठे शस्त्रसंघसमाहतः ॥६०॥ नीरक्तश्च महीपाल रक्तबीजो महासुरः ॥ ततस्ते हर्षमतुलमवापुस्त्रिदशा नृप ॥६१॥ ॐ ॥

णितं यस्य सः चामुंडापीतशोणितः तं चामुंडापीतशोणितं तं प्रसिद्धं हे महीपाल संघसमाहतः महासुरः रक्तबीजः नीरक्तः सन् महीपृष्ठे पपात महीं पालयतीति महीपालः तत्संबोधन हे महीपाल हे राजन् शस्त्राणां संघः शस्त्रसंघः शस्त्रसंघेन समाहतः शस्त्रसंघसमाहतः समूहः संघः समाहतः ताडितः महासुरः महादैत्यः सः प्रसिद्धः निर्गतं रक्तं यस्मात् सः नीरक्तः रक्तं रुधिरं महीपृष्ठे पृथिवीतले पपात पतितः हे नृप ततः ते त्रिदशाः अतुलं हर्षं अवापुः हे नृप हे राजन् ततः तदनंतरं रक्तबीजवधानंतरं ते प्रसिद्धाः त्रिदशाः देवाः अतुलं महांतं हर्षं आनंदं अवापुः प्रापुः ॥६१॥

दु॰ टी॰ १२८ तेषामिति हे राजन् मातृगणः तेषां असृङ्मदोद्धतः जातः सन् ननर्त मातॄणां गणः मातृगणः मातॄणां ब्राह्म्यादीनां गणः समूहः असुराणां असृजां मदः असृङ्मदः तेन उद्धतः असृङ्मदोद्धतः असृजा रुधिरेण ॥ ६३ ॥ इति श्रीनागोजीभट्टसंमतकृते सप्तशतीव्याख्याने रक्तबीजवधो नामाष्टमोऽध्यायः ॥८॥ राजोवाच ॥ विचित्रमिति हे भगवन् भवता मम रक्तबीजवधाश्रितं इदं देव्याः चरितमाहात्म्यं विचित्रं आख्यातं मम मह्यं रक्तबीजस्य वधः रक्तबीजवधः रक्तबीजवधस्य आश्रितं रक्तबीजवधाश्रितं आश्रितं जनकं चरितं च माहात्म्यं च अनयोः समाहारः चरितमाहात्म्यं

तेषां मातृगणो जातो ननर्तासृङ्मदोद्धतः ॥ इति मार्कंडेयपुराणे सावर्णिके मन्वंतरे देवीमाहात्म्ये रक्तबीजवधः ॥८॥ राजोवाच ॥ विचित्रमिदमाख्यातं भगवन् भवता मम ॥ देव्याश्चरितमाहात्म्यं रक्तबीजवधाश्रितं ॥ १ ॥ भूयश्चेच्छाम्यहं श्रोतुं रक्तबीजे निपातिते ॥ चकार शुंभो यत्कर्म निशुंभश्चातिकोपनः २ ऋषिरुवाच ॥ चकार कोपमतुलं रक्तबीजे निपातिते ॥ शुंभासुरो निशुंभश्च हते

चरितं कर्म माहात्म्यं प्रभावः विचित्रं आश्चर्यकारकं आख्यातं कथितं ॥ १ ॥ भूयश्चेति हे भगवन् रक्तबीजे निपातिते सति अतिकोपनः शुंभः किंच निशुंभः यत्कर्म चकार तत्कर्म अहं भूयः श्रोतुं इच्छामि निपातिते सति प्रहारिते सति अतिकोपनः अतिक्रुद्धः भूयः पुनः ॥ २ ॥ ऋषिरुवाच चकारेति हे राजन् आहवे रक्तबीजे निपातिते सति किंच अन्येषु हतेषु सत्सु शुंभासुरः किंच निशुंभः अतुलं कोपं चकार आहवे संग्रामे निपातिते सति प्रहारिते सति अन्येषु धूम्रलोचनादिषु दैत्येषु हतेषु सत्सु अतुलं महांतं कोपं क्रोधं चकार कृतवान् ॥ ३ ॥ १२८

दु॰ टी॰ १२५ असुरैर्दैत्यैः ततः तदनंतरं असुरव्याप्तजगल्लोकानंतरं देवाः इंद्रादयः उत्तमं निरतिशयभयं त्रासं आजग्मुः प्रापुः ॥ ५१ ॥ तानिति हे राजन् तान् विषण्णान् दृष्ट्वा सत्वरा चंडिका सुरान् प्राह हे सुराः यूयं माविषीदत एवं सुरान् आश्वास्य कालीं इति उवाच इतीति किं हे चामुंडे त्वं वदनं विस्तरं कुरु तान् सुरान् विषण्णान् भयाकुलान् सत्वरा त्वरासहिता सुरान् देवान् प्राह उवाच एवं अनेन प्रकारेण सुरान् देवान् आश्वास्य समाधानं कृत्वा वदनं मुखं विस्तरं विस्तारयन् ॥ ५२ ॥ मच्छस्त्रेति हे चामुंडे त्वं वेगिता सती अनेन वक्त्रेण रक्तबिंदोः जातान् महासुरान् किंच मच्छस्त्रपातसंभूतान् रक्तबिंदून् भूमिं अप्राप्तान् एवं प्रतीच्छ वेगिता सती वेगवती सती वक्त्रेण मुखेन रक्तस्य बिंदुः रक्तबिंदुः तस्मात् रक्तबिंदोः जातान्

तान्विषण्णान् सुरान् दृष्ट्वा चंडिका प्राह सत्वरा ॥ उवाच कालीं चामुंडे विस्तरं वदनं कुरु ॥ ५२ ॥ मच्छस्त्रपातसंभूतान् रक्तबिंदून् महासुरान् ॥ रक्तबिंदोः प्रतीच्छ त्वं वक्त्रेणानेन वेगिता ॥ ५३ ॥ भक्षयंती चर रणे तदुत्पन्नान् महासुरान् ॥ एवमेष क्षयं दैत्यः क्षीणरक्तो गमिष्यति ॥ ५४ ॥

उत्पन्नान् महासुरान् महादैत्यान् मम शस्त्रं मच्छस्त्रं मच्छस्त्रस्य पातः मच्छस्त्रपातः मच्छस्त्रपातेन संभूताः मच्छस्त्रपातसंभूताः तान् मच्छस्त्रपातसंभूतान् पातः प्रक्षेपः संभूताः जाताः रक्तस्य बिंदवः रक्तबिंदवः तान् रक्तबिंदून् भूमिं पृथिवीं प्रतीच्छ गृहाण ॥ ५३ ॥ भक्षयंतीति हे चामुंडे त्वं तदुत्पन्नान् महासुरान् भक्षयंती सती रणे चर एवं एषः दैत्यः क्षीणरक्तः सन् क्षयं गमिष्यति तस्मात् उत्पन्नाः तदुत्पन्नाः तान् तदुत्पन्नान् तस्मात् रक्तबिंदोः उत्पन्नाः जाताः समर्थं जातान् महासुरान् महादैत्यान् रणे संग्रामे चर एवं प्रकारेण क्षीणरक्तः यस्य सः क्षीणरक्तः रक्तं रुधिरं क्षयं नाशं

दु० ततइति हे राजन् ततः शुंभनिशुंभयोः देव्या सह अतीव युद्धं आसीत्कथं भूतं युद्धं शरवर्षकयोः इव अतीव उग्रं ॥४
टी० जलं वर्षतोः मेघयोः इव ततः तदनंतरं शुंभागमनानंतरं शुंभश्च निशुंभश्च तौ शुंभनिशुंभौ तयोः शुंभनिशुंभयोः अ-
३० तीव अत्यंत मेव युद्धं संग्रामः आसीत् बभूव शराणां वर्षा यस्मिन् तत् शरवर्षं शराणां बाणानां वर्षा वृष्टिः अती
व अत्यंत मेव उग्रं महत् वर्षतः इति वर्षतो तयोः वर्षतोः ॥७॥ चिच्छेदेति हे राजन् चंडिका स्वशरोत्करैः ताभ्यां
अस्तान् शरान् चिच्छेद किंच शस्त्रौघैः अंगेषु असुरेश्वरौ ताडयामास चंडिका देवी स्वस्य शराः स्वशराः स्वशराणां
उत्कराः स्वशरोत्कराः तैः स्वशरोत्करैः स्वस्य स्वकीयस्य शराः बाणाः उत्कराः समूहाः ताभ्यां शुंभनिशुंभाभ्यां अ

ततो युद्धमतीवासीद्देव्या शुंभनिशुंभयोः ॥ शरवर्षमतीवोग्रं मेघयोरि-
व वर्षतोः ॥७॥ चिच्छेदास्ताञ्छरांस्ताभ्यां चंडिका स्वशरोत्करैः ॥ ताडयामा
स चांगेषु शस्त्रौघैरसुरेश्वरौ ॥८॥ निशुंभो निशितं खड्गं चर्म चादाय सुप्र-
भं ॥ अताडयन्मूर्ध्नि सिंहं देव्या वाहनमुत्तमम् ॥९॥ ताडिते वाहने देवी
क्षुरप्रेणासिमुत्तमं ॥ निशुंभस्याशु चिच्छेद चर्म चाप्यष्टचंद्रकं ॥१०॥

स्तान् क्षिप्तान् शराणां बाणानां शस्त्राणां ओघाः शस्त्रौघाः तैः शस्त्रौघैः शस्त्राणां बाणानां ओघाः समूहाः अंगेषु
अवयवेषु हस्तपादादिषु असुराणां ईश्वरौ असुरेश्वरौ तौ असुरेश्वरौ ॥८॥ निशुंभेति हे राजन् निशुंभः निशितं
खड्गं किंच सुप्रभं चर्म आदाय मूर्ध्नि देव्याः उत्तमं वाहनं सिंहं अताडयत् निशितं तीक्ष्णं खड्गं असिं सुप्रभं दीप्यमानं
चर्मफलकं आदाय गृहीत्वा मूर्ध्नि मस्तके उत्तमं श्रेष्ठं वाहनं वाहनभूतं ॥९॥ ताडिते इति हे राजन् वाहने ताडिते स-
ति देवी आशु सुरप्रेण निशुंभस्य उत्तमं असिं किंच अष्टचंद्रकं अपि चर्म चिच्छेद वाहने सिंहे आशु शीघ्रं क्षु-

दु० रप्रेण शरविशेषेण उत्तमं श्रेष्ठं असिं खड्गं अष्टचंद्रकं अष्टसंख्याकरलोद्घटितं चंद्राकारसहितं चर्मफलकं ॥१०॥ छि-
टी० न्नेति हे राजन् चर्मणि किंच खड्गे छिन्ने सति असुरः शक्तिं चिक्षेप देवी चक्रेण अस्य अभिमुखागतां अपि तां द्विधा चक्रे
३१ चर्मणि फलके असुरः दैत्यः सः निशुंभः अस्य निशुंभस्य अभिमुखं आगता अभिमुखागता तां अभिमुखागतां अभि-
मुखं संमुखं आगता प्राप्ता तां शक्तिं द्विधा द्विभागं चक्रे कृतवती ॥११॥ कोपेति हे राजन् अथ कोपाध्मातः दानवः निशुंभः शू-
लं जग्राह देवी मुष्टिपातेन आयातं अपि तत् अचूर्णयत् अथ अथेत्यनंतरं शक्तिछिन्नानंतरं कोपेन आध्मातः कोपा-
ध्मातः कोपेन क्रोधेन आध्मातः प्रज्वलितः शूलं त्रिशूलं मुष्टेः पातः मुष्टिपातः तेन मुष्टिपातेन पातः पतनं आयातं

छिन्ने चर्मणि खड्गे च शक्तिं चिक्षेप सोऽसुरः ॥ तामप्यस्य द्विधा चक्रे चक्रे-
णाभिमुखागतां ॥११॥ कोपाध्मातो निशुंभोऽथ शूलं जग्राह दानवः ॥ आया-
तं मुष्टिपातेन देवी तच्चाप्यचूर्णयत् ॥१२॥ आविध्याथ गदां सोऽपि चिक्षेप चं-
डिकां प्रति ॥ सापि देव्या त्रिशूलेन भिन्ना भस्मत्वमागता ॥१३॥ ततः परशुह-
स्तं तमायांतं दैत्यपुंगवं ॥ आहत्य देवी बाणौघैरपातयत भूतले ॥१४॥

आगतं तत् शूलं ॥१२॥ आविध्येति हे राजन् अथ सः अपि गदां आविध्य चंडिकां प्रति चिक्षेप देव्याः त्रिशूलेन भिन्ना
अपि सा भस्मत्वं आगता अथ अथेत्यनंतरं शूलभेदनानंतरं सः निशुंभः आविध्य भ्रामयित्वा चंडिकां देवीं भिन्ना पृथक्
कृता सा गदा भस्मनः भावः भस्मत्वं भावः धर्मः आगता प्राप्ता ॥१३॥ तत इति हे राजन् ततः देवी परशुहस्तं दैत्यपुंगवं आयांतं
तं आहत्य बाणौघैः भूतले अपातयत् ततः तदनंतरं गदाभेदनानंतरं परशुः हस्ते यस्य सः परशुहस्तः तं परशुहस्तं दैत्यानां पुंगवः
दैत्यपुंगवः तं दैत्यपुंगवं पुंगवः श्रेष्ठः आयातं आगच्छंतं तं निशुंभं आहत्य ताडयित्वा बाणानां ओघाः बाणौघाः तैः बाणौघैः

दु० तस्मिन्निति हे राजन् भीम विक्रमे भ्रातरि तस्मिन् निशुंभे भूमौ निपातिते सति अतीव संक्रुद्धः सन् अंबिकां हंतुं प्रययौ भीमः ॥१४
टी० विक्रमो यस्य सः भीम विक्रमः तस्मिन् भीम विक्रमे भीमः महान् विक्रमः पराक्रमः भूमौ पृथिव्यां निपातिते सति प्र-
१३१ हारिते सति अतीव अत्यंत मेव संक्रुद्धः क्रोधायमान अंबिकां देवीं हंतुं प्रययौ आजगाम ॥१५॥ स इति हे राजन्
रथस्थः सः तथा अत्युच्चैः गृहीत परमायुधैः अतुलैः अष्टाभिः भुजैः अशेषं नभः व्याप्य वभौ स्थितिष्ठती ति रथ स्थः सः
शुंभं तथा समुद्रिकोक्त प्रकारेण अत्युच्चैः महाद्भिः परमाणि च तानि आयुधानि च परमायुधानि गृहीतानि परमायुधा

तस्मिन्निपतिते भूमौ निशुंभे भीम विक्रमे ॥ भ्रातर्यतीव संक्रुद्धः प्रययौ
हंतुमंबिकां ॥१५॥ स रथस्थस्तथात्युच्चै र्गृहीत परमायुधैः ॥ भुजै र-
ष्टाभि रतुलै र्व्याप्या शेषं वभौ नभः ॥१६॥ तमायांतं समालोक्य देवी शंख
मवादयत् ॥ ज्याशब्दं चापि धनुष श्चकारातीव दुःसहं ॥१७॥ ॥ ॥

नि यैः ते गृहीत परमायुधाः तैः गृहीत परमायुधैः परमाणि उत्कृष्टानि आयुधानि शस्त्राणि अतुलैः तुला
रहितैः अशेषं समस्तं नभः आकाशं वभौ शुशुभे ॥१६॥ आयांतमिति हे राजन् आयांतं तं समालोक्य देवी शं-
खं अवादयत् किंच धनुषः अपि अतीव दुःसहं ज्या शब्दं चकार अयांतं आगच्छंतं तं शुंभ समालोक्य दृष्ट्वा अवा
दयत् पूरयामास अतीव अत्यंत मेव दुःसहं असह्यं ज्यायाः शब्दः ज्याशब्दः तं ज्याशब्दं ज्यायाः प्रत्यंचायाः १४
शब्दं टंकारः चकार कृतवती ॥१७॥ ॥ ॥ ॥ ॥ ॥ ॥

दु० हन्यमान मिति हे राजन् महासैन्यं हन्यमानं विलोक्य अथ अमर्षं उद्वहन् मुख्यया असुर सेनया उपलक्षितः निशुंभः अभ्य
टी० धावत महच्च तत् सैन्यं महासैन्यं हन्यते इति हन्यमानं विलोक्य दृष्ट्वा अथ अथच अमर्षं क्रोधं उद्वहन् धारयन् मुख्य
१२९ या प्रधान भूतया असुर सेनया असुराणां सेना असुर सेना तया असुर सेनया असुराणां दैत्यानां उपलक्षितः अभ्य
धावत अभिमुखं ययौ ॥४॥ तस्येति हे राजन् तस्य अग्रतः तथा पृष्ठे किंच पार्श्वयोः महासुराः देवीं हंतुं उपाययुः कथं
भूताः महासुराः संदष्टौष्ठ पुटाः पुनः कथं भूताः महासुराः क्रुद्धाः तस्य निशुंभस्य अग्रतः पार्श्वयोः भुज प्रान्तयोः

हन्य मानं महासैन्यं विलोक्या मर्ष मुद्वहन् ॥ अभ्य धावन् निशुंभोथ मु-
ख्य या सुर सेनया ॥४॥ तस्याग्रत स्तथा पृष्ठे पार्श्वयो श्च महासुराः ॥ संदष्टौ
ष्ठपुटाः क्रुद्धा हंतुं देवी मुपाययुः ॥५॥ आजगाम महावीर्यः शुंभो-
पि स्ववलैर्वृतः ॥ निहंतुं चंडिकां कोपात्कृत्वा युद्धं तु मातृभिः ॥६॥ ॥

महासुराः महादैत्याः हंतुं प्रहर्तुं उपाययुः जग्मुः ओष्ठानां पुटाः ओष्ठपुटाः संदष्टाः ओष्ठपुटाः यैः ते संदष्टौष्ठ पुटाः संद-
ष्टाः दंताभ्यां पीडिताः क्रुद्धाः क्रोधयुक्ताः ॥५॥ आजगामेति हे राजन् स्ववलैः वृतः महावीर्यः शुंभः अपि मातृभिः
सह युद्धं कृत्वा कोपात् चंडिकां निहंतुं आजगाम स्वस्य वलानि तैः स्ववलैः स्वस्य स्वकीयस्य वलानि सैन्यानि वृतः यु
क्तः महत् वीर्यं यस्य सः महावीर्यः वीर्यं पराक्रमः मातृभिः काल्यादिभिः युद्धं संग्रामं कोपात् क्रोधात् चंडिकां देवीं १२९
निहंतुं प्रहर्तुं आजगाम ययौ ॥६॥

अट्टहासमिति हे राजन् शिवदूती अशिवं अट्टहासं चकार ह अट्टहासमित्यत्र शकंध्वादित्वात्पररूपं तैः शब्दैः अ-
सुराः त्रेसुः शुंभः परं कोपं ययौ शिवदूती काली अशिवं रिपूणां भयदैः प्रसिद्धैः शब्दैः अट्टहासैः असुराः दैत्याः त्रेसुः
भयभीता बभूवुः परं अत्यंतं कोपं क्रोधं ययौ प्राप ॥ २१ ॥ दुरात्मन्निति हे राजन् अंबिका यदा इति व्याजहार इतीति
किं हे दुरात्मन् त्वं तिष्ठ तिष्ठ तदा आकाशसंस्थितैः देवैः जय इति अभिहितं अंबिका देवी यदा यस्मिन् काले व्याजहा-
र उक्तवती तदा तस्मिन् काले आकाशे संस्थिताः आकाशसंस्थिताः तैः आकाशसंस्थितैः आकाशे देवी दानव

अट्टहासमशिवं शिवदूती चकार ह ॥ तैः शब्दैरसुरास्त्रेसुः शुंभः कोपं
परं ययौ ॥ २१ ॥ दुरात्मंस्तिष्ठ तिष्ठेति व्याजहारांबिका यदा ॥ तदा जयेत्यभि-
हितं देवैराकाशसंस्थितैः ॥ २२ ॥ शुंभेनागत्य या शक्तिर्मुक्ता ज्वाला-
तिभीषणा ॥ आयांती वन्हिकूटाभा सा निरस्ता महोल्कया ॥ २३ ॥ ॐ ॥ ऽऽ ॥

संग्राम दर्शनाय स्थितैः देवैः इंद्रादिभिः जय जय इति अभिहितं कृतं ॥ २२ ॥ शुंभेनेति हे राजन् शुंभेन आगत्य ज्वालातिभीष-
णा या शक्तिः मुक्ता आयांती वन्हिकूटाभासा महोल्कया निरस्ता ज्वालवत् अति भीषणा ज्वालातिभीषणा मुक्ता क्षि-
प्ता तया देव्या आयांती आगच्छंती वन्हीनां कूटं वन्हिकूटं वन्हिकूटस्य प्रभेव आभा यस्याः सा वन्हिकूटाभा वन्हीनां
अग्नीनां कूटः समूहः आभा कांतिः सा शक्तिः महोल्कया महाज्वालावत्या यद्वा तन्नामक शक्त्या निरस्ता दूरी-
कृता खंडीकृता ॥ २३ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॐ ॥

सिंहेति हे राजन् शुंभस्य सिंहनादेन लोकत्रयांतरं व्याप्तं हे अवनीपते घोरः निर्घात निःस्वनः शुंभनिनादं जितवान् लोका-
नां त्रयं लोकत्रयं लोकत्रयस्य अंतरं लोकत्रयांतरं लोकानां स्वर्गमर्त्यपातालानां त्रयं समूहः अंतरं मध्यं अवनेः पतिः अ-
वनीपतिः तत्संबोधने हे अवनीपते अवनेः पृथिव्याः पतिः स्वामी घोरः भयंकरः निर्घात निःस्वनः उत्पात ध्वनिः ॥ २४ ॥
शुंभेति हे राजन् देवी शुंभमुक्तान् शरान् चिच्छेद शुंभस्तत्प्रहितान् शतशः अथ सहस्रशः शरान् उग्रैः स्वशरैः चिच्छेद
शुंभेन मुक्ताः शुंभमुक्ताः तान् शुंभमुक्तान् मुक्ताः प्रक्षिप्ताः शरान् बाणान् तया प्रहितान् सत् प्रहिताः तान् तत्प्रहितान् त-

सिंहनादेन शुंभस्य व्याप्तं लोकत्रयांतरं ॥ निर्घातनिःस्वनो घोरो जित-
वानवनीपते ॥ २४ ॥ शुंभमुक्तान् शरान् देवी शुंभस्तत्प्रहितांछरान् ॥
चिच्छेद स्वशरैरुग्रैः शतशोथ सहस्रशः ॥ २५ ॥ ततः सा चण्डिका क्रु-
द्धा शूलेनाभिजघान तं ॥ स तदाभिहतो भूमौ मूर्छितो निपपात ह ॥ २६ ॥ ऽ ॥

या देव्या प्रहिताः क्षिप्ताः अथ च शरान् बाणान् उग्रैः भयंकरैः स्व स्य शराः स्वशराः तैः स्वशरैः स्वस्य स्वकीयस्य
शराः बाणाः अनेन देवी शुंभयोः समयुद्धमुक्तं ॥ २५ ॥ तत इति हे राजन् ततः सा चंडिका क्रुद्धा सती शूलेन तं अभिजघा-
न तदा अभिहतः सः मूर्छितः सन् भूमौ निपपात ह ततः तदनंतरं परस्पर युद्धानंतरं सा प्रसिद्धा चंडिका देवी तं शुंभं अ-
भिजघान अताडयत् तदा तस्मिन् समये अभिहतः ताडितः सः शुंभः मूर्छितः सन् मूर्छा प्राप्तः सन् भूमौ पृथिव्यां ॥ २६ ॥

दु. टी. ९६ तत इति हे राजन् ततः चेतनां संप्राप्य आत्तकार्मुकः निशुंभः शरैः देवीं कालीं तथा केशरिणं आजघान तः तदनंतरं मू-
च्छार्नंतरं आत्तं कार्मुकं येनसः आत्तकार्मुकः आत्तं गृहीतं कार्मुकं धनुः शरैः वाणैः देवीं चंडिकां केशरिणं सिंहं
आजघान ताडयामास ॥२७॥ पुनरिति हे राजन् पुनः वाहूनां हस्तानां अयुतं दशसहस्रं दनुजानां ईश्वरः दनुजेश्वरः ई-
श्वरः स्वामीदितेः जातः दितिजः चक्राणि च आयुधानि च एतेषां समाहारः चक्रायुधं तेन चक्रायुधेन आयुधानि शस्त्रा-
णि समाहारः समूहः ॥२८॥ तत इति हे राजन् ततः दुर्गा दुर्गार्तिनाशिनी भगवती क्रुद्धा सती स्वशरैः तानि चक्रा-

ततो निशुंभः संप्राप्य चेतनामात्तकार्मुकः ॥ आजघान शरैर्देवीं का-
लीं केशरिणं तथा ॥२७॥ पुनश्च कृत्वा वाहूनामयुतं दनुजेश्वरः ॥ चक्रायु-
धेन दितिजः छादयामास चंडिकां ॥२८॥ ततो भगवती क्रुद्धा दुर्गा दुर्गार्तिना-
शिनी ॥ चिच्छेद तानि चक्राणि स्वशरैः सायकांश्च तान् ॥२९॥ ततो निशुं-
भो वेगेन गदामादाय चंडिकां ॥ अभ्यधावत वै हंतुं दैत्य सेना समावृतः ॥३०॥

णि किंच तांश्च सायकान् चिच्छेद ततः तदनंतरं चक्रायुधा च्छादनानंतरं दुःखेन गम्यते इति दुर्गा दुःखेन कष्टेन गम्य-
ते ज्ञायते दुर्गा आर्तिः दुर्गार्तिः दुर्गार्तेः नाशिनी दुर्गार्तिनाशिनी दुर्गं संकटं आर्तिः पीडा नाशिनी नाशकर्त्री भगवती
चंडिका स्वस्य शराः स्वशराः तैः स्वशरैः स्वस्य स्वकीयस्य शराः वाणाः सायकान् वाणान् ॥२९॥ तत इति हे राजन् ततः
दैत्यसेनावृतः निशुंभः गदां आदाय वेगेन चंडिकां हंतुं वै अभ्यधावत ततः तदनंतरं चक्रायुधच्छेदनानंतरं दैत्यानां सेना ९६
दैत्यसेना दैत्यसेनया समावृतः दैत्यसेनासमावृतः समावृतः युक्तः आदाय गृहीत्वा हंतुं महतुं वै इति निश्चयेन ॥३०॥

दु. टी. १३३ पूरयामासेति हे राजन् किंच सा समस्तदैत्यसैन्यानां तेजोवधविधायिना निजघंटास्वनेन ककुभः पूरयामास चंडिका
दैत्यानां सैन्यानि दैत्यसैन्यानि समस्तानि च तानि दैत्यसैन्यानि च समस्त दैत्यसैन्यानि तेषां समस्तदैत्यसैन्यानां ते-
जसः वधः तेजोवधः तेजोवधस्य विधायी तेजोवधविधायी तेन तेजोवधविधायिना वधः नाशः विधायी कर्ता घंटा-
याः स्वनः घंटास्वनः निजश्चासौ घंटास्वनश्च निजघंटास्वनः तेन निजघंटास्वनेन स्वनः शब्दः निजः स्वकीयः ककुभः दि-
शः ॥२८॥ तत इति हे राजन् ततः सिंहः त्याजितेभमहामदैः महानादैः गगनं गां तथा दश उपदिशः पूरयामास ततः
तदनंतरं घंटाशब्दश्रवणानंतरं महांश्चासौ मदश्च महामदः इभानां महामदः इभमहामदः त्याजितः इभमहाम-

पूरयामास ककुभो निजघंटास्वनेन च ॥ समस्तदैत्यसैन्यानां तेजोवधवि-
धायिना ॥२८॥ ततः सिंहो महानादैस्त्याजितेभमहामदैः ॥ पूरयामास
गगनं गां तथोपदिशो दश ॥२९॥ ततः काली समुत्पत्य गगनं क्ष्मामताडयत् ॥ कराभ्यां तन्निनादेन प्राक्स्वनास्तेतिरोहिताः ॥३०॥ ॥ ६६॥

दोयैः ते त्याजितेभमहामदाः तैः त्याजितेभमहामदैः इभानां हस्तिनां त्याजितः दूरीकृतः महांश्च ते नादाश्च महानादाः
तैः महानादैः नादाः शब्दाः गगनं आकाशं गां पृथिवीं उपदिक् सहिताः दिशः उपदिशः ॥२९॥ ततः इति हे राजन् ततः
काली समुत्पत्य गगनं क्ष्मां कराभ्यां अताडयत् तन्निनादेन प्राक् ते स्वनाः तिरोहिताः तदनंतरं पृथिव्या ताडना-
पनानंतरं कालीचामुंडा समुत्पत्य उच्छ्रुत्य गगनं आकाशं क्ष्मां पृथिवीं कराभ्यां हस्ताभ्यां तस्य निनादः तन्निनादः तेन त-
न्निनादेन तस्य ताडितस्य निनादः शब्दः प्राक् पूर्वे ते प्रसिद्धाः स्वनाः शब्दाः तिरोहिताः आच्छादिताः ॥३०॥ ९९

ततः इति हे राजन् ततः सिंहः दंष्ट्रा क्षुण्ण शिरोधरान् असुरान् उग्रं यथा स्यात्तथा च खाद तथा काली तान् च खादत् तथा शि-
वदूती अपरान् च खादत् ततः तदनंतरं शिरः छेदनानंतरं दंष्ट्राभिः क्षुण्णाः शिरोधराः येषां ते दंष्ट्राक्षुण्ण शिरोधरास्तान् दंष्ट्रा
क्षुण्ण शिरोधरान् क्षुण्णाः समर्दिताः शिरोधराः ग्रीवाः असुरान् दैत्यान् उग्रं भयानकं चखाद अभक्षयत तान् अस-
रान् चखाद अभक्षयत अपरान् अन्यान् दैत्यान् चखाद अभक्षयत ॥ ३५ ॥ कौमारीति हे राजन् केचित् महासुराः
कौमारी शक्ति निर्भिन्नाः संतः नेशुः अन्ये महासुराः ब्रह्माणी मंत्र पूतेन तोयेन निराकृताः संतः नेशुः महासुराः
महादैत्याः कौमार्याः शक्तिः कौमारीशक्तिः कौमारी शक्त्या निर्भिन्नाः कौमारी शक्ति निर्भिन्नाः निर्भिन्नाः विदारि-

ततः सिंहश्च खादोग्रं दंष्ट्रा क्षुण्ण शिरोधरान् ॥ असुरांस्तां स्तथा काली
शिवदूती तथा परान् ॥ ३५ ॥ कौमारी शक्ति निर्भिन्नाः केचिन्नेशुर्महासु-
राः ॥ ब्रह्माणी मंत्र पूतेन तोयेनान्ये निराकृताः ॥ ३६ ॥ माहेश्वरी त्रि-
शूलेन भिन्नाः पेतुस्तथापरे ॥ वाराही तुंड घातेन केचिच्चूर्णीकृता भुवि ३७

ताः नेशुः नाशं प्राप्नुवंतः ब्रह्माण्याः मंत्रः ब्रह्माणी मंत्रः ब्रह्माणी मंत्रेण पूतः ब्रह्माणी मंत्र पूतः तेन ब्रह्माणी मंत्र
पूतेन ब्रह्माणी मंत्र पूतेन पूतेन मंत्रितेन तोयेन जलेन निराकृताः संतः ध्वस्ताः संतः नेशुः नाशं प्रापुः ॥ ३६ ॥ माहेश्व
रीति हे राजन् तथा अपरे माहेश्वरी त्रिशूलेन भिन्नाः संतः भुवि पेतुः केचित् दैत्याः वाराही तुंडघातेन चूर्णीकृताः
संतः भुवि पेतुः अपरे अन्ये दैत्याः माहेश्वर्याः त्रिशूलं तेन माहेश्वरी त्रिशूलेन भिन्नाः संतः विदारिताः संतः भु
वि पृथिव्यां पेतुः पतंति स्म वाराह्याः तुंडं वाराही तुंडं वाराही तुंडेन घातः वाराही तुंड घातः तेन वाराही तुंड घातेन तुंडघातेः ताडनं ॥३७॥

खंड खंड मिति हे राजन् वैष्णव्याः चक्रेण दानवाः खंडं खंडं यथा स्यात्तथा कृताः तथा अपरे ऐंद्री हस्ताग्र विमुक्तेन वज्रेण खं
ड खंडं यथा स्यात्तथा कृताः खंडस्य खंडाः यस्यां क्रियायां तत् खंडंखंडं अपरे अन्ये दैत्याः ऐंद्र्याः हस्तः ऐंद्रीहस्तः ऐंद्री
हस्तस्य अग्रं ऐंद्री हस्ताग्रं ऐंद्री हस्ताग्रे विमुक्तः ऐंद्री हस्ताग्र विमुक्तः तेन ऐंद्री हस्ताग्र विमुक्तेन विमुक्तेन क्षिप्तेन ॥ ३७ ॥
केचिदिति हे राजन् केचित् असुराः विनेशुः केचित् असुरा महा हवात् नष्टाः किंच काली शिवदूती मृगाधिपैः अप
रे भक्षिताः असुराः दैत्याः विनेशुः मृताः असुराः दैत्याः महाहवात् महारणात् काली च शिव दूती च मृगाधिपश्च ते

खंडखंडं च चक्रेण वैष्णव्या दानवाः कृताः ॥ वज्रेण चैंद्री हस्ताग्र विमुक्ते-
न तथापरे ॥ ३८ ॥ केचिद्विनेशुरसुराः केचिन्नष्टा महा हवात् ॥ भक्षिता
श्चापरे काली शिव दूती मृगाधिपैः ॥ ३९ ॥ इति मार्कंडेय पुराणे साव-
र्णिके मन्वंतरे देवी माहात्म्ये निशुंभवधः ॥ ९ ॥ ऋषिरुवाच ॥ निशुंभं निह
तं दृष्ट्वा भ्रातरं प्राण सम्मितं ॥ हन्यमानं बलं चैव शुंभः क्रुद्धोऽब्रवीद्वचः ॥ १ ॥

काली शिव दूती मृगाधिपाः तैः काली शिव दूती मृगाधिपैः मृगाधिपः सिंहः अपरे अन्ये दैत्याः ॥ ३९ ॥ इति श्रीना
गोजीभट्ट संमत कृते सप्त शती व्याख्याने निशुंभवधो नाम नवमोऽध्यायः ॥ ९ ॥ ऋषिरुवाच ॥ निशुंभमिति हे राजन् प्राण
संमितं भ्रातरं निशुंभं निहतं दृष्ट्वा किंच बलं एव हन्यमानं दृष्ट्वा शुंभः क्रुद्धः सन् देवीं वचः अब्रवीत् प्राणेन संमितः
प्राण संमितः तं प्राण संमितं तुल्यः निहतं एव सैन्या हन्यते इति हन्यमानं तत् हन्यमानं वचः वाक्यं ॥ १ ॥

दु० बलेति हे बलावलेप दुष्टे हे दुर्गे सा त्वं गर्वं मा आवह सा काया त्वं अतिमानिनी सती अन्यासां बलं आश्रित्य युध्यसे बले
टी० न अवलेपः बलावलेपः बलावलेपात् दुष्टा बलावलेपदुष्टा तत्संबोधने हे बलावले प दुष्टे अवलेपो गर्वः दुष्टा दुर्विनीता
१८० मा आवह माकुरु अतिमानोस्ति यस्याः सा अतिमानिनी अन्यासां ब्राह्म्यादीनां बलं आश्रयं आश्रित्य गृहीत्वा ॥२॥
देव्युवाच एकैवेति हे दुष्ट अत्र जगति अहं एका एव भवामि मम अपरा द्वितीया कास्ति न कास्ति न का पीत्यर्थः अनु
भूयमानस्तु भेदो न तात्त्वन इत्याह पश्येति एताः मद्विभूतयः मयि एव विशंत्यः त्वं पश्य अत्र जगति अस्मिन् संसा
रे एका एव स्वगत भेदहीना एव अपरा अन्या सहाय भूता मम विभूतयः मद्विभूतयः ॥ ३॥ तत इति हे राजन् ततः ब्र

बलावलेप दुष्टे त्वं मा दुर्गे गर्व मावह ॥ अन्यासां बलमाश्रित्य युद्ध्यसे या-
तिमानिनी ॥ २॥ देव्युवाच ॥ एकैवाहं जगत्यत्र द्वितीया का ममापरा ॥ पश्यैता
दुष्ट मय्येव विशंत्यो मद्विभूतयः ॥ ३॥ ऋषिरुवाच ॥ ततः समस्तास्ता देव्यो ब्रह्मा-
णी प्रमुखा लयं ॥ तस्या देव्यास्तनौ जग्मुरेकैवासीत्तदांबिका ॥ ४॥ देव्युवाच
अहं विभूत्या बहुभिरिह रूपैर्यदा स्थिता ॥ तत्संहृतं मयैकैव तिष्ठाम्याजौ स्थिरो

ह्माणी प्रमुखास्ताः समस्ताः देव्यः तस्या देव्याः तनौ लयं जग्मुः तदा अंबिका एका एव आसीत् ततः तदनंतरं शुंभप्रति
देवी वाक्य श्रवणानंतरं ब्रह्माणी प्रमुखं या सांताः ब्रह्माणी प्रमुखाः प्रमुखं आदिः ताः प्रसिद्धाः समस्ताः सम्पूर्णा
तनौ शरीरे लयं अपृथक् भावं जग्मुः प्रापुः तदा तस्मिन् काले अंबिका देवी ॥ ४॥ देव्युवाच अहमिति हे दुष्ट विभूत्या ब-
हुरूपैः यदा पस्थिता तत् मया संहृतं अहं एका एव तिष्ठामि त्वं आजौ स्थिरः भव इह अस्मिन् संसारे बहुभिः अनेकैः
रूपैः स्वरूपैः यदा यस्मिन् काले तत् बहुत्वं आजौ रणे इह अस्मिन् ॥ ५॥

दु० तस्येति हे राजन् चंडिका शितधारेण खड्गेन आपततः एव तस्य गदां आशु चिच्छेद सः शूलं समाददे शित धारेण तीक्ष्ण
स० धारेण आप ततः एव आगच्छतः एव तस्य निशुंभस्य आशु शीघ्रं सः निशुंभः समाददे जग्राह ॥ ३१॥ शूलेति हे राजन्
३३ चंडिका वेगाविद्धेन हृदि शूलहस्तं अमरार्दनं समायांतं निशुंभं विव्याध वेगेन आविद्धं वेगविद्धं तेन वेगाविद्धेन आविद्धं
प्रक्षिप्तं हृदि हृदये शूलं हस्ते यस्य सः शूल हस्तः तं शूल हस्तं अमराणां अर्दनः अमरार्दनः तं अमरार्दनं अमराणां देवानां
अर्दनः पीडकः समायांतं आगच्छंतं ॥ ३२॥ भिन्नस्येति हे राजन् शूलेन भिन्नस्य तस्य हृदयात् अपरः महाबलः महा

तस्यापतत एवाशु गदां चिच्छेद चंडिका ॥ खड्गेन शितधारेण स च शूलं
समाददे ॥ ३१॥ शूलहस्तं समायांतं निशुंभममरार्दनं ॥ हृदि विव्याध शू-
लेन वेगाविद्धेन चंडिका ॥ ३२॥ भिन्नस्य तस्य शूलेन हृदयान्निःसृतो
परः ॥ महाबलो महावीर्यस्तिष्ठेति पुरुषो वदन् ॥ ३३॥ तस्य निष्क्राम-
तो देवी प्रहस्य स्वनवत्ततः ॥ शिरश्चिच्छेद खड्गेन ततोसावपतद्भुवि ॥ ३४॥

वीर्यः पुरुषः तिष्ठ इति वदन् सन् निःसृतः भिन्नस्य विदीर्णस्य तस्य निशुंभस्य अपरः अन्यः महत् बलं यस्य सः महाब-
लः बलं सैन्यं महत् वीर्यं यस्य सः महावीर्यः वीर्यं पराक्रमः ॥ ३३॥ तस्येति हे राजन् ततः देवी स्वनवत् प्रहस्य निष्क्राम
तः तस्य शिरः खड्गेन चिच्छेद ततः असौ भुवि अपतत् ततः तदनंतरं निशुंभ हृदयात् पुरुष प्रादुर्भावानंतरं देवी चंडिका
स्वनवत् सशब्दं यथा स्यात्तथा प्रहस्य अट्टहासं कृत्वा निष्क्रामतः निर्गच्छतः तस्य पुरुषस्य शिरः मस्तकं ततः तदनंतरं
शिरश्छेदनानंतरं असौ पुरुषः भुवि पृथिव्यां ॥ ३४॥

दु० च्चारणं च उग्र हुंकारोच्चारणं उग्र हुंकारोच्चारणं आदिर्येषां ते उग्र हुंकारोच्चारणादयः तैः उग्र हुंकारोच्चारणादि
टी० भिः तेन शुंभेन मुक्तानि प्रक्षिप्तानि बभंज चिच्छेद ॥९॥ ततः इति हे राजन् ततः असुरः सः देवीं शर शतैः आच्छादय
१४२ त ततः कुपिता सा देवी धनुः इषुभिः चिच्छेद ततः तदनंतरं शस्त्रच्छेदनानंतरं असुरः दैत्यः सः शुंभः देवीं चंडिकां शरा
णां शतानि शर शतानि तैः शर शतैः शराणां बाणानां तत् तस्मात् कारणात् कुपिता क्रुद्धा इषुभिः बाणैः ॥१०॥ छिन्ने
इति तथा तेन प्रकारेण छिन्न धनुषी सन्वयः ॥११॥ ततः इति छेदानंतरं इत्यर्थः भानुमदिति किरणयुक्त मित्य-

ततः शर शतैर्देवी माच्छादयत सोऽसुरः ॥ सापि तत्कुपिता देवी धनुश्चि
च्छेद चेषुभिः ॥१०॥ छिन्ने धनुषि दैत्येंद्रस्तथा शक्तिमथाददे ॥ चिच्छेद दे
वी चक्रेण तामप्यस्य करे स्थितां ॥११॥ ततः खड्ग मुपादाय शतचंद्रं च भानुमत्
अभ्यधावत्तदा देवीं दैत्यानामधिपेश्वरः ॥१२॥ तस्यापततएवाशु खड्गं चिच्छे
द चंडिका ॥ धनुर्मुक्तैः शितैर्बाणैश्चर्म चार्ककरामलं ॥१३॥ हताश्वः स तदा दै-
त्यः छिन्नधन्वा विसारथिः ॥ जग्राह मुद्गरं घोर मंबिका निधनोद्यतः ॥१४॥ चि
च्छेदापततस्तस्य मुद्गरं निशितैः शरैः ॥ तथापि सोऽभ्यधावत्तां मुष्टि मुद्यम्य वेग

थे कं खड्गस्य शतचंद्रस्य चर्मणश्च विशेषणं तदा युद्धस्य कालेतु दैत्याना मधिपेश्वरः इति गमकत्वात्समासः ॥१२॥
चर्मेति चेतनाश्व सारथ्योः समुच्चयः ॥१३॥ तदाह हता इति ॥१४॥ समुष्टि मिति देव्या हृदये इत्यन्वयः

दु० तलं प्रसृतां गुलि कच पेटः ॥१५॥१६॥ सह सातर्कितं ॥१७॥ उत्पत्येति हे राजन् सः उत्पत्य देवीं प्रगृह्य उच्चैः गगनं
टी० आस्थितः तत्रापि निराधारा सा चंडिका तेन सह युयुधे सः शुंभ उत्पत्य भूमेः सकाशात् ऊर्द्ध गत्वा प्रगृह्य गृहीत्वा
१४३ उच्चैः महत् गगनं आकाशं आस्थितः आश्रितवान् तत्रापि गगने अपि निर्गतः आधारो यस्याः सा निराधारा तेन शु
भेन ॥१८॥ नियुद्धमिति हे राजन् तदा चंडिका किंच दैत्यः परस्परं नियुद्धं खे चक्रतुः कथंभूतं नियुद्धं प्रथमं पुनः कथंभू
तं नियुद्धं सिद्ध मुनि विस्मय कारकम् तदा तस्मिन् काले दैत्यः शुंभः परस्परम् अन्योन्यं नियुद्धं बाहु युद्धं खे आका-

समुष्टिं पातयामास हृदये दैत्य पुंगवः ॥ देव्यास्तं चापि सा देवी तलेनोरस्य
ताडयत् ॥१६॥ तलप्रहाराभिहतो निपपात महीतले ॥ स दैत्यराजः सह
सा पुनरेव तथोत्थितः ॥१७॥ उत्पत्य च प्रगृह्योच्चैर्देवीं गगनमास्थितः ॥
तत्रापि सा निराधारा युयुधे तेन चंडिका ॥१८॥ नियुद्धं खे तदा दैत्यश्चंडिका
च परस्परं ॥ चक्रतुः प्रथमं सिद्ध मुनि विस्मय कारकं ॥१९॥ ततो नियुद्धं सु
चिरं कृत्वा तेनांबिका सह ॥ उत्पात्य भ्रामयामास चिक्षेप धरणीतले ॥२०॥

शे प्रथमं अभूत पूर्वं सिद्धाश्च मुनयश्च ते सिद्ध मुनयः सिद्ध मुनीनां विस्मयः सिद्ध मुनि विस्मयः तं सिद्ध मुनि विस्मयं क
रोतीति सिद्ध मुनि विस्मय कारकं सिद्धाः देव योनि विशेषाः मुनयः ऋषयः विस्मयः आश्चर्यम् ॥१९॥ तत इति हे राज
न् ततः अंबिका तेन सह सुचिरं नियुद्धं कृत्वा उत्पात्य भ्रामयामास किंच धरणी तले चिक्षेप ततः तदनंतरं बाहु युद्धा
नंतरं तेन शुंभेन सुचिरं मनोहरं नियुद्धं बाहुयुद्धं उत्पात्य कंदुकवत् उपरि क्षिप्त्वा यतनसमये चरण मुपहृत्य धर

सक्षिप्त इति हे राजन् क्षिप्तः सः धरणीं प्राप्य वेगितः सन् मुष्टिं उद्यम्य चंडिका निधनेच्छया अभ्यधावत कथंभूतः सदु- ।।
ष्टात्मासः शुंभः धरणीं पृथिवीं वेगितः सन् वेगवान् सन् उद्यम्य ऊर्द्धं कृत्वा चंडिकायाः निधनं चंडिका निधनं चंडि
का निधने इच्छा चंडिका निधनेच्छा तया चंडिका निधनेच्छया निधनं मरणं दुष्टः आत्मा यस्य सः दुष्टात्मा दुष्टः कु
टिलः आत्मा अंतःकरणं ।।२१।। तमिति हे राजन् ततो देवी सर्वदैत्य जनेश्वरं आयांतं शूलेन वक्षसि भित्वा जगत्यां
पातयामास ततः तदनंतरं धावना नंतरं दैत्याश्च ते जनाश्च दैत्य जनाः सर्वे च ते दैत्य जनाश्च सर्वदैत्यजनाः सर्व दै
त्यजनानां ईश्वरः सर्वदैत्य जनेश्वरः तं सर्वदैत्यजनेश्वरं सर्वे समस्ताः ईश्वरः स्वामी आयांतं आगच्छंतं तं

सक्षिप्तो धरणीं प्राप्य मुष्टिमुद्यम्य वेगितः ।। अभ्यधावत दुष्टात्मा चं-
डिका निधनेच्छया ।।२१।। तमायांतं ततो देवी सर्वदैत्यजनेश्वरं ।। जगत्यां
पातयामास भित्वा शूलेन वक्षसि ।।२२।। सगतासुः पपातोर्व्यां दे-
वी शूलाग्रविक्षतः ।। चालयन् सकलां पृथ्वीं साब्धिद्वीपां सपर्वतां ।।२३।।

शुंभं वक्षसि हृदये जगत्यां भूमौ ।।२२।। स इति हे राजन् देवी शूलाग्र विक्षतः गतासुः सः साब्धिद्वीपां सपर्वताम्
सकलाम् पृथ्वीं चालयन् सन् उर्व्यां पपात चालयन्निति ह्रस्वभाव आर्षः देव्याः शूलं देवी शूलं देवी शूलस्य अग्रं
देवी शूलाग्रं देवी शूलाग्रेण विक्षतः देवी शूलाग्र विक्षतः अग्रं अग्रभागः विक्षतः कृत व्रणः गताः असवो यस्य
सः गतासुः असवः प्राणाः सः शुंभः अब्धयश्च द्वीपाश्च ते अब्धि द्वीपाः अब्धिद्वीपैः सह वर्तमाना साब्धिद्वी-
पाताम् साब्धि द्वीपाम् अब्धयः समुद्राः सह वर्तमाना युक्ता पर्वतैः सः वर्तमाना सपर्वता वाम् सपर्वताम् सह ॥
वर्तमानाम् युक्ता सकलाम् समस्ताम् चालयन् सन् कंपयन् सन् उर्व्यां पृथिव्यां ।।२३।।

ततइति हे राजन् ततः देव्याः किंच शुंभस्य उभयोः युद्धं प्रवर्तते कथंभूतं युद्धं पश्यतां सर्व देवानां किंच असुराणां दारु[illegible]
ततः तदनंतरं परस्पर संभाषणा नंतरं उभयोः देवी दानवयोः प्रवर्तते प्रवृत्त पश्यंतीति पश्यंतः तेषां पश्यतां सर्वे च ते देवा
श्च सर्वदेवाः तेषां सर्वदेवानां सर्वे समस्ताः देवाः इंद्रादयः असुराणां दैत्यानां दारुणं भयदं ।।६।। शरवर्षैरिति हे राजन्
शरवर्षैः तथा शितैः शस्त्रैः किंच दारुणैः एव अस्त्रैः तयोः भूयः युद्धं अभूत् कथंभूतं युद्धं सर्वलोक भयंकरं शराणां व
र्षाणि शर वर्षाणि तैः शरवर्षैः शराणां बाणानां वर्षाणि वृष्टयः शितैः तीक्ष्णैः दारुणैः भयंकरैः तयोः देवी दानवयोः
भूपः महत् सर्वे च ते लोकाश्च सर्वलोकाः सर्वलोकानां भयं करं सर्वलोक भयंकरं सर्वे समस्ताः लोकाः जनाः ।।७।। दि-

ऋषिरुवाच ।। ततः प्रववृते युद्धं देव्याः शुंभस्य चोभयोः ।। पश्यतां सर्वदेवाना
मसुराणां च दारुणं ।।६।। शर वर्षैः शितैः शस्त्रैस्तथास्त्रैश्चैव दारुणैः ।। तयोर्युद्ध
मभूद्भूयः सर्वलोकभयंकरं ।।७।। दिव्यान्यस्त्राणि शतशो मुमुचे यान्यथां-
बिका ।। बभंज तानि दैत्येंद्रस्तत्प्रतीघातकर्तृभिः ।।८।। मुक्तानि तेन चा-
स्त्राणि दिव्यानि परमेश्वरी ।। बभंज लीलयैवोग्र हुंकारोच्चारणादिभिः ।।९।।

व्यानीति हे राजन् अथ अंबिका शतशः यानि दिव्यानि अस्त्राणि मुमुचे तानि दैत्येंद्रः तत्प्रतीघात कर्तृभिः अस्त्रैः ब
भंज अथेत्यनंतरं युद्ध प्रारंभानंतरं अंबिका चंडिका तानि अस्त्राणि दैत्यानां इंद्रः दैत्येंद्रः इंद्रः श्रेष्ठः शुंभः तेषां प्रती
घातः तत्प्रतीघातः तत्प्रतीघातं कुर्वंतीति तत्प्रतीघातकर्तॄणि तैः तत्प्रतीघात कर्तृभिः तेषां अस्त्राणां प्रतीघातः नि
वारणं बभंज विच्छेद ।।८।। मुक्तानीति हे राजन् परमेश्वरी लीलया एव उग्र हुंकारोच्चारणादिभिः तेन मुक्तानि दिव्या १४।
नि अस्त्राणि बभंज परमेश्वरी चंडिका लीलया एव अनायासेनैव हुंकारस्य उच्चारणं हुंकारोच्चारणं उग्रं च तत् हुंकारो

आवादयन्निति हेराजन तथैव अन्ये वाद्यान् अवादयन् किंच अप्सरो गणाः ननृतुः तथावाताः पुण्याः ववुः दि-
वाकरः सुप्रभः अभूत् अन्ये देव योनि विशेषाः अवादयन वादित्रवंतः अप्सरसां गणाः अप्सरो गणाः अप्सरसां
देव वेश्यानां गणाः समूहाः ननृतुः नृत्यं तिस्मवाताः वायवः पुण्याः अनुकूलाः ववुः वांतिस्म दिवाकरः सूर्यः
सुप्रभः विमल तेजाः ॥२७॥ जज्वलुरिति हे राजन अग्नयः शांताः संतः जज्वलुः कथंभूताः अग्नयः शांत दिग्जनि
तस्वनाः अग्नयः आहवनीयादयः शांताः संतः सौम्याः संतः दिक्षु जनिता दिग्जनिता दिग्जनिताश्च तेस्वनाश्च
दिग्जनितस्वनाः शांताः दिग्जनित स्वनाः शांत दिग्जनितस्वनाः येषां ते शांत दिग्जनितस्वनाः दिक्षु दिक्षु ज-

अवादयंस्तथैवान्ये ननृतुश्चाप्सरो गणाः॥ ववुः पुण्यास्तथा वाताः सु-
प्रभोभूद्दिवाकरः॥ जज्वलुश्चाग्नयः शांताः शांत दिग्जनितस्वनाः॥२८
॥ इति मार्कंडेय पुराणे सावर्णिके मन्वन्तरे देवी माहात्म्ये शुंभवधः
॥ १० ॥ ऋषिरुवाच ॥ देव्या हते तत्र महा सुरेंद्रे सेंद्राः सुरा वन्हि पुरो ग-
मास्तां ॥ कात्यायनीं तुष्टुवुरिष्ट लंभा द्विकाशि वक्त्राब्ज विकाशिताशाः ॥१॥

निताः जाताः स्वनाः उत्पात सूचक स्फुरनादि शब्दाः ॥२८॥ इतिश्री नागोजीभट्ट संमत कृते सप्तसती व्याख्याने
शुंभवधो नाम दशमोऽध्यायः ॥१०॥ ऋषिरुवाच ॥ देव्येति हे राजन तत्रदेव्या महासुरेंद्रे हते सतिवन्हि पुरोगमाः
सेंद्राः सुराः कात्यायनीं तांतुष्टुवुः कथंभूताः सुराः इष्टलंभात विकाशि वक्त्रा महासुरेंद्रः तु पाठस्तु पुनः कथंभूतास्सुराः
विकाशिताशाः तत्र तस्मिन युद्धे महांतश्च ते असुराश्च महासुराः महासुराणां इंद्रः तस्मिन महासुरेंद्रे असुराः दैत्याः इंद्रः
स्वामी शुंभे हते सति प्रहारिते सति वन्हिः पुरोगमो येषां ते वन्हिपुरोगमाः वन्हिः अग्निः पुरोगमः मुख्यः इंद्रेण १४६
सह वर्तमानाः सेंद्राः सह वर्तमाना युक्ताः सुराः देवाः तां चंडिकां तुष्टुवुः स्तुतिं चक्रुः इष्टस्य लंभः इष्टलंभः

तस्मात इष्ट लंभात् इष्टस्य शुंभादिवधस्य लंभः प्राप्तिः विकाशीनि वक्त्राणि येषां ते विकाशिवक्त्राः विकाशीनि त्यक्तव-
र्णानि वक्त्राणि मुखानि विकाशिताः आशाः यैः ते विकाशिताशाः विकाशिताः प्रकाशिताः आशाः दिशः ॥१॥ देवीति
हेराजन् हे देवि हे प्रपन्नार्त्ति हरे त्वं प्रसीद हे अखिलस्य जगतः मातः त्वं प्रसीद हे विश्वेश्वरि त्वं प्रसीद विश्वं पाहि हे दे-
वि चराचरस्य ईश्वरी भवसि प्रपन्नानां आर्तिः प्रपन्नार्त्तिः प्रपन्नार्त्तिं हरतीति प्रपन्नार्त्तिहरा तत्संबोधने हे प्रपन्नार्त्ति
हरे प्रपन्नानां भक्तानां आर्तिः पीडा प्रसीद प्रसन्ना भव अखिलस्य समस्तस्य जगतः लोकस्य विश्वेषां ईश्वरी
विश्वेश्वरी तत्संबोधने विश्वेश्वरि विश्वेषां चतुर्दश लोकानां ईश्वरी स्वामिनी विश्वं जगत् पाहि रक्ष चराश्च अच

देवि प्रपन्नार्त्ति हरे प्रसीद प्रसीद मातर्जगतो खिलस्य ॥ प्रसीद विश्वेश्वरि
पाहि विश्वं त्वमीश्वरी देवि चराचरस्य ॥ २ ॥ आधार भूता जगतस्त्व
मेका मही स्वरूपेण यतः स्थितासि ॥ अपां स्वरूप स्थितया त्व
यैतदाप्याय्यते कृत्स्न मलंघ्य वीर्ये ॥३॥ ॐ ॥ ११ ॥ ॐ ॥११॥

राश्च एतेषां समाहारः चराचरं तस्य चराचरस्य जंगमाः मनुष्यादयः अचराः स्थावराः वृक्ष पर्वतादयः ईश्वरी कर्त्री ॥२॥
आधार भूतेति हे देवि यतः एकात्वं मही स्वरूपेण स्थिता असि अतः जगतः आधारभूता भवति हे अलंघ्य वीर्ये अपां स्वरू-
पस्थितया त्वया कृत्स्नं एतत् आप्यायते यतः यस्मात कारणात एका असहाया मह्याः स्वरूपं मही स्वरूपं तेन मही स्व-
रूपेण मह्याः पृथिव्याः अतः अस्मात् कारणात् जगतः लोकस्य अलंघ्यं वीर्यं यस्याः सा अलंघ्य वीर्या तत्संबोधने हे
अलंघ्य वीर्ये वीर्यं पराक्रमं अपां जलानां स्वरूपेण स्थिता स्वरूपस्थिता तया स्वरूपस्थित या कृत्स्नं समस्तं एतत् ज- १४७
गत् आप्यायते व्याप्यते ॥३॥

त्वमिति हे देवि अनंत वीर्या त्वं वैस्नवी शक्तिः असि त्वं विश्वस्य वीजं असि त्वं परमा माया असि त्वया समस्तं एतत् सं मोहितं त्वं प्रसन्ना सती वै भुवि मुक्ति हेतुः भवसि अनंतं वीर्यं यस्याः सा अनंत वीर्या अनंतं असंख्यातं वीर्यं पराक्रमः वैस्नवी विस्नु संबंधिनी विश्वस्य जगतः वीजं कारणं परमा उत्कृष्टा एतत् जगत् संमोहितं संसार गर्ते पातितं तत्र किं मोक्षः स्यादित्यत आह प्रसन्ना सती कृत प्रसादा सती वै इति प्रसिद्धौ भुवि जगति मुक्तेः हेतुः ॥ ४ ॥ विद्या इति हे देवि समस्ताः विद्यास्तव भेदाः भवंति जगत्सु सकलाः समस्ताः स्त्रियः तव भेदाः भवंति अंबया एकया त्वया एतत् पूरितं त्वय्य

त्वं वैस्नवी शक्तिरनंतवीर्या विश्वस्य वीजं परमासि माया ॥ संमोहितं देवि समस्त मेतत्त्वं वै प्रसन्ना भुवि मुक्ति हेतुः ॥ ४ ॥ विद्याः समस्तास्तव देवि भेदाः स्त्रियः समस्ताः सकला जगत्सु ॥ त्वयैकया पूरित मंबयैतत्का ते स्तुतिः स्तव्य परा परोक्तिः ॥ ५ ॥ सर्व भूता यदा देवी स्वर्ग मुक्ति प्रदायिनी ॥ त्वं स्तुता स्तुतये का वा भवंतु पर मोक्तयः ॥ ६ ॥ ऽऽ ॥

परा परा उक्तिः स्तुतिः ते का भवति न का पीत्यर्थः समस्ताः अष्टादश विद्याः अंगानि ६ वेदाश्चत्वारो ४ मीमांसा ११ न्याय विस्तरः १२ पुराणं १३ धर्म शास्त्रं च १४ विद्या ह्येताश्चतुर्दश आयुर्वेद धनुर्वेद गांधर्वार्थ शास्त्रैः सहाष्टदश भेदाः सकलाः चतुःषष्टि कलोपेताः पातिव्रत्य सौंदर्यता रूपोपेताः समस्ताः संपूर्णाः स्त्रियः नार्यः भेदाः अंशाः एतत् जगत् पूरितं व्याप्तं स्तव्ये परा स्तव्य परा स्तव्ये स्तुति विषये परा परा गौणी मुख्या उक्तिः तद्रूपा स्तुतिः ते तव ॥ ५ ॥ पुनरपि स्तुतेरघटनामाह सर्वेति हे अंब सर्व भूता देवी स्वर्ग मुक्ति प्रदायिनी यदा त्वं स्तुता तदा तव स्तुतये परमोक्तयः का वा भवं

तत इति हे राजन् ततः दुरात्मनि तस्मिन् हते सति प्रसन्नं अखिलं जगत् अतीव स्वास्थ्यं आप किंच नभः निर्मलं अभवत् ततः तदनंतरं शुंभ पतना नंतरं दुष्टः आत्मा यस्य सः दुरात्मा तस्मिन् दुरात्मनि दुष्टः कुटिलः आत्मा अंतः करणं तस्मिन् शुंभे हते सति प्रहारिते सति प्रसन्नं प्रकाशवत् अखिलं समस्तं अतीव अत्यंत मेव स्वास्थ्यं अनाविरक्त वत्वं आप प्राप नभः आकाशं निर्मलं स्वच्छं ॥ २४ ॥ उत्पातेति हे राजन् तत्र पातिते सति ये उत्पात मेघाः प्राक् सोल्काः आसन् ते शमं ययुः तथा सरितः मार्ग वाहिन्यः आसन् तत्र शुंभे पातिते सति हते सति उत्पात मेघाः उत्पात सूचकाः मेघाः उत्पात मेघाः उत्पात सूचकाः शुभाशुभ सूचकाः प्राक् शुंभ वधात् पूर्वं उल्कया सहवर्तमानाः सोल्काः सहव

ततः प्रसन्न मखिलं हते तस्मिन् दुरात्मनि ॥ जगत्स्वास्थ्य मतीवाप निर्मलं चाभवन्नभः ॥ २४ ॥ उत्पात मेघाः सोल्का ये प्रागासंस्ते शमं ययुः ॥ सरितो मार्ग वाहिन्य स्तथा संस्तत्र पातिते ॥ २५ ॥ ततो देव गणाः सर्वे हर्ष निर्भर मानसाः ॥ बभूवु र्निहते तस्मिन् गंधर्वा ललितं जगुः ॥ २६ ॥ ऽ ॥

र्तमानाः युक्ताः ते उत्पात मेघाः शमं शांतिं ययुः आपुः तथा तद्वत् सरितः नद्यः मार्गेण वहंतीति मार्ग वाहिन्यः आसन् बभूवुः ॥ २५ ॥ तत इति हे राजन् तस्मिन् निहते सति ततः सर्वे देव गणाः हर्ष निर्भर मानसा बभूवुः गंधर्वा ललितं जगुः तस्मिन् शुंभे निहते सति प्रहारिते सति ततः तस्मात् कारणात् सर्वे समस्ताः देवानां गणाः देवानां इंद्रादीनां गणाः समूहाः हर्षेण निर्भरं मानसं येषां ते हर्ष निर्भर मानसाः हर्षेण आनंदेन निर्भरं पूर्णं मानसं अंतः करणं ललितं मनोहरं य

दु० टी० १४९ सर्वमंगलेति हे सर्व मंगल मंगल्ये हे शिवे हे सर्वार्थ साधिके हे शरण्ये त्र्यंबके हे गौरि हे नारायणि ते नमः अस्तु म- १०
वाणि मंगलानि यस्यां सा सर्व मंगला सर्व मंगला चासौ मंगल्या च सर्वमंगल मंगल्या तत्संबोधने हे सर्व मंगल
मंगल्ये सर्वाणि समस्तानि मंगलानि शुभानि मंगल्या भक्तानां आर्ति हारिणी हे शिवे हे मुक्तिप्रदे सर्वेषां अर्थः सर्वा
र्थः सर्वार्थस्य साधिका सर्वार्थ साधिका तत्संबोधने हे सर्वार्थ साधिके सर्वेषां जनानां अर्थः प्रयोजनं साधिका क
र्त्री शरणे साध्वी शरण्या तत्संबोधने हे शरण्ये शरणे रक्षणे साध्वी हित कारिणी त्रीणि अंबकानि यस्याः सा त्र्यंबका
तत्संबोधने हे त्र्यंबके अंबकानि नेत्राणि हे गौरि हे गौर वर्णे ते तुभ्यं नमः नमस्कारः ॥९॥ सृष्टीति हे सृष्टि स्थिति

सर्व मंगल मंगल्ये शिवे सर्वार्थ साधिके ॥ शरण्ये त्र्यंबके गौरि नारायणि नमोस्तुते ॥९॥ सृष्टि स्थिति विनाशानां शक्ति भूते सनात-नि ॥ गुणाश्रये गुणमये नारायणि नमोस्तुते ॥१०॥ शरणागत दीनार्त परित्राण परायणे ॥ सर्वस्यार्ति हरे देवि नारायणि नमोस्तुते ॥११॥

विनाशानां शक्तिभूते हे सनातनि हे गुणाश्रये हे अगुणमये हे नारायणि ते नमः अस्तु सृष्टिश्च स्थितिश्च विनाशश्च
ते सृष्टि स्थिति विनाशाः तेषां सृष्टिस्थिति विनाशानाम् सृष्टिः उत्पत्तिः स्थितिः पालनं विनाशः संहारः हे सनात-
नि हे नित्ये गुणानां आश्रया गुणाश्रया तत्संबोधने हे गुणाश्रये गुणानां महदादीनां आश्रया आश्रयभूता हे गु-
णमये हे अविद्यमान गुण कृतविकारे ते तुभ्यं नमः नमस्कारः ॥१०॥ शरणेति हे शरणागत दीनार्त परित्राण प-
रायणे हे सर्वस्य आर्ति हरे हे देवि हे नारायणि ते नमः अस्तु शरणे आगताः शरणागताः शरणागताश्च ते दीनाश्च १५०
शरणागत दीनाः शरणागत दीनाश्च ते आर्ताश्च ते शरणागत दीनार्ताः शरणागत दीनार्तानां परित्राणं शरणाग-

दु० टी० १५१ त दीनार्त परित्राणं शरणागत दीनार्त परित्राणे परायणा शरणागत दीनार्त परित्राण परायणा तत्संबोधने हे शरणा- १८
गत दीनार्त परित्राण परायणे आगताः प्राप्ताः दीनाः सर्व दिक् दुःखभाजः आर्ताः तस्करादि पीडिताः परित्राणं
रक्षणं परायणा तत्पराः सर्वस्य जनस्य आर्तिं हरति आर्तिहरा तत्संबोधने हे आर्ति हरे आर्तिं पीड़ां हरति नाश
यति ते तुभ्यं नमः नमस्कारः ॥११॥ हंसेति हंसयुक्त विमानस्थे हे ब्रह्माणी रूप धारिणि हे कौशांभः क्षरिके हे देवि हे
नारायणि ते नमः अस्तु हंसैः युक्तं हंस युक्तं तत् विमानं च हंस युक्त विमानं हंस युक्त विमाने तिष्टतीति हंस युक्त विमा-
नस्था तत्संबोधने हे हंसयुक्त विमानस्थे ब्रह्माण्याः रूपं ब्रह्माणीरूपं ब्रह्माणी रूपस्य धारिणी ब्रह्माणी रूप धारिणी त-

हंस युक्त विमानस्थे ब्रह्माणी रूप धारिणि ॥ कौशांभः क्षरिके देवि नारायणि नमोस्तुते ॥१२॥ त्रिशूल चंद्राहि धरे महा वृषभ वाहिनि ॥ माहेश्वरी स्वरूपेण नारायणि नमोस्तुते ॥१३॥ॐ॥

त्संबोधने हे ब्रह्माणी रूप धारिणि धारिका कुशस्य अयं कौशः कौशस्य अंभः कौशांभः कौशांभसः क्षरिका कौशांभः
क्षरिका तत्संबोधने हे कौशांभः क्षरिके कुशस्य जलस्य अयं कौशः कमंडलुः अंभः जलं क्षरिका सेचिका ते तुभ्यं नमः
नमस्कारः ॥१२॥ त्रिशूलेति हे माहेश्वरी स्वरूपेण त्रिशूल चंद्राहिधरे हे महा वृषभवाहिनि हे नारायणि ते नमः अस्तु मा-
हेश्वर्याः स्वरूपं माहेश्वरी स्वरूपं तेन माहेश्वरी स्वरूपेण धरतीति धरा त्रिशूलं च चंद्रश्च अहिश्च ते त्रिशूल चंद्राहयः त्रि
शूल चंद्राहीनां धरा त्रिशूल चंद्राहि धरा तत्संबोधने हे त्रिशूल चंद्राहि धरे धरति धारयति अहिः सर्पः महांश्चासौ वृषभश्च १५१
महावृषभः महावृषभं वाहयितुं शीलं यस्याः सा महा वृषभ वाहिनी तत्संबोधने हे महा वृषभ वाहिनि ते तुभ्यं नमः नमस्कारः ॥१३॥

मयूरेति हे मयूर कुक्कुट वृते हे महाशक्ति धरे हे अनघे हे कौमारी रूप संस्थाने नारायणि ते नमः अस्तु मयूरश्च कुक्कुटश्च मयूर कु
क्कुटौ मयूर कुक्कुटाभ्यां वृता मयूर कुक्कुट वृता तत्संबोधने हे मयूर कुक्कुट वृते वृता वेष्टिता धरतीति धरा महती चासौ शक्तिश्च
महाशक्तिः महाशक्तेः धरा महाशक्ति धरा तत्संबोधने हे महाशक्ति धरे धरति धारयति हे अनघे अघ रहिते कौमार्याः रू
पं कौमारी रूपं कौमारी रूपं संस्थानं यस्याः सा कौमारी रूप संस्थना तत्संबोधने हे कौमारी रूप संस्थाने संस्थानं अवयव
सन्निवेशः ते तुभ्यं नमः नमस्कारः ॥२४॥ शंखेति हे शंख चक्र गदा शार्ङ्ग गृहीत परमायुधे हे वैष्णवी रूपे हे नारायणि
त्वं प्रसीद ते नमः अस्तु परमाणि च तानि आयुधानि च परमायुधानि शंखश्च चक्रं च गदा च शार्ङ्गं च तानि शंखचक्र

मयूर कुक्कुट वृते महाशक्ति धरेऽनघे ॥ कौमारी रूप संस्थाने नाराय-
णि नमोऽस्तुते ॥२४॥ शंख चक्र गदा शार्ङ्ग गृहीत परमायुधे ॥
प्रसीद वैष्णवी रूपे नारायणि नमोऽस्तुते ॥२५॥ गृहीतोग्र महा चक्रे
दंष्ट्रोद्धृत वसुंधरे ॥ वराह रूपिणि शिवे नारायणि नमोऽस्तुते ॥२६॥६॥

गदा शार्ङ्गाणि शंख चक्र गदा शार्ङ्गाणि गृहीतानि परमायुधानि यया सा शंख चक्र गदा शार्ङ्ग गृहीत परमायुधा तत्सं-
बोधने हे शंख चक्र गदा शार्ङ्ग गृहीत परमायुधे परमाणि उत्कृष्टानि आयुधानि शस्त्राणि शार्ङ्गं धनुः वैष्णव्याः रूपं
यस्याः सा वैष्णवी रूपा तत्संबोधने हे वैष्णवी रूपे प्रसीद प्रसन्ना भव ते तुभ्यं नमः नमस्कारः ॥२५॥ गृहीत इति हे गृहीतो
ग्र महाचक्रे हे दंष्ट्रोद्धृत वसुन्धरे वराह रूपिणि हे शिवे हे नारायणि ते नमः अस्तु महच्च तत् चक्रं च महाचक्रं उग्रं
च तत् महाचक्रं च उग्र महाचक्रं गृहीतं उग्र महाचक्रं यया सा गृहीतोग्र महा चक्रा तत्संबोधने हे गृहीतोग्र महा च
क्रे उग्रं भयानकं दंष्ट्राभ्यां उद्धृता वसुंधरा यया सा दंष्ट्रोद्धृत वसुंधरा तत्संबोधने हे दंष्ट्रोद्धृत वसुंधरे उद्धृता निष्कासिता

वुन का पीत्यर्थः सर्व भूता विश्वात्मिका देवी द्योतन शीला स्वर्गश्च मुक्तिश्च स्वर्ग मुक्ती स्वर्ग मुक्त्योः प्रदायिनी स्वर्गमुक्ति ॥
प्रदायिनी मुक्तिः मोक्षः प्रदायिनी दात्री परमा श्च ताः उक्तयश्च परमोक्तयः परमाः आधिकाः ॥६॥ तथाप्यभ्युप
गम्या प्याह सर्व स्येति हे सर्वस्य जनस्य हृदि बुद्धि रूपेण संस्थिते हे स्वर्गापवर्ग दे हे नारायणि ते नमः अस्तु हृदि हृ
दये बुद्धि रूपेण निश्चयात्मक ज्ञानेन स्वर्गश्चापवर्गश्च तौ स्वर्गापवर्गौ स्वर्गापवर्गौ ददातीति स्वर्गापवर्गदा तत्सं-
बोधने हे स्वर्गापवर्ग दे अपवर्गः मोक्षः हे देवि हे द्योतनशीले नारायणस्य शक्तिः नारायणी नारायणस्य विष्णोः
यद्वा नरस्य अयनी नारायणी नरस्य जीवसमूहस्य अयनी स्थान भूता ते तुभ्यं नमः नमस्कारः ॥७॥ कलेति हे क-

सर्वस्य बुद्धि रूपेण जनस्य हृदि संस्थिते ॥ स्वर्गापवर्ग दे देवि नारा-
यणि नमोऽस्तुते ॥७॥ कला काष्ठादि रूपेण परिणाम प्रदायिनि ॥
विश्वस्योपरतौ शक्ते नारायणि नमोऽस्तुते ॥८॥ ॐ ॥ ११ ॥ ११॥

ला काष्ठादि रूपेण परिणाम प्रदायिनी हे विश्वस्य उपरतौ शक्ते हे नारायणि ते नमः अस्तु कला च काष्ठा च कला
काष्ठे आदिर्यस्य सः कला काष्ठादिः कला काष्ठादेः रूपं कला काष्ठादि रूपं तेन कला काष्ठादि रूपेण कलः त्रिंश
हे परिणाम प्रदायिनि परिणामं जन्य वस्तूनां अवस्था विशेषं विश्वस्य जगतः उपरतौ नाशे शक्ते समर्थे ते तुभ्यं
काष्ठात्मकः कालः काष्ठा अष्टादश निमेषात्मकः कालः परिणामं प्रददातीति परिणाम प्रदायिनी तत्संबोधनं
नमः नमस्कारः ॥८॥ ॐ ॥ ११ ॥ ॐ ॥ ११ ॥ ॐ ॥ ११ ॥ ॐ ॥

दु० टी० १५४ दैत्य बले बलं पराक्रमं हन्ता: प्रहारिता: घोरं रूपं यस्या: सा घोर रूपा तत्संबोधने हे घोर रूपे घोरं भयानकं रूपं स्वरूपं १०८
महान् रावो यस्या: सा महारवा तत्संबोधने हे महारावे रव: शब्द: ते तुभ्यं नम: नमस्कार: ॥२६॥ दंष्ट्रेति हे दंष्ट्रा क-
राल बदने हे शिरोमाला विभूषणे हे चामुंडे हे मुंड मथने हे नारायणि ते नम: अस्तु दंष्ट्राभ्यां करालं बदनं यस्या:
सा दंष्ट्रा कराल बदना तत्संबोधने हे दंष्ट्रा कराल बदने करालं भयंकरं बदनं मुखं शिरसां माला शिरोमाला विभूषणं
यस्या: सा शिरोमाला विभूषणा तत्संबोधने हे शिरोमाला विभूषणे शिरसां मुडानां मुंडं मथ्नाति मुंड मथना तत्संबोधने
हे मुंडमथने मुंडं मुंडासुरं मथ्नाति विलोडयाति ते तुभ्यं नम: नमस्कार: ॥२०॥ लक्ष्मीति हे लक्ष्मि हे लज्जे हे महा

दंष्ट्रा कराल बदने शिरोमाला विभूषणे ॥ चामुंडे मुंड मथने नारायणि ॥
नमोस्तुते ॥ २०॥ लक्ष्मि लज्जे महा विद्ये श्रद्धे पुष्टि स्वधे ध्रुवे ॥ महारा-
त्रि महा विद्ये नारायणि नमोस्तुते ॥ २१॥ मेधे सरस्वति वरे भूतिवा
भ्रवि तामसि ॥ नियते त्वं प्रसीदेशे नारायणि नमोस्तुते ॥ २२॥ १०॥

विद्ये हे श्रद्धे पुष्टि स्वधे ध्रुवे हे महारात्रि हे महाविद्ये हे नारायणि ते नम: अस्तु हे महाविद्ये हे उपनिषत स्वरूपे हे श्रद्धे
आस्तिक्य बुद्धे पुष्टि सहिता स्वधा पुष्टि स्वधा तत्संबोधने हे पुष्टि स्वधे पुष्टि: उपचय: हे ध्रुवे हे स्थिरे महती चासौ
रात्रिश्च महारात्रि: तत्संबोधने हे महारात्रि परार्द्ध द्वया वसान तथा प्रलय रूप महती चासौ अविद्या च महावि-
द्या तत्संबोधने हे महा विद्ये अविद्या सर्वा वरण समर्था महामोह: ते तुभ्यं नम: नमस्कार: ॥२१॥ मेधे इति हे मेधे
हे सरस्वति हे भूति हे वाभ्रवि हे तामसि हे नियते हे ईशे नारायणि त्वं प्रसीद ते नम: अस्तु हे मेधे हे धारणा वतिबुद्धे १५५
हे सरस्वति हे वाग्देवते हे वरे हे श्रेष्ठे हे भूति हे सत्वगुण प्रधाने छांदसो गुण: भाव: हे वाभ्रवि हे रजो गुण प्रधाने हे

दु० टी० १५५ तामसि हे तमो गुण प्रधाने हे नियते नियत स्वरूपे हे प्राचीन कर्म स्वरूपे हे ईशे हे समर्थे प्रसीद प्रसन्ना भव ते तुभ्यं न १००
म: नमस्कार: ॥ २२ ॥ सर्वेति हे सर्व स्वरूपे सर्वेशे सर्वशक्ति समन्विते हे देवि हे दुर्गे हे देवि त्वं न: भयेभ्य: पाहि ते न-
म: अस्तु सर्वं स्वरूपं यस्या: सा सर्व स्वरूपा तत्संबोधने हे सर्व स्वरूपे सर्वं विश्वं सर्वेषां ईशा सर्वेशा तत्संबोधने
हे सर्वेशे सर्वेषां ब्रह्मादीनां ईशा स्वामिनी सर्वाश्चता: शक्तयश्च सर्व शक्तय: सर्व शक्तय: सर्व शक्तिभि: समन्विता
सर्व शक्ति समन्विता तत्संबोधने हे सर्वशक्ति समन्विते सर्वा समस्ता: शक्तय: ब्राह्म्या दय: समन्विता युक्ता न:
अस्मान् त्राहि रक्ष ते तुभ्यं नम: नमस्कार: देवी त्यस्य द्विरुक्ति: प्रसीदतो त्राही सर्वे: ॥२३॥ एतत् दिति हे कात्याय

सर्व स्वरूपे सर्वेशे सर्व शक्ति समन्विते ॥ भयेभ्य स्त्राहि नो देवि दुर्गे-
देवि नमोस्तुते ॥ २३ ॥ एतत्ते वदनं सौम्यं लोचन त्रय भूषितं ॥ पातु
न: सर्व भूतेभ्य: कात्यायनि नमोस्तुते ॥ २४ ॥ ज्वाला कराल मत्युग्र
मशेषा सुर सूदनं त्रिशूलं पातु नो भीतेर्भद्र कालि नमोस्तुते ॥ २५ ॥

नि सौम्यं लोचन त्रय भूषितं ते एतत् वदनं न: सर्व भूतेभ्य: पातु सौम्यं मनोहरं लोचनानां त्रयं लोचन त्रयं लोच
न त्रयेण भूषितं लोचन त्रय भूषितं लोचना नां नेत्राणां ते तव वदनं मुखं न: अस्मान् सर्वभूतेभ्य: सर्व भूत विका-
रेभ्य: यद्वा प्राणिभ्य: पातु रक्षतु ते तुभ्यं नम: नमस्कार: ॥ २४॥ ज्वालेति हे भद्रकालि ज्वाला करालं अत्युग्रं अशे-
षा सुर सूदनं त्रिशूलं न: भीते: पातु ते नम: अस्तु भद्रा चासौ काली च भद्रकाली तत्संबोधने हे भद्रकालि भद्रा क-
ल्याण दात्री काली कृष्णा ज्वालया करालं भीषणं अत्युग्रं अति भयंकरं अशेषा श्च ते असुराश्च अशेषा सुरा: अ १५५
शेषा सुराणां सूदनं अशेषासुर सूदनं अशेषा: समस्ता: असुरा: दैत्या: सूदनं नाशकं न: अस्मान् भीते: भयात् ण

दु० टी० १९६

तु रक्षतु तेतुभ्यं नमः नमस्कारः ॥२५॥ हिनस्तीति हे देवि या घंटा स्वनेन जगत् आपूर्य दैत्यतेजांसि हिनस्ति सा घं- टा नः पापेभ्यः पातु कान् इव अनः सुतान् इव स्वनेन शब्देन आपूर्य या दैत्यानां तेजांसि दैत्य तेजांसि तानि दैत्यते- जांसि हिनस्ति नाशयति नः अस्मान् पातु रक्षतु अनः प्राणिवामा ता सुतान् इव पुत्रान् इव ॥२६॥ असुरेति हे चंडिके असुरा सृग्वसा पंकचर्चितः करोज्वलः ते खड्गः नः शुभाय भवतु वयं त्वां नताः स्मः असृजश्च वसाश्च ताः असृग्वसाः असुराणां असृग्वसाः असुरासृग्वसाः असुरा सृग्वसानां पंकः असु सृग्वसापंकः असुरा सृ- ग्वसा पंकेन चर्चितः असुरा सृग्वसा पंक चर्चितः असृजः रुधिराणि वसाः मज्जाः असुराणां दैत्यानां पंकः कर्दमः

हिनस्ति दैत्य तेजांसि स्वनेना पूर्य या जगत् ॥ सा घंटा पातु नो देवि पापेभ्यो नः सुतानिव ॥२६॥ असुरा सृग्वसा पंक चर्चितस्ते करोज्वलः ॥ शुभाय खड्गो भवतु चंडिके त्वां नता वयं ॥ २७॥ रोगान शेषा नपहंसि तुष्टा रुष्टा तु कामान्सकला नभीष्टान् ॥ त्वामाश्रितानां न विपन्नराणां त्वामाश्रिता ह्याश्र-

॥२८॥ यतां प्रयान्ति

चर्चितः लिप्तः करं उज्वल यतीति करोज्वलः करं हस्तं उज्वलयति प्रकाशयति यद्वा करैः उज्वलः करोज्वलः करैः किरणैः उज्वलः दीप्यमानः ते तव खड्गः असिः नः अस्माकं शुभाय कल्याणाय नताः स्म प्रणताः स्म ॥२७॥ रोगा- निति हे देवि त्वं तुष्टा सती अशेषान् रोगान् अपहंसि त्वं रुष्टा सती अभीष्टान् सकलान् कामान् अपहंसि तु पादपूर- णे त्वां आश्रितानां नराणां विपत् न भवति त्वां आश्रिताः अन्येषां आश्रयतां हि प्रयांति तुष्टा सती प्रसन्ना सती अशेषान् समस्तान् अपहंसि नाशयासि रुष्टा सती क्रुद्धा सती अभीष्टान् प्रियान् सकलान् समस्तान् कामान् मनोरथान् अपहंसि नाशयासि विपत् आपत्तिः आश्रिताः जनाः अन्येषां जनानां आश्रयस्य भावः आश्रयता ताम् १०५

दु० टी० १९३

वसुंधरा पृथिवी वाराहस्य रूपं यस्याः सा वाराह रूपिणी तत्संबोधने हे वाराह रूपिणि ते तुभ्यं नमः नमस्कारः ॥१६॥ १०
नृसिंहेति हे उग्रेण नृसिंह रूपेण दैत्यान् हंतुं कृतोद्यमे हे त्रैलोक्य त्राण सहिते हे नारायणि ते नमः अस्तु उग्रेण भयानकेन नृसिंहस्य रूपं नृसिंह रूपं तेन नृसिंह रूपेण हंतुं प्रहर्तुं कृतः उद्यमो यया सा कृतोद्यमा तत्संबोधने हे कृतोद्यमे उद्यमः उद्योगः त्रयो लोकाः त्रैलोक्यं तस्य त्राणाय सम्यक् हिता त्रैलोक्य त्राण सहिता तत्संबोधने हे त्रै- लोक्य त्राण सहिते त्राणाय रक्षणीय हित कर्त्री ममो मस्य हिते लोपः ते तुभ्यं नमः नमस्कारः ॥२७॥ किरीटिनी- ति हे किरीटिनि हे महावज्रे हे सहस्र नयनोज्वले हे वृत्र प्राणहरे हे ऐंद्रि हे नारायणि ते नमः अस्तु किरीटमस्ति य-

नृसिंह रूपेणोग्रेण हंतुं दैत्यान् कृतोद्यमे ॥ त्रैलोक्य त्राण सहिते नारा- यणि नमोस्तुते ॥२७॥ किरीटिनि महावज्रे सहस्र नयनोज्वले ॥ वृत्र प्रा- णहरे चैन्द्रि नारायणि नमोस्तुते ॥ २८॥ शिव दूती स्वरूपेण हत दैत्य महाबले ॥ घोर रूपे महारावे नारायणि नमोस्तुते ॥२९॥ ॥

स्याः सा किरीटिनी तत्संबोधने हे किरीटिनि किरीटं मुकुटं महद्वज्रं यस्याः सा महा वज्रा तत्संबोधने हे महा वज्रे स- हस्राणि च तानि नयनानि तैः सहस्र नयनैः उज्वला सहस्र नयनोज्वला तत्संबोधने हे सहस्र नयनोज्वले नयनानि नेत्राणि उज्वला दीप्यमाना वृत्रस्य प्राणाः वृत्रप्राणाः वृत्रप्राणं हरतीति वृत्र प्राण हरा तत्संबोधने हे वृत्र प्राण हरे ते तुभ्यं नमः नमस्कारः ॥२८॥ शिवेति शिवदूती स्वरूपेण हत दैत्य महाबले घोर रूपे हे महारावे हे नारायणि ते न- मः अस्तु शिवः दूतो यस्याः सा शिव दूती शिव दूत्याः स्वरूपं शिव दूती स्वरूपं तेन शिव दूती स्वरूपेण महाबलं ये- षां ते महाबलाः दैत्येषु महाबलाः दैत्य महाबला हताः दैत्य महाबला यया सा हत दैत्य महाबला तत्संबोधने हे हत १५३

भक्त्या समन्वितः भक्तिः समन्वितः समन्वितः युक्तः माहात्म्यं चरितं सर्वो चासौ बाधा च सर्वबाधा सर्वा बाधया विनिर्मुक्तः सर्वबाधावि-
निर्मुक्तः सर्वा समस्ता बाधा उपद्रवः विनिर्मुक्तः रहितः धनं च धान्यं च सुतश्च ते धनधान्यसुताः धनधान्यसुतैः अन्वितः धनधान्य-
सुतान्वितः धनं द्रव्यं धान्यं सस्यादि सुतः पुत्रः अन्वितः युक्तः मम प्रसादः मत्प्रसादः तेन मत्प्रसादेन प्रसादः प्रसन्न-
ता अत्र अस्मिन् विषये संशयः संदेहः श्रुत्वेति पठनस्याप्युपलक्षणम् एवमन्यत्रापि बोध्यं ॥ २१ ॥ २२ ॥ श्रुत्वेति हे दे-
वाः यः पुमान् मम एतत् माहात्म्यं श्रुत्वा शुभाः उत्पत्तयः प्राप्नोति तथा च पराक्रमं प्राप्नोति किंच युद्धेषु निर्भयः जायते
माहात्म्यं चरितं शुभाः शुभकारका उत्पत्तीः प्रादुर्भावम् द्वितीयार्थे प्रथमा युद्धेषु संग्रामेषु युद्धे ष्विति उपलक्षणम् ॥

श्रुत्वा ममैतन्माहात्म्यं तथा चोत्पत्तयः शुभाः ॥ पराक्रमं च युद्धेषु जा-
यते निर्भयः पुमान् ॥ २३ ॥ रिपवः संक्षयं यांति कल्याणं चोपपद्यते ॥
नंदते च कुलं पुंसां माहात्म्यं मम शृण्वतां ॥ २४ ॥ शांतिकर्मणि सर्वत्र त-
था दुःस्वप्नदर्शने ॥ ग्रहपीडासु चोग्रासु माहात्म्यं शृणुयान्मम ॥ २५ ॥ उपसर्गाः
शमं यांति ग्रहपीडाश्च दारुणाः ॥ दुःस्वप्नं च नृभिर्दृष्टं सुस्वप्नमुपजायते ॥ २६ ॥

रिपव इति हे देवाः मम माहात्म्यं शृण्वताम् पुंसाम् रिपवः संक्षयं यांति किंच कल्याणं उपपद्यते किंच कुलं नंदते मा-
हात्म्यं चरितं शृण्वंतीति शृण्वंतः तेषां शृण्वताम् पुंसाम् पुरुषाणां रिपवः संक्षयं नाशं यांति प्राप्नुवंति उपपद्यते प्रा-
प्यते नंदते वर्द्धते ॥ २४ ॥ शांतीति हे देवाः शांतिकर्मणि तथा सर्वत्र दुःस्वप्नदर्शने किंच उग्रासु ग्रहपीडासु मम माहा-
त्म्यं शृणुयात् शांतिकर्माणि उपसर्गादिनिवर्तके कर्माणि दुष्टं च नत् स्वप्नं च दुःस्वप्नं दुःस्वप्नस्य दर्शनं दुःस्वप्नदर्शनं तस्मिन् दुः-
स्वप्नदर्शने उग्रासु महतीषु ग्रहाणां पीडाः ग्रहपीडाः तासु ग्रहपीडासु माहात्म्यं चरितं ॥ २५ ॥ तदेव विवृणोति उपसर्गा इति १९६

हे देवाः मम चरिते कीर्तिते सति उपसर्गाः शमं यांति किंच दारुणाः ग्रहपीडाः शमं यांति किंच नृभिः दृष्टं दुःस्वप्नं सुस्वप्नं
उपजायते कीर्तिते सति उच्चरिते सति उपसर्गाः उपद्रवाः शमं शांतिं यांति प्राप्नुवंति ॥ २६ ॥ बालग्रहेति हे देवाः मम माहा-
त्म्यं बालग्रहाभिभूतानां बालानां शांतिकारकं भवति किंच नृणां संघातभेदे उत्तमं मैत्रीकरणं भवति बालग्रहैः अभि-
भूताः बालग्रहाभिभूताः तेषां बालग्रहाभिभूतानाम् बालग्रहैः पूतनादिभिः अभिभूताः पीडिताः नृणां मनुष्याणां सं-
घातभेदे मैत्रीविघट्टने उत्तमं श्रेष्ठं ॥ २७ ॥ दुर्वृत्तानामिति हे देवाः मम माहात्म्यपठनात् एव अशेषाणां दुर्वृत्तानां परं ब-
लहानिकरं भवति किंच रक्षोभूतपिशाचानां नाशनं भवति अशेषाणां समस्तानां दुर्वृत्तानां दुष्टानाम् व्याघ्रसूक-

बालग्रहाभिभूतानां बालानां शांतिकारकं ॥ संघातभेदे च नृणां मैत्री-
करणमुत्तमं ॥ २७ ॥ दुर्वृत्तानामशेषाणां बलहानिकरं परं ॥ रक्षोभूतपि-
शाचानां पठनादेव नाशनं ॥ २८ ॥ सर्वं ममैतन्माहात्म्यं मम सन्निधिका-
रकं ॥ पशुपुष्पार्घधूपैश्च गंधदीपैस्तथोत्तमैः ॥ २९ ॥ विप्राणां भोजनै-
र्होमैः प्रोक्षणीयैरहर्निशं ॥ अन्यैश्च विविधैर्भोगैः प्रदानैर्वत्सरेण या ॥ ३० ॥

रादीनाम् परं अत्यंतं रक्षश्च भूतश्च पिशाचश्च ते रक्षोभूतपिशाचाः तेषां रक्षोभूतपिशाचानां ॥ २८ ॥ सर्वमिति
हे देवाः सर्वं मम एतत् माहात्म्यं मम संनिधिकारकं भवति पशुपुष्पार्घधूपैः तथा च उत्तमैः गंधदीपैः विप्राणां भो-
जनैः होमैः प्रोक्षणीयैः किंच अन्यैः विविधैः भोगैः प्रदानैः अहर्निशं क्रियमाणैः सद्भिः वत्सरेण से प्रीतिर्भवति सा अ-
स्मिन् सुचरिते सकृच्छ्रुते सति जनैः श्रुतं पापानि हरति तथा आरोग्यं प्रयच्छति सर्वं समस्तं माहात्म्यं चरितं संनिधि-
कारकं भवति पशुश्च पुष्पश्च अर्घश्च धूपश्च ते पशुपुष्पार्घधूपाः तैः पशुपुष्पार्घधूपैः पशुः बलिः अर्घः अष्टांगः अ-

दु० टी० २६८

पः श्री रं कुशाग्राणि दध्यक्षत तिलानि च यवाः सिद्धार्थकाश्चैव अष्टांगोर्घः प्रकीर्तितः उत्तमैः श्रेष्ठैः गंधाद्यदीपा १५८
श्च. ते गन्धदीपाद्यैः गन्धः दीपैः विप्राणां ब्राह्मणानां प्रोक्षणीयैः पंचामृतादिभि षेकादिभिः विविधैः अनेकैः
भोगैः स्रगादिभिः प्रदानैः मदुद्देशे न विप्रेभ्यो दीयमानैः वासोलंकारादिभिः अहर्निशं अहोरात्रं मे ममसा प्रीति
र्मच्चरिते माहात्म्ये सकृत् एकवारं ॥१९॥२०॥२१॥ रक्षां करोतीति हे देवाः मम जन्मनां कीर्तनं भूतेभ्यः रक्षां करोति
युद्धेषु दुष्टदैत्य निर्वहणं मे यत् चरित्तं भवति तस्मिन् श्रुते सति पुंसाम् वैरिकृतं भयं न जायते भूतेभ्यः प्राणिभ्यः
युद्धेषु संग्रामेषु दुष्टश्चासौ दैत्यश्च दुष्टदैत्यः दुष्टदैत्यस्य निर्वहणं दुष्टदैत्य निर्वहणम् दुष्टदैत्यस्य शुंभस्य निर्वहणं

प्रीति र्मे क्रियते सास्मिन् सकृत्सु चरिते श्रुते ॥ श्रुतं हरति पापानि तथा रो-
ग्यं प्रयच्छति ॥२१॥ रक्षां करोति भूतेभ्यो जन्मनां कीर्तनं मम ॥ युद्धेषु चरितं यन्मे
दुष्टदैत्य निवर्हणम् ॥२२॥ तस्मिञ्छ्रुते वैरि कृतं भयं पुंसां न जायते ॥ युष्मा-
भिः स्तुतयो याश्च याश्च ब्रह्मर्षिभिः कृताः ॥२३॥ ब्रह्मणा च कृतास्तास्तु
प्रयच्छंति शुभां मतिं ॥ अरण्ये प्रांतरे वापि दावाग्नि परि वारितः ॥२४॥

नाशकं मेमम तस्मिन् चरिते पुंसाम् पुरुषाणां वैरिभिः कृतं वैरिकृतं वैरिभिः शत्रुभिः युष्माभिरिति देवाः युष्माभि
र्याः स्तुतयः कृताः किंच ब्रह्मर्षिभिः याः स्तुतयः कृताः ॥२३॥ किंच ब्रह्मणा च याः स्तुतयः कृताः शुभां मतिं प्रय-
च्छंति स्तुतयः नारायणी सूक्त रूपाः देवी सूक्त रूपाश्च स्तुतयः महिषान्तकरी सूक्त रूपाः स्तुतयः त्वं स्वाहेत्यादि ए-
न्द्रिसूक्त रूपाः कृतास्ताः स्तुतयः शुभां मोक्षाभ्युदय साधिनीं मतिं बुद्धिं प्रयच्छंति ददति अरण्ये त्यादि श्लोक चतु २६९
ष्टय मेकान्वय अरण्ये दावाग्नि परिवारितः प्रांतरे वा दस्युभिः वृतः शून्ये वा शत्रुभिः गृहीतः वने वा सिंह व्याघ्रानु-

३० ३० २६५ निध्यं स्थितं भवति येन पुरुषेण यस्मिन् आयतने गृहे नित्यं सर्वदा सम्यक् अर्थाव धारणादि पूर्वक स्खलित वर्णादि च १५०
तत् आयतनं गृहं न तद्विमोक्ष्यामि न त्यक्ष्यामि तत्र तस्मिन् आयतने गृहे मे मम सदा सर्वदा सांनिध्यं नेकस्यं ॥८॥ बली
ति देवाः जनैः बलिप्रदाने पूजायां अग्नि कार्ये महोत्सवे सर्वं मम एतत् चरितं उच्चार्यं किंच श्राव्यं एव बलिप्रदानें दुर्गा
दोद्देशे न पश्वाद्युपहारे पूजायां गंधादि नार्चायां अग्निकार्ये देवी देवतयो होमे महोत्सवे पुत्रजन्म विवाहादौ उच्चार्यं पठ
नीयं श्राव्यं एव श्रवणीयं एव उच्चार्यं मिति द्विजविषयं ॥९॥ तत्फलमाह जानतेति हे देवाः अहं जानता वा अजानता
अपि तथा कृतां बलि पूजां तथा कृतं वन्हि होमं प्रीत्या प्रतीच्छिष्यामि जानता विधिज्ञेन पुरुषेण वा अथवा अजानता

बलि प्रदाने पूजाया मग्निकार्ये महोत्सवे ॥ सर्वं ममैतच्चरितमुच्चार्यं
श्राव्यमेव च ॥९॥ जानताजानता वापि बलि पूजां तथा कृताम् ॥ प्रतीच्छि =
ष्याम्यहं प्रीत्या वन्हि होमं तथा कृतं ॥१०॥ शरत्काले महापूजा क्रियते २६
याच वार्षिकी ॥ तस्यां ममैतन्माहात्म्यं श्रुत्वा भक्ति समन्वितः ॥११॥ सर्वा
बाधा विनिर्मुक्तो धनधान्य सुतान्वितः ॥ मनुष्यो मत्प्रसादेन भविष्यति न ॥

अविधि ज्ञेन पुरुषेण तथा वेध प्रकारे बलिसहिता पूजा बलिपूजा ताम् बलि पूजाम् तथा वेधा वेध प्रकारेण वन्हौ होमः व-
न्हिहोमः वन्हौ अग्नौ होमः हवनं प्रतीच्छिष्यामि अंगीकरिष्यामीत्यर्थः चवर्गः मध्यः धातु गणे बाहुलकोक्तः मनीच्छ
धातुर्ग्रहणार्थः ॥१०॥ शरदिति हे देवाः जनैः शरत्काले वार्षिकी या महापूजा क्रियते तस्यां मनुष्यः भक्ति समन्वितः सन्
मम एतत् माहात्म्यं श्रुत्वा सर्वा बाधा विनिर्मुक्तः धनधान्य सुतान्वितः मत्प्रसादेन भविष्यति अत्र संशयः न भवति २६७
रत्काले आश्विन शुक्ला प्रतिपद् मारभ्य नवम्यन्ते वार्षिकी वर्षे भवा वार्षिकी महापूजा दुर्गोत्सव रूपा तस्यां महापूजायां

दु० विश्वेश्वरीति हे देवि यतः त्वं विश्वेश्वरी भवसि अतः त्वं विश्वं परिपासि यतः त्वं विश्वात्मिका भवसि अतः त्वं विश्वं धा-
टी० रयसि यतः भवती विश्वेश वंद्या भवति अतः त्वयि ये भक्ति नम्राः भवंति अतः ते विश्वाश्रयाः भवंति: यतः यस्मात्
१५८ कारणात् विश्वस्य ईश्वरी विश्वेश्वरी विश्वस्य जगतः ईश्वरी स्वामिनी अतः अस्मात् कारणात् विश्वं जगत् परिपा-
सि रक्षसि विश्वं आत्मा यस्याः सा विश्वात्मिका विश्वं जगत् आत्मा स्वरूपं इति हेतोः विश्वं जगत् धारयसि यतः
यस्मात् कारणात् विश्वेशानां वंद्या विश्वेश वंद्या विश्वेशानां ब्रह्मादीनां वंद्या स्तुत्या अतः अस्मात् कारणात्
ये जनाः भक्त्या नम्राः भक्ति नम्राः नम्रा नम्री भूताः ते जनाः विश्वस्य आश्रयाः विश्वाश्रयाः विश्वस्य जगतः आ-

विश्वेश्वरी त्वं परिपासि विश्वं विश्वात्मिका धारयसीति विश्वं ॥ विश्वेश
वंद्या भवती भवंति विश्वाश्रया ये त्वयि भक्ति नम्राः ॥३२॥ देवि प्र-
सीद परिपालय नोऽरिभीते नित्यं यथासुर वधादधुनैव सद्यः ॥ पापा
नि सर्व जगतां प्रशमं नयाशु उत्पातपाक जनितांश्च महोपसर्गान् ॥३३॥

श्रयाः आश्रयीभूताः ॥३२॥ देवीति हे देवि त्वं प्रसीद नः सद्यः नित्यं अरिभीतेः परिपालय यथा अधुनैव असुरव-
धात् पालितवती असि तथेत्यर्थः सर्व जगतां पापानि आशु शमं नय किंच उत्पात पाक जनितान् महोपसर्गान् शमं
नय प्रसीद प्रसन्ना भव नः अस्मान् सद्यः क्षणमात्रेण नित्यं सर्वदा अरि भीतेः शत्रु भयात् परिपालय रक्ष अधुनैव
सं प्रत्येव असुरस्य वधः असुर वधः तस्मात् असुर वधात् असुरस्य दैत्यस्य शुंभस्य वधः नाशः सर्वाणि च तानि जगंति
च सर्व जगंति तेषां सर्व जगतां सर्वाणि समस्तानि जगंति लोकाः आशु शीघ्रं शमं शांतिं नय प्रापय उत्पातानां पाकः
उत्पातपाकः उत्पात पाकेन जनिताः उत्पात पाकजनिताः तान् उत्पात पाकजनितान् पाकः फलदान कालः जनित

दु० प्रणतानामिति हे देवि हे विश्वार्ति हारिणि हे ईड्ये त्रैलोक्य वासिनां प्रणतानां लोकानां त्वं प्रसीद किंच वरदा भव
टी० विश्वस्य आर्तिः विश्वार्तिः तां हरतीति विश्वार्ति हारिणी तत्संबोधने हे विश्वार्ति हारिणि विश्वस्य जगतः आर्तिः
१५९ पीडा हे ईड्ये हे स्तुत्ये त्रयो लोकाः त्रैलोक्यं त्रैलोक्यं वासिनः त्रैलोक्य वासिनः तेषां त्रैलोक्य वासिनां प्रणतानां न-
म्रीभूतानां लोकानां जनानां वरं ददातीति वरदा वरं वरदानं ॥३४॥ देव्युवाच ॥ वरदेति हे सुर गणाः अहं वरदा भ-
वामि यूयं यं वरं मनसा इच्छथ जगतां उपकारकं तं वरं वृणुध्वं अहं प्रयच्छामि सुराणां गणाः सुरगणाः तत्संबो-
धने हे सुरगणाः सुराणां देवानां गणाः समूहाः वरं ददातीति वरदा वरं वरदानं जगतां लोकानां तं वरं वृणुध्वं प्रार्थ-

प्रणतानां प्रसीद त्वं देवि विश्वार्ति हारिणि ॥ त्रैलोक्य वासिनामीड्ये लोका
नां वरदा भव ॥३४॥ देव्युवाच ॥ वरदाहं सुरगणा वरं यं मनसेच्छथ ॥ तं वृ-
णुध्वं प्रयच्छामि जगतामुपकारकं ॥३५॥ देवा ऊचुः ॥ सर्वाबाधाप्रशमनं
त्रैलोक्यस्याखिलेश्वरि ॥ एवमेव त्वया कार्यमस्मद्वैरि विनाशनं ॥३६॥ देव्यु-
वाच ॥ वैवस्वतेऽन्तरे प्राप्ते अष्टाविंशतिमे युगे ॥ शुंभो निशुंभश्चैवान्यावुत्पत्स्य

यध्वं प्रयच्छामि ददामि ॥३५॥ देवा ऊचुः ॥ सर्वाबाधेति हे अखिलेश्वरि त्वया त्रैलोक्यस्य सर्वा बाधा प्रशमनं अ-
स्मत् वैरि विनाशनं एवं एवं कार्यं हे अखिलेश्वरि हे समस्तेश्वरि सर्वा च असौ बाधा च सर्वा बाधा सर्वा बाधायाः प्रशमनं
सर्वा बाधा प्रशमनं सर्वा समस्ता बाधा पीडा प्रशमनं शांतिः अस्मत् अस्माकं षष्ठ्यर्थे पंचमी वैरिणां विनाशनं वैरि विना-
शनं वैरिणां एवं एवं शुंभादिनाशनवत् एवं कार्यं कर्तव्यं ॥३६॥ देव्युवाच ॥ वैवस्वत इति हे सुराः वैवस्वते अंतरे अष्टा-
विंशतिमे युगे प्राप्ते सति शुंभः किंच निशुंभः एव अन्यौ महासुरौ उत्पत्स्येते वैवस्वते अंतरे वैवस्वत मन्वंतरे अष्टावि- १५९
शति संख्याके युगे चतुर्युगे महासुरौ महादैत्यौ ॥३७॥

दु॰ टी॰ १६० नंदेति हे सुराः ततः नंदगोप गृहे जाता यशोदा गर्भ संभवा अहं विंध्याचल निवासिनी सतीतौ नाशयिष्यामि ततः तद् १५
नंतरं शुंभनिशुंभ स्त्योर नंतरं नंदगोपस्य गृहे नंदगोप गृहे तस्मिन् नंदगोप गृहे यशोदायाः गर्भः यशोदा गर्भः यशोदा
गर्भे संभवो यस्याः सा यशोदा गर्भ संभवा संभव प्रादुर्भावः विंध्याचल निवासिनी विंध्याचलनिवासिनी तौ शुंभनिशुंभौ ॥ ३८ ॥
पुनरपीति हे सुराः अहं पुनः अति रौद्रेण अपि रूपेण पृथिवी तले अवतीर्य वै प्रचित्तान् दानवान् हनिष्यामि अति
रौद्रेण अति भयंकरेण रूपेण स्वरूपेण वैप्रचित्तान विप्रचित वंशोद्भवान् ॥ ३९ ॥ भक्षयंत्या इति हे सुराः उग्रान् वैप्र
चित्तान् तान् महासुरान् भक्षयंत्याः मम दाडिमी कुसुमोपमाः रक्ता दंताः भविष्यंति उग्रान् भयंकरान् वैप्रचित्तान्

नन्दगोप गृहे जाता यशोदा गर्भ संभवा ॥ ततस्तौ नाशयिष्यामि विंध्या
चल निवासिनी ॥ ३८ ॥ पुनरप्यति रौद्रेण रूपेण पृथिवी तले ॥ अवती
र्य हनिष्यामि वैप्रचित्तांस्तु दानवान् ॥ ३९ ॥ भक्षयंत्याश्च तानुग्रान्वैप्रचि
त्तान्महासुरान् ॥ रक्ता दंता भविष्यंति दाडिमी कुसुमोपमाः ॥ ४० ॥ ततो मां दे
वताः स्वर्गे मर्त्यलोके च मानवाः ॥ स्तुवंतो व्याहरिष्यंति सततं रक्तदंतिकां
॥ ४१ ॥ भूयश्च शतवार्षिक्यामनावृष्ट्यामनंभसि ॥ मुनिभिः संस्तुता भूमौ संभ

विप्रचिति वंशजातान् प्रसिद्धान् महासुरान् महादैत्यान् भक्षयंतीति भक्षयंती तस्या भक्षयंत्याः दाडिम्याः कुसुमं
दाडिमी कुसुमं दाडिमी कुसुमं उपमा येषां ते दाडिमी कुसुमोपमाः कुसुमं पुष्पं उपमा उपमानं रक्ताः लोहित वर्णाः ॥ ४०
तत इति हे सुराः ततः स्वर्गे देवता किंच मर्त्ये लोके मानवाः मां सततं स्तुवंतः संतः रक्तदंतिकाम् व्याहरिष्यंति ततः तदनंतरं १६०
रक्तदंतिका प्रादुर्भावानंतरं व्याहरिष्यंति कथयिष्यंति ॥ ४१ ॥ भूयश्चेति हे सुरा भूयः शतवार्षिक्यां अनावृष्ट्यां सत्यां अनं

दु॰ टी॰ १५७ एतदिति हे देवि हे अंबिके त्वया आत्म मूर्तिं अनेकैः रूपैः बहुधा कृत्वा अद्य धर्म द्विषां महासुराणां यत् एतत् कदनं १६
कृतं तत् अन्या का प्रकरोति आत्मनः मूर्तिः आत्ममूर्तिः ताम् मूर्तिम् आत्मनः स्वकीयस्य मूर्तिः तनुः रूपैः ब्रह्माण्या
दि काल्यादि लक्षणैः बहुधा बहुप्रकारं यथा स्यात् तथा अद्य अधुना धर्मान् द्विषंतीति धर्मद्विषः तेषाम् धर्मद्विषा
म् द्विषंति नाशयंति महासुराणां महादैत्यानां कदनं नाशः तत् कदनं अन्या त्वदितरा का ॥ २९ ॥ विद्यास्विति हे देवि
विद्यासु शास्त्रेषु विवेक दीपेषु किंच आद्येषु वाक्येषु सत्सु ममत्व गर्ते अति महांधकारे त्वदन्या का एतत् विश्वं अ
तीव विभ्रामयति न का पीत्यर्थः विद्यासु ज्ञानेषु शास्त्रेषु मन्वाद्युक्तिषु विवेक दीपेषु उपनिषत्सु आद्येषु वाक्येषु

एतत्कृतं यत्कदनं त्वयाद्य धर्मद्विषां देवि महासुराणां ॥ रूपैरनेकैर्बहुधा
त्ममूर्तिं कृत्वांबिके तत्प्रकरोति कान्या ॥ २९ ॥ विद्यासु शास्त्रेषु विवेकदीपे
ष्वाद्येषु वाक्येषु च का त्वदन्या ॥ ममत्व गर्तेति महांधकारे विभ्रामयत्येतद
तीव विश्वं ॥ ३० ॥ रक्षांसि यत्रोग्र विषाश्च नागा यत्रारयो दस्यु बलानि यत्र
त्र दावानलो यत्र तथाब्धि मध्ये तत्र स्थिता त्वं परि पासि विश्वं ॥ ३१ ॥ ॐ ॥

सत्सु ममत्वं गर्तो यस्मिन् सः ममत्वगर्तः तस्मिन् ममत्व गर्ते अति महान् अंधकारो यस्मिन् सः अति महांधकारः त
स्मिन् अति महांधकारे संसारे त्वत् अन्या त्वदन्या का विश्वं जगत् अतीव तं विभ्रामयति ॥ ३० ॥ रक्षांसीति हे देवि यत्र
रक्षांसि तिष्ठंति यत्र उग्र विषाः नागाः तिष्ठंति किंच यत्र अरयः तिष्ठंति यत्र दस्यु बलानि तिष्ठंति यत्र दावानलः
तिष्ठति तथा अब्धि मध्ये यत्र और्वाग्न्यादयः तिष्ठंति तत्र त्वं स्थिता सती विश्वं परिपासि रक्षांसि रक्षसि उग्रं विषं
येषां ते उग्र विषाः उग्रं महत् नागाः सर्पाः अरयः शत्रवः दस्यूनां बलानि दस्यु बलानि दस्यूनां चौराणां बलानि सै ३६
न्यानि दावस्य अनलः दावानलः दावस्य वनस्य अनलः अग्निः अब्धि मध्ये समुद्र मध्ये विश्वं जगत् परिपासि रक्षसि

दुर्गा देवी तिहे सुराः दुर्गा देवी इति विख्यातं तत् मे नाम भविष्यति पुनः अहं यदा हिमाचले भीमं रूपं कृत्वा मुनीनां त्राण कार
णात् रक्षांसि भक्षयिष्यामि ततः सर्वे मुनयः आनम्र मूर्तयः संतः मां स्तोष्यंति दुर्गा देवी इति विख्यातं प्रसिद्धं मे मम भीमं
भयंकरं त्राणस्य कारणं त्राण कारणं तस्मात् त्राण कारणात् त्राणस्य रक्षणस्य कारणं हेतुः रक्षांसि राक्षसान् भक्षय
यिष्यामि आनम्रा मूर्तिर्येषां ते आनम्र मूर्तयः आनम्रा नम्री भूता मूर्तिः तनुः ॥ ४६ ॥ ४७ ॥ भीमेति हे सुराः भीमा
देवी इति विख्यातं मे तत् नाम भविष्यति यदा त्रैलोक्ये अरुणाख्यः महा बाधां करिष्यति ॥ ४८ ॥ तदा अहं असंख्ये
य षट् पदं भ्रामरं रूपं कृत्वा त्रैलोक्यस्य हितार्थाय महासुरं वधिष्यामि विख्यातं प्रसिद्धं मे मम त्रयो लोकाः त्रैलोक्यं

दुर्गादेवीति विख्यातं तन्मे नाम भविष्यति ॥ पुनश्चाहं यदा भीमं रूपं कृ
त्वा हिमाचले ॥ ४६ ॥ रक्षांसि भक्षयिष्यामि मुनीनां त्राण कारणात् ॥ त
दा मां मुनयः सर्वे स्तोष्यंत्यानम्रमूर्तयः ॥ ४७ ॥ भीमा देवीति विख्यातं तन्मे
नाम भविष्यति ॥ यदारुणाख्यस्त्रैलोक्ये महाबाधां करिष्यति ॥ ४८ ॥ तदाहं
भ्रामरं रूपं कृत्वा संख्येयषट्पदं ॥ त्रैलोक्यस्य हितार्थाय वधिष्यामि महा
सुरं ॥ ४९ ॥ भ्रामरीति च मां लोकास्तदा स्तोष्यंति सर्वतः ॥ इत्थं यदा यदा बाधा

तस्मिन् त्रैलोक्ये अरुणाख्यः अरुण नामा महासुरः महती चासौ बाधा च महाबाधा तां महाबाधां बाधा पीडां
षट् पदानि यस्य तत् षट् पदं संख्यातुं योग्यं संख्येयं न संख्येयं असंख्येयं च तत् षट् पदं च असंख्येय षट् पदं तत्
असंख्येय षट् पदं तत् असंख्येय षट् पदं पदानि चरणाः भ्रमरस्य इदं भ्रामरं तत् भ्रामरं रूपं स्वरूपं ॥ ४९ ॥ भ्रामरी ९६
तिहे सुराः तदा लोकाः सर्वतः भ्रामरी इति मां स्तोष्यंति इत्थं यस्य यदा दानवोत्था बाधा भविष्यति तदा तदा अवतीर्य

अहं अरि संक्षयं करिष्यामि लोकाः जनाः सर्वतः सर्वत्र दानवात् उत्था दानवोत्था उत्था उत्पन्ना बाधा पीडा अवतीर्य अव
तीर्य अरीणां संक्षयः अरि संक्षयः तं अरिसंक्षयं अरीणां शत्रूणां संक्षयः नाशः ॥ ५० ॥ ५१ ॥ इति श्री नागोजी भट्ट संमत कृत
सप्तशती व्याख्याने नारायणी स्तुतिर्नाम एकादशो ऽध्यायः ॥ ११ ॥ देव्युवाच ॥ एभिरिति हे देवाः यः समाहितः सन् नित्यं मां एभिः स्तवैः
स्तोष्यते तस्य अहं सकलां बाधां असंशयं यथा स्यात् तथा शमयिष्यामि यः पुरुषः समाहितः सन् अनन्यमनाः सन् नित्यं सर्वदा एभिः म
धुकैटभ वधादि लक्षणैः स्तवैः स्तोष्यते तस्य पुरुषस्य सकलां ऐहिकी पारलौकिकी च बाधा उपद्रवं नास्ति संशयो यस्मिन् कर्मणि तत् अ
संशयं यथा स्यात् तथा शमयिष्यामि नाशयिष्यामि ॥ १ ॥ तद्देवाह मधुरिति हे देवाः ये एक चेतसः संतः अष्टम्यां किंच चतुर्दश्यां किंच

तदा तदावतीर्याहं करिष्याम्यरिसंक्षयं ॥ ५१ ॥ इति मार्कंडेयपुराणे सावर्णि
के मन्वंतरे देवीमाहात्म्ये देव्याः स्तुतिः ॥ ११ ॥ देव्युवाच ॥ एभिः स्तवैश्च मां नित्यं
स्तोष्यते यः समाहितः ॥ तस्याहं सकलां बाधां शमयिष्याम्यसंशयं ॥ १ ॥ मधुकै
टभनाशं च महिषासुरघातनं ॥ कीर्त्तयिष्यंति ये तद्वद्वधं शुंभनिशुंभयोः ॥ २ ॥
अष्टम्यां च चतुर्दश्यां नवम्यां चैकचेतसः ॥ श्रोष्यंति चैव ये भक्त्या मम माहात्म्यमुत्त

नवम्यां मधुकैटभ नाशं किंच महिषासुर घातनं तद्वत् शुंभ निशुंभयोः वधं कीर्तयिष्यंति किंच ये उत्तमं मम माहात्म्यं भक्त्या
श्रोष्यंति एव तेषां किंचित् दुष्कृतं न भविष्यति किंच दुष्कृतोत्थाः आपदः न भविष्यंति किंच दारिद्र्यं एव न भविष्यति इ
ष्टवियोजनं न भविष्यति ये पुरुषाः एकचेतसः संतः अनन्य चेतसः संतः मधुश्च कैटभश्च तौ मधुकैटभौ मधुकैट
भयोः नाशः मधुकैटभ नाशः तं मधु कैटभ नाशं महिषासुरस्य घातनं महिषासुर घातनं तत् महिषासुर घातनं
शः तद्वत् तथैव शुंभश्च निशुंभश्च तौ शुंभ निशुंभौ तौ शुंभ निशुंभौ तयोः शुंभ निशुंभयोः कीर्तयिष्यंति पठिष्यंति ९६३
ये पुरुषाः उत्तमं श्रेष्ठं महात्म्यं चरितं तेषां दुष्कृतोत्थाः किंचन किमपि दुष्कृतं पापं न भविष्यति दुष्कृतात् उत्थाः दुष्कृतोत्थाः

दुष्कृतात् पापात् उत्था: उत्पन्ना: आपद: आपत्तय: न भविष्यंति इष्टस्य वियोजनं इष्ट वियोजनं मित्र वियोगं भवि
ति ॥२।३।४॥ शत्रुत इति हे देवा: तस्य दस्यु तः भयं न भविष्यति राजतः वा भयं न भविष्यति शस्त्रानल तोयौघात् भयं
न भविष्यति शत्रुतः भयं न भविष्यति कदाचित् संभविष्यति तस्मात् जनः समाहितैः सद्भिर्मम स्वस्त्ययन मम एतत्
माहात्म्यं भक्त्या सह पठितव्यं किंच श्रोतव्यं तस्य पुरुषस्य दस्युतः चौरात् शस्त्रं च अनलश्च तोयं च तानि शस्त्रा
नल तोयानि शस्त्रा नल तोयानां ओघः शस्त्रानल तोयौघः तस्मात् शस्त्रा नल तोयौघात् अनलः अग्निः तोयं जलं
ओघः समूहः तस्मात् कारणात् समाहितैः सद्भिः पठितव्यं चित्तैः सद्भिः पठितव्यं इदं अत्यंतं स्वस्तेः अयनं स्वस्त्यय

न तेषां दुष्कृतं किंचिद् दुष्कृतोत्था न चापदः ॥ भविष्यति न दारिद्र्यं न चैवेष्ट
वियोजनं ॥४॥ शत्रुतो न भयं तस्य दस्युतो वा न राजतः ॥ न शस्त्रानलतो
यौघात् कदाचित्संभविष्यति ॥५॥ तस्मान्ममैतन्माहात्म्यं पठितव्यं समाहितैः
श्रोतव्यं च सदा भक्त्या परं स्वस्त्ययनं हि तत् ॥६॥ उपसर्गानशेषांस्तु महा
मारीसमुद्भवान् ॥ तथा त्रिविधमुत्पातं माहात्म्यं शमयेन्मम ॥७॥ यत्रैतत्पः ॥८॥
ठ्यते सम्यङ्नित्यमायतने मम ॥ सदा न तद्विमोक्ष्यामि सान्निध्यं तत्र मे स्थितं

नं कल्याण अयनं भागी ॥६॥ उपेति हे देवा: मम माहात्म्यं महामारी समुद्भवान् अशेषान् उपसर्गान् तथा त्रिविधं उ
त्पातं शमयेत माहात्म्यं चरितं महामार्या: समुद्भवो येषां ते महामारी समुद्भवा: तान् महामारी समुद्भवान् महामार्या: भा
मयश्च भूता महाजन क्षय करी देवताया: समुद्भव: प्रादुर्भाव: अशेषान् समस्तान् उपद्रवान् त्रिविधं व्याधि रोग द्वेषादि
रूपं आध्यात्मिकं भूत प्रेतादिज भयं आधिभौतिकं दैव कृत वज्रपात दारिद्र्य व्याधि नाशकं तद्रूपं उत्पातं अनिष्टं दिव्यं
भौमान्तरिक्षं चेति ॥७॥ यत्रेति हे देवा: यत्र येन मम आयतने नित्यं सम्यक् पठ्यते अहं तन्न विमोक्ष्यामि तत्र मे सदा म

भसि भूमौ मुनिभि: संस्तुता अहं अयोनिजा संभविष्यामि भूय: पुन: शत वर्षाणि प्रमाणं यस्या: सा शत वार्षिकी तस्या: शत
वार्षिक्या न वृष्टि: अनावृष्टि: तस्या अनावृष्ट्या अंभसि कूपादि जल शून्यायाम् भूमौ पृथिव्यां अयोनिजा स्वयंभू: ॥
॥४२॥ तत इति हे सुरा: तत: अहं यत् मुनीन् नेत्राणां शतेन निरीक्षिष्यामि तत: मनुजा: मां शताक्षी इति कीर्तयिष्यंति तत
त: तदनंतरं अयोनिजा प्रादुर्भावानंतरं यत् यस्मात् कारणात् तत: तस्मात्कारणात् मनुजा: मनुष्या: शतानि अक्षी
णि यस्या: सा शताक्षी ताम् शताक्षीम् कीर्तयिष्यंति कथयिष्यंति ॥४३॥ तत इति हे सुरा: तत: अहं आत्म देह समु
द्भवै: आवृष्टे: प्राणधारकै: शाकै: अखिलं लोकं भरिष्यामि तत: तदनंतरं शताक्षी प्रादुर्भावानंतरं आत्मन: देह: आ

तत: शतेन नेत्राणां निरीक्षिष्यामि यन्मुनीन् । कीर्तयिष्यंति मनुजा:
शताक्षीमिति मां तत: ॥४३॥ ततोऽहमखिलं लोकमात्मदेहसमुद्भवै:
॥ भरिष्यामि सुरा: शाकैरावृष्टे: प्राणधारकै: ॥४४॥ शाकंभरीति वि ॥८॥
ख्यातिं तदा यास्याम्यहं भुवि ॥ तत्रैव च वधिष्यामि दुर्गमाख्यं महासुरं

त्मदेह: आत्मदेहात् समुद्भवो येषां ते आत्म देह समुद्भवा: तै: आत्मदेह समुद्भवै: समुद्भव: प्रादुर्भावः आवृष्टे: वृष्टि
पर्यंत प्राणस्य धारका: प्राण धारका: तै: प्राणधारकै: अखिलं समस्तं लोकं जनं भरिष्यामि पोषयिष्यामि ॥४४॥
शाकंभरीति हे सुरा: तदा अहं भुवि शाकंभरी इति विख्यातिं यास्यामि तत्रैव च दुर्गमाख्यं महासुरं वधिष्यामि तदा तस्मिन् काले
भुवि पृथिव्यां शाकं बिभर्तीति शाकंभरी बिभर्ति धारयति विख्यातिं प्रसिद्धिं यास्यामि प्राप्स्यामि तत्रैव च शाकंभर्यवतारे
एव दुर्गम इति आख्या यस्य स: दुर्गमाख्य: तं दुर्गमाख्यं आख्या नाम महासुरं महादैत्यं ॥४५॥